द्वितीय[4]विधिसम्बद्ध[5]पदैः[6] सहवि[7]निर्णयः।
तत्रैव लक्ष्य संस्कारो जिज्ञासा विनिवर्तनम्[8]।।2।।

संज्ञानां परिभाषाणामेषा प्राचीन पद्धतिः।
यथोद्देश[9] नवीनानां[10] स्वदेशे ह्यर्थ[11] निर्णयः।।3।।

पदैक[12]वाक्यतालक्ष्यसंस्कारो[13]ऽत्रैव संमतः[14]।
विशेषज्ञो[15]ऽधिकारीस्यात्षष्टो[16] स्थानेति भाष्यतः।।4।।

---

1. लक्षाणाम् ज-2.
2. संस्क्रांतिः अ-4.
3. पाठोऽयं अ-3, अ-4, वाक्यतात्माद्ये ज-1; वाक्यतास्वाद्ये ज-2; वाक्यतात्द्याद्ये प-1, अ-1; वाक्यतात्पाद्ये अ-2.
4. द्वितीये ज-2; द्वितीये प-1.
5. संबंध प-1; संपद्ध अ-3.
6. परे प-1.
7. सहा विनिर्णयः अ-4.
8. विनिवर्तते ज-2; विनवर्तिने अ-1, अ-3; विनिवर्त्तनेम अ-4.
9. पाठोऽयं ज-2, अ-1, अ-3; यथोदेशे ज-1, प-1, अ-2, अ-4.
10. न विनानाम् अ-2, अ-4.
11. स्वदेशेत्यर्थं अ-2, अ-4.
12. यदैक अ-1.
13. सस्कारोत्रैव प-1, अ-1, अ-3.
14. समतः अ-1, अ-3.
15. पाठोऽयं अ-2, अ-4; विशेषज्ञोधरीका स्यात् प-1; विशेषज्ञोधिकारो ज-1, ज-2, अ-1, अ-3.
16. पाठोऽयं ज-2, अ-1, अ-2; षधोस्थानेति ज-1; षष्टीत्स्थानेति अ-4; षष्ठास्थानेति प-1.

विधिप्रदेशे वाक्यार्थः कार्यकाले[1] पदैः सह।
भाष्यान्तरस्य दुष्टत्वा[2] द्विशेषज्ञोप[3]कारता॥5॥

यथोद्देशे[4] तु संज्ञानां[5] प्राचीनोक्तेरभिन्नता[6]।
विशेष[7]ज्ञोपकारस्तु विशेषो भाष्यकृन्मता॥6॥

कार्य[8]काले तु संज्ञानां[9] स्वदेशे[10]नैव निर्णयः।
ईदूत्सूत्र[11]स्थ भाष्येण पदानां[12] नैक वाक्यता॥7॥

तत्रैव संस्कृतिः प्रौढ़[13] मनोरंजनता[14] तथा।
आकडाराधिकारस्थ[15] संज्ञासु तु विपर्ययः[16]॥8॥

1. कार्यकाले ज-2; कार्यकाल प-1; कार्यकालै अ-3.
2. इष्टत्वात् ज-2.
3. विशेषज्ञापकारता अ-4.
4. यथोदेशे प-1, अ-2, अ-4.
5. संज्ञायाम् प-1.
6. अभिन्नतो अ-1.
7. विशेषज्ञो प-1.
8. कार्य्य प-1.
9. सज्ञानां अ-1, अ-3.
10. स्वदेशेदेनैव प-1.
11. ईदत् अ-1, अ-3.
12. पदानानैवाक्यता प-1.
13. प्राढ प-1, प्रौढ अ-1, अ-2, अ-3, अ-4.
14. मनोरजनता अ-2; मनोरंजनाता अ-4.
15. अकडाधिकारस्थ प-1.
16. विपर्यय प-1.

इत् संज्ञका अनुबन्धास्तेष्ववयवानवयवत्वसन्देह आह-

अनेकान्ता अनुबन्धा इति॥4॥

अनेकान्ता अनवयवा इत्यर्थः। वो ह्यवयवः स कदाचित् तत्रोपलभ्यत एव। अयं तु न तथा, तदर्थभूते विधेये कदाप्यदर्शनात्। शित्किदित्यादौ समीपेऽवयवात्वारोपेण समासो बोध्यः। 'वुञ्छणकठ' (7.2.80) इत्यादौ णित्त्वप्रयुक्तं कार्यं पूर्वस्यैवेत्यादि तु व्याख्यानतो निर्णेयम्। हलन्त्यम् (1.3.3) इत्यत्रान्त्यशब्दः परसमीपबोधकः॥4॥

वस्तुतस्तु-

एकान्ताः॥5॥

जातशक्तिग्रहेणैव[1] संस्कृतिर्भाष्यमानतः[2]।
संगृहीतो विवेकोऽत्र मताना[3] बालवुद्धये॥9॥

नैवमयमिति[4]। सूत्रे स्वघटित[5]समुदायत्यादिवृत्तित्व[6] सम्बन्धेन। लक्ष्ये[7] तुस्वघटित समुदायोपस्था[8]प्यत्वसम्बन्धेन[9] स्वप्रतियोगिका[10]भाववत्व संबंध नवेति[11]भावः।

---

1. ग्रहैणैव ज-2.
2. त्तः ज-2.
3. ममानां अ-4; मतानां अ-4.
4. नैवयमति अ-2, अ-4.
5. सूत्रेष्वघटित अ-2.
6. पाठोऽयं अ-1, अ-3; समुदाया आदिवृत्तित्व ज-1; समुदायां त्यादिवृतत्वं, ज-2; समुदायांत्य वृत्तित्व-1; समुदायांत्यादित्व संबंधेन अ-2, अ-4.
7. लक्ष्मे अ-4.
8. उपस्थाप्यत्वम् ज-2.
9. सम्बन्धे तु अ-4.
10. भावुवत्व अ-2.
11. पाठोऽयं ज-2, प-1, अ-1, अ-3; संबंधेनेवेति भावः अ-2, अ-4; संबंधेनवेति भावः ज-1.

इत्येव न्याय्यम्, शास्त्रे तत्रोपलम्भादन्यत्रानुपलम्भाच्च। अनवयवो हि काकादिरेकजातीयसम्बन्धेन गृहवृक्षादिषूपलभ्यते, नैवमयम्। एवं हि बहुव्रीहिरपि न्यायत एवोपपन्नः। अन्त्यादिशब्दे लक्षणा च न।

किञ्चानवयवत्वे ण श- क प्रत्ययादौ णादेरित्त्वानापत्तिः, प्रत्ययादित्वाभावात्। दध्नचश्चकारस्य वैयर्थ्यापत्तेश्च। इदं च 'तस्य लोपः' (1.3.9) इत्यत्र भाष्ये स्पष्टम्। तत्र ह्युक्तम् 'एकान्ता अनुबन्धाः' इत्येव न्यायमिति दिक्॥5॥

यथाभूतलं घटाभाववदित्यत्र[1] भूतल[2]वृत्यभावे प्रकार[3]तया भासमानस्य घटस्यालौकिकसंन्निकर्ष[4]जन्यज्ञानविषयत्वं तथेहापीति ध्येयम्[5]। स साक्षा[6]देव तत्र प्रतीतिरित्या[7]ग्रहः। णशकप्रत्ययादा[8]विति। कशणेति[9] पाठः। अत एवाग्रे**कादेरिति**[10] संगच्छते[11]। यद्वा ननु णशप्रत्ययादौ इत्वेऽसतिपाक्षिक

---

1. वहित्यत्र अ-4; विदित्यत्र ज-2.
2. भूतलवृत्य नोपलभ्यते अ-4.
3. प्रकाशस्तया अ-4.
4. पाठोऽयं ज-2, प-1; सनिकर्ष ज-1; संनिकर्ष अ-1, अ-3, ज-2; सन्निकार्ष अ-4.
5. बोध्येयम् अ-2; वोधेयम् अ-4.
6. साक्ष्यादेव ज-2; साक्षादेवव अ-4.
7. प्रत्तीत्तिरित्याह अ-2, अ-4.
8. प्रत्यायादाविति अ-2, अ-4.
9. केशणेति अ-3.
10. कादे इति अ-4.
11. संशोधित पाठ संगछते ज-1, ज-2, अ-1, अ-2, अ-3, अ-4, प-1.

नन्वेकान्तत्वेऽनेकाल्त्वादेव औशादीनां सर्वादेशत्वसिद्ध्या

श्याद्[1] व्यधेतिण प्रत्यय प्रापक[2] ददातिदधात्योर्विभाषेति[3] विभाषाग्रहणं[4] व्यर्थं[5] स्यात्।

असरुपप्रत्यय[6]त्वेनैव लाभात्[7]। पक्षेण प्रत्ययसिद्धेरेव[8] चेत्संज्ञा तेन[9] विभाषा[10] ग्रहणेन ज्ञाप्यते[11]। तत्फलन्तु छत्रादिभ्योण[12] इत्यादौ बोध्यमिति। चेत्तत्राह[13] क प्रत्ययादाविति। तद्गुण[14] संविज्ञानो[15] बहुब्रीहि:[16]। तेन क प्रत्यय नंदिग्रहीति[17] ल्युट्[18] चेत्यादिनां संग्रहो बोध्य:। तदेव विवृणोति

---

1. सं. पा.- श्याद्व्यथास्रुसंस्रवतोणवसावहलिहश्लिषश्वसश्च (3.1.101) अष्टा. श्याध्येधेति प-1; शाद्वाधते अ-3.
2. प्रायक ज-2, अ-3, अ-1; यापक अ-2.
3. सं. प. 'ददातिदधात्योर्विभाषा' (3.1.139) अष्टा.; दधात्यो विभाषेति प-1; दध्यात्योरिति विभाषा अ-2, अ-4.
4. ग्राहणम् अ-2.
5. व्यर्थ अ-3.
6. प्रत्ययेनैव प-1.
7. पाठोऽयं ज-1, ज-2, अ-1, अ-2, अ-3, अ-4; मातृकासु नोपलभ्यते.
8. शिद्धेरेवं अ-3.
9. संज्ञानेन अ-3.
10. विभाया अ-1.
11. ज्ञाथंते अ-3.
12. छत्रादिभ्यो ण: (4.4.62); छत्रादि स्रो ज-2, अ-1.
13. चेतत्राह प-1, अ-1, अ-3.
14. तद्धग ज-2.
15. संज्ञानो प-1; न ज्ञानो अ-3.
16. वहुव्रिहि प-1, अ-2.
17. नन्दिग्रहिपचादिभ्योल्युणिन्य च: (3.1.134) अष्टा.
18. ल्युट् च 3.3.115 अष्टा; ल्युर्ल्युठ ज-2, अ-1

'अनेकाल्' (1.1.55) सूत्रे शिदग्रहणं व्यर्थमत आह-

नानुबन्धकृतमनेकाल्त्वम्॥6॥

शिदग्रहणमेवैतज्ज्ञापकम्। तेन 'अर्वणस्तृ' (6.4.127) इत्यादेर्न सर्वादेशत्वम्। डादिविषये तु सर्वादेशत्वं विनानुबन्धत्वस्यैवाभावेनानुपूर्व्यात्सिद्धम्॥6॥

कादिरित्यादिना। व्यर्थतापत्तेश्चेति। ननु चकारेण स्वपूर्ववर्त्तिन्येव कार्यं[1] ज्ञाप्यते[2] नोत्तरत्रेति वुञ्छ[3]ण्केन दोष इति चेत्सत्यम्? गौरवं भाष्यविरोधश्च मुख्यं[4] दूषणं तन्मते बोध्यम्। तत्र गौरवं प्रदर्शितमेव[5] भाष्यविरोधं[6] दर्शयति। इदञ्चेति[7]॥5॥

डादिविषयेत्विति[8]। नन्वनुबंधत्व[9]योग्यकृतमनेकाल्त्व नेति परिभाषार्थस्यान्यत्र स्पष्टतया आनु[10]पूर्व्यात्सिद्ध[11]त्व कथन[12]मसंगतमिति चेत्सत्यम्।

---

1. कार्य अ-2, अ-4.
2 ज्ञाप्यते अ-4.
3. वुन्छण्कठ (12.2.80); वुछणकेन ज-2, अ-1, वुन्नकणकेन अ-2, अ-4; नुछणकेन अ-3.
4. मुख्य अ-4.
5. दर्शितमेव अ-2, अ-4.
6. विरोध अ-2.
7. इदन्चेति नाऽस्ति अ-2.
8. विषयेत्वेति प-1; विषयेस्त्विति अ-4.
9. नन्वतवधत्व अ-3; वषत्व प-1.
10. अनु प-1; आमु अ-4.
11. पाठोऽयं अ-1; पूर्व्यो सिद्ध त्व ज-1, ज-2, अ-2, अ-4; पूव्या प-1.
12. कथनम् नोपलभ्यते अ-2, अ-4.

दीक्षिता[1]नुरोधित्वात् अस्य ग्रन्थस्य। सर्वादेशनिर्वाहस्तु प्रश्लेषेण[2] बोध्य:[3]। अत एव तु:[4] प्रयुक्त: स्पष्टश्चायमर्थो[5]ऽनेकालिति सूत्रस्थ[6] भाष्य व्याख्याने परस्मै[7] पदानामित्यत्र विवरणे[8]शेखरे[9] जस:[10] शीत्यत्रा[11]पीतिध्येयम्। कैयटानु[12]यायिभिर्डाणलादि[13] विषये तु सर्वादेशत्वं विना[14]ऽनुबंधस्यै[15]वाभावे नानु[16]पूर्व्यात्सिद्धि[17]रित्युक्तं, तत्परास्तम्। यदपि शित्करणेनानुबंधामल्[18] व्यवहाराभावो ज्ञाप्यते इति स्थानिवत्सूत्रस्थ[19] शेखरमनुद्य अनुबंधविनिर्मुक्त[20]

---

1. दीक्षतानु अ–2.
2. प्रश्लेषण अ–1, अ–3.
3. बोध्यु: ज–2.
4. तु अ–4; अ एव तु: प–1.
5. अर्थे ज–2; अर्थोनेकालिति अ–2, अ–4.
6. सूत्रस्य ज–2.
7. परेस्मै अ–1.
8. विवरणो ज–2; विवरणे अ–4.
9. शखरे प–1.
10. पाठोऽयं प–1, अ–1, अ–3 जस: ज–1, 5ज–2; जश: अ–2, अ–4.
11. त्रापिति ध्ययां अ–1, अ–4; ध्येया अ–3.
12. कैय्यटा प–1.
13. डाणत्वादि अ–1, अ–3.
14. पाठोऽयं ज–1; विमानु ज–2, प–1, अ–1, अ–2, अ–4.
15. अनुबंधस्यैव भावेन अ–3.
16. नाऽस्ति तु अस्ति अ–3.
17. सिधि ज–2.
18. अनुबन्धानीमसुव्यवहारा भावो ज–2, अनुबन्धा मामल्यवहाराभावो अ–2, अ–4.
19. सूत्रस्य ज–2.
20. मुर्क्त ज–2.

पदार्थोपस्थितेः सर्व[1]संमतत्वेन[2] स्वयमपि तथैवानुदितत्वेन[3] दोषानवकाशादिति[4] दूषणावभा[5]समभिद[6]धुस्तन्मुधैव तस्य हलःश्नः इत्यादि सूत्रस्थ[7] भाष्य विरोध[8]हालाहल[9] संमिश्रितत्वात्[10]। तत्र हि शानचः[11] शित्वेनानुबंध-कार्ये[12]ऽनल्विधाविति प्रतिषेधः प्रवर्तते[13] इत्युक्ते सेर्ह्यपिच्चेत्यपि[14] त् ग्रहणस्य तातङो[15] ङित्वस्य च वैय[16]र्थरुपदूषणेशिद्[17] ग्रहणं प्रत्याख्यातम्। त्वदुक्तरीत्या अनुबंध विनिर्मुक्तस्यैव स्थानित्वेन[18] शंका-

1. उपस्थितेऽसर्व अ-2.
2. संसतत्वेन प-1; समंतत्वेन अ-2, अ-4.
3. 'न' नाऽस्ति प-1.
4. काशदिति ज-2.
5. दूषणावभावमभि अ-2, अ-3; दूषणावधाधमिति अ-4.
6. अभिद्धुः प-1.
7. हलःश्नः शानज्झौ (3.1.83) अष्टा., सूत्रस्य ज-2.
8. विरोधे अ-2, अ-4.
9. हालाहल प-1.
10. संमिश्रितत्वोत् ज-2.
11. शानचु अ-2; शानच् अ-2; शानच अ-4.
12. अनुबंधा ज-1.
13. प्रवेर्त प-1.
14. सं पा. 3.4.87 अष्टा.
15. तङानावात्मनेपदम् 1.4.100 अष्टा. तातङे ङितस्य च इति पाठः ज-2.
16. वैय्यर्थ्य ज-2, अ-2.
17. शि ग्रहणस्य.
18. स्थानिवत्वेवन प-1.

समाधानयोरसंगत्यापत्तिः। किञ्च क्ङिति चेति सूत्रेऽचिन[1] वादौ स्थानिवत्वेन ङित्वे गुणनिषेधमाशंक्य यासुटो ङित्वेन[2] ङिदादेशा ङित्तोनेत्युक्तम्[3]। अपि च रमा[4]यामित्यादौ ङेरन[5]वकाशत्वादामि स्थानिव त्वेन ङि [6]त्वाद्याड्जाय मानो न स्यात्। ननु च सर्वत्र[7] स्थानिनिष्ठस्य[8] धर्मस्यानेयमिति[9] चेत्त[10]त्रैवानल्विधाविति निषेधः स्यात्। विशेषणतया सर्वत्रालाश्रयणात्[11]। ज्ञापकेनाल्[12]त्वव्यवहारा[13]भाव बोधने[14] (तु न कश्चिद्दोषः। **नानुबन्धकृतमनेकाल्त्वमिति** ज्ञापयतीति भाष्येऽल्त्व व्यवहाराभावबोधन)[15] द्वारेति शेष इति न तद्विरोध इति शेखरे एव तद्विरोध[16] परिहारेण[17] न तद्भाष्य[18] विरोध इति दिक्[19]॥6॥

---

1. सूत्रेऽचिनवमित्यादौ अ-2, अ-4.
2. यासुटि ङित्वे प-1.
3. ङिदादेशोङिन्नेत्युक्तम् अ-2, अ-4.
4 स्मायामोत्यादौ अ-4.
5. ङेरनवकाशत्वाद्याट् जायमानो न स्यात्- इति पाठः प-1 मातृकायामुपलभ्यते; ङेदनवकाशत्वादामि अ-4; ङित्वाद्याट् अ-2, अ-4.
7. सर्व अ-4.
8. निष्टस्यु ज-2.
9. धर्मल्यानधनमिति ज-2; धर्मस्यानयनमिति प-1; धर्मस्याननयमिति अ-1, अ-3, धर्मस्थानेयमिति अ-4.
10. चेत्तत्रोवानल् प-1; चेतृतत्रैवानल् अ-1.
11. सर्वत्रालाश्रयणत् अ-4.
12. 'त्व' नाऽस्ति प-1.
13. व्यवहार ज-2.
14. पाठोऽयं ज-2, प-1, अ-1, अ-2, अ-3, अ-4 बोधन ज-1.
15. कोष्ठान्तर्गतपाठस्तु ज-1 मातृकायां नाऽवलोक्यते; पाठोऽयं ज-2, प-1, अ-1, अ-2, अ-3, अ-4.
16. तद्विरोधे अ-3; ताद्विरोध ज-2.
17. परिहारेणा ज-2.
18. तद्भार्ष्य ज-2.
19. शेखरे इत्यारभ्य विरोध इति दिक् यावत् प-1 मातृकायां पाठो नाऽवलोक्यते.

नन्वेवमप्यवदात मुखमित्यत्र पलोपोत्तरमात्त्वे कृते 'अदाप्' (1.1.20) इति घु संज्ञाप्रतिषेधो न स्यात्, दैपः पकारसत्त्वेऽनेजन्तत्वा-दात्वाप्राप्त्या पलोपोत्तरं पकाराभावेनास्य दाप्त्वाभावादत आह-

नानुबन्धकृतमनेजन्तत्वम्॥7॥

'उदीचां माङ' (3.4.19) इति निर्देशोऽस्या ज्ञापकः। 'आदे च उपदेशे' (6.1.45) इति सूत्रेणोपदिश्यमानस्यैजन्तस्यात्त्वं क्रियते ङकारसत्त्वे तु एजन्तत्वाभावादात्त्वाप्राप्तेस्तस्या सङ्गतिः। न चास्यामवस्थायां तस्य धातुत्वा भावात्कथमात्त्वम् (इति वाच्यम्) तत्र

उपदिश्यमानस्येति। उपदेशपदे कर्मणि धञिति[1] भावः। यत्तु केयटा[2]नुयायिनः परिभाषाया[3] अवतरणमाहुः[4]। अवदात[5] मुख[6]मित्यत्रोपदेशे एजंतानामात्वमुच्यमानमित्यादि। भाव घञन्तोपदेश[7] पदोल्लेखन[8] भाष्यविरोधभिक्षमंगी[9] चक्रुः करतले। तत्र टौकिते[10]त्यादावपि प्राप्नोतीति।

---

1. धाजिति अ-1, अ-2, अ-3, अ-4.
2. पाठोऽयं ज-2, अ-1, अ-2, अ-4; अनुर्यायिनः ज-1; अनुयायिभिनः प-1, कैटानुयायिनः अ-3.
3. परिभाषा अ-2, अ-4.
4. अवतरमहा अ-4.
5. अवदातुं अ-2; अवदात अ-1, अ-3.
6. मुखमित्रत्यत्रो प-1.
7. धजतो अ-1, अ-3.
8. उल्लेखनेन अ-2, अ-4.
9. त्तिक्षाम्रंणि प-1; निक्षमणो अ-3.
10. टौकिते ज-2; ढौकिते प-1, अ-1; दौकिते अ-2; सैकिते अ-4.

धातोः (6.1.8) इत्यस्य निवृत्तेरित्यन्यत्र विस्तरः। स्पष्टं चेदं 'दाधा ध्वदाप्' (1.1.20) इति सूत्रेभाष्ये॥7॥

नन्वेवमपि 'वाऽसरूपः' (3.1.94) इति सूत्रेण क-विषयेऽणोप्यापत्ति रित्यत आह-

नानुबन्धकृतमसारुप्यम्॥8॥

भाष्यमुपादाय पदा[1]कर्मसाधनस्तदा उपदेशेत्यस्य उपदिश्य[2] मानस्येत्यर्थः[3]। षष्ट्यर्थे सप्तमी तदा तु विशेष्योपादाना[4]त्तदन्तविधौ प्रकृते न दोषः। यदा[5]त्वन्यसाधनस्तदातदनु[6]पादानादुपदेशे य एच्[7] इत्यर्थे प्रकृते स्याद्दोष[8] कैयटः[9]। तत्र[10] धातोरित्यस्य निवृत्त्याढौकितादौ[11] दोषवारणा-यतत्स्वीकार[12] इत्याद्यादेच उपदेश इति शेखरे च स्पष्टम्॥7॥ **विकल्प-विधायकमिति**[13]। विकल्पार्थकविभाषाघटितं सूत्रमित्यर्थः। एवञ्च विभाषाग्रहणं ज्ञापकमिति[14] भावः॥

---

1. यदा प-1, ज-2.
2. उपदिश्यमास्यन त्यर्थः प-1.
3. पाठोऽयं प-1, अ-1, अ-2, अ-3, अ-4 षष्ठयथ्रे ज-1; षष्टार्थे ज-2.
4. विशिष्यापादाना त् प-1.
5. पदात्वन्य अ-1, अ-3.
6. तदतु अ-3; य एव च अ-1, अ-2; य इच् अ-4, प एच ज-2.
8. स्यादोष इति अ-4.
9. कयटः प-2.
10. तन्नधातोः ज-2; धातोः 6.1.62; एवमेव 3.1.91 अष्टा.
11. निवृत्पाठौकितादौ अ-2; निविृत्यादौ कितादौ ज-2; निवृत्यटौकितादौ अ-4.
12. ततवोकार अ-3; स्वीकारमात्रादेव उपदेश अ-2; स्वीकारपादे च उपदेश अ-4.
13. पाठोऽयं ज-2, अ-1, अ-3, अ-4 विधायमिति भावः 'इति पाठः' प-1 मातृकायामुपलभ्यते विधायके ज-1.
14. विकल्पार्थक इत्यारभ्य ज्ञापकमिति इत्यन्तं प-1 मातृकायां नोपलभ्यते.

'ददातिदधात्योर्विभाषा' (3.1.138) इति ण- बाधकशस्य विकल्पविधायकमस्या ज्ञापकम्। तेन गोद इत्यादौ नाणिति वाऽसरूपसूत्रे भाष्ये स्पष्टम्॥8॥

ननु संख्याग्रहणे बह्वादीनामेव ग्रहणं स्यात्, प्रकरणस्याभिधानियामकत्वसिद्धात् 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्यय' इति न्यायात्। अस्ति च प्रकृते बह्वादीनां संख्यासंज्ञा कृतेति ज्ञानरूपं

वाऽसरुप सूत्रे[1] **इति।** अत्र यदयपि शित् ग्रहणमांङ् निर्देश[2] विभाषा[3]ग्रहणैरनेकान्तत्व पक्षोपि[4] ज्ञापयितुं[5] शक्यस्तथापि अनेकत्रानेक[6] लक्षणादिप्रयुक्तगौरवेण भाष्यविरोधेन चोक्तार्थ ज्ञापकतैव[7] साध्विति[8] ध्येयम्[9]॥8॥

ननु कतीति[10] कृत्रिमासंख्यास्तीतित्यंत[11] प्रतिषेधोऽज्ञापक[12] **त्यन्ताशदन्ताचेति।** इति चेन्न[13]। अर्थवत[14]स्ति शब्दस्य ग्रहणेन च[15] तस्यैव

---

1. वासरूपसुत्रे इति ज-2; सं. पाठः 'वाऽसरूपोऽस्मियाम्' (3.1.94).
2. निद्र्देश अ-1, अ-3; निद्देश अ-4.
3. ग्रहनैः ज-2; ग्रहणौर अ-3.
4. पक्षौपि.
5. ज्ञापकमेव साध्विति 'इति पाठोपलभ्यते अ-1, अ-3', ज्ञापवितुं अ-3.
6. अनेकत्राते लक्षणादि अ-3; अनेकाभनेक प-1.
7. ज्ञाकतैव अ-1; ज्ञपयितुं शक्यः इत्यारभ्य ज्ञापकतैव इत्यन्तं नाऽस्ति अ-2, अ-4.
8. साध्विति ज-2.
9. ध्येयम् अ-1.
10. कताति अ-4.
11. त्यन अ-3.
12. पाठोऽयं प-1, प्रतिषेधोऽज्ञापक ज-1, ज-2, अ-1, अ-2, अ-3, अ-4.
13. चैत्र अ-1, अ-3.
14. अर्थवतस्शिब्दस्य ज-2; अर्थवतस्त शब्दस्य प-1.
15. 'च' नाऽस्ति प-1, ज-2, अ-1, अ-2, अ-3, अ-4.

प्रकरणम्। न तु लोकप्रसिद्धैकद्वयादीनाामित्यत आह-

उभयगतिरिह भवति॥9॥

इह शास्त्रे। संख्या अतिशदन्तायाः (5.1.22) इति निषेधोऽस्या ज्ञापकः। न हि कृत्रिमा संख्यात्यन्ता शदन्ता वास्ति।

तेन 'कर्त्तरिकर्मव्यतिहारे' (1.3.14) कण्वमेघेभ्यः करणे (3.1.17) 'विप्रतिषिद्धं चानधिकरण' (2.4.13) इत्यादौ लौकिक क्रिया द्रव्याद्यवगतिः। तत्र क्वोभयगतिः क्वाकृत्रिमस्यैव क्व कृत्रिमस्यैवेत्यत्रलक्ष्यानुसारिव्याख्यानमेव शरणम्। अत एवाम्रेडितशब्देन कृत्रिमस्यैव ग्रहणं न तु द्विस्त्रिर्घुष्टमात्रस्य। स्पष्टं चेदं संख्या संज्ञासूत्रे भाष्ये।

यत्तु संज्ञाशास्त्राणां मच्छास्त्रेऽनेन शब्देनैत एवेति नियमार्थत्वं

व्यावर्त्यत्वात्। अत एव भाष्येत्वदुक्तमाशंक्यार्थवत् ग्रहणेनानर्थकस्ये[1]त्यर्थवतस्ति [2]शब्दस्य ग्रहणमित्युक्तम्। नन्वेतद्[3]भाष्यमयुक्तम्[4]। तथाहि। ज्ञापकात्पूर्वं[5] सूत्रे संख्यापदेन कृत्रिम[6]संख्याग्रहणात् कृत्रिमत्यंतस्यैव ग्रहणं प्रसक्तं ना[7] कृत्रिमस्येति उभयोरनुपस्थित्या कथमर्थवत् परिभाषोपस्थितिरिति[8] चेन्न। अति[9]शदन्तायाः इत्यस्य संख्या विशेषणत्वेन विशिष्टवुद्धौ[10] विशेष्य[11]

---

1. कस्यैत्यर्थ अ-3.
2. अर्थवतस्मिंस्तिशब्दस्य अ-1; अर्थवतस्मिस्ति अ-3.
3. न चेतद्भाष्यम् अ-1, अ-3.
4. भाष्यमयुक्तं अ-4.
5. पूर्व अ-3.
6. कत्रिम अ-4.
7. 'वा' ज-2; नाकृतिमस्येति अ-3.
8. 'इति' नोपलभ्यते ज-1, प-1, अ-1.
9. प्रति ज-2.
10. वुध्रौ प-1.
11. विशेष अ-2.

कृत्रिमा कृत्रिमन्यायबीजमिति तत्र; तेषामगृहीतशक्तिग्राहकत्वेन विधित्वे सम्भवति नियमत्वायोगात्। 'सर्वे सर्वार्थवाचकाः' इत्यभ्युपगमोऽपि योगिदृष्ट्या, न त्वस्मदादिदृष्ट्या, विशिष्य सर्वशब्दार्थज्ञानस्याशक्यत्वात्। सामान्यज्ञानं तु न बोधोपयोगीत्यन्यत्र निरूपितम्।।9।।

नन्वध्येता शयितेत्यादाविङ्शीङोर्ङित्वाद्गुणनिषेधः स्यादत आह-

कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते।।10।।

ज्ञानासंवलितविशेषण ज्ञानस्य कारणतया तत् ज्ञानस्य पूर्वं संपाद्यत्वेन तदवस्थायां[1] [2]त्यंतांशे उभयोरुपस्थित्या[3] परिभाषा प्रवृत्ता[4]वर्थ वत्तिशब्दस्यैव ग्रहणे[5] पश्चाद्विशिष्ट ज्ञानेनानुपपत्तिरिति[6] प्रति[7]संधानेपि[8] ज्ञापकत्वस्य साम्राज्य[9]पदारुढत्वादिति ध्येयम्[10]। स्पष्टश्चायमर्थः कैयटविवरणयोः।

ननु अतिशदन्तग्रहणेनशास्त्रेऽकृत्रिमस्यैव[11] ग्रहणमिति विपरीतमेव कुतो न ज्ञाप्यत[12] इति चेन्न। बहुग[13]णेति सूत्र बाधापेक्षया उक्तार्थस्यैवोचित्त-

---

1. तदवस्थायो अ-1, अ-3; नदचस्यायाम् अ-4.
2. त्यताशे अ-3.
3. स्थिता अ-3.
4. वृत्तार्थवति अ-4; प्रवृत्तार्थविति अ-2; प्रवृत्तावर्थप्रति ज-2.
5. ग्रहणे नाऽवलोक्यते प-1.
6. पाठोऽयं अ-1, अ-3, अ-4.
7. 'रिति' नाऽस्ति ज-1, ज-2, इति नाऽस्ति अ-2; अनुपपत्तिरूढ इति पाठः प-1.
8. संधानपि प-1, सांम्राज्य ज-2; संभ्राज्य अ-3; साम्नाज्य अ-4.
10. बोध्यम् अ-4.
11. शास्त्रेऽकृत्रिग्रहणमिति इति पाठः प-1; शास्त्रोक्ति त्रिमस्यैव अ-; शास्त्रोक्ते त्रिमस्यैव अ-4.
12. ज्ञाप्यते प-1.
13. वद्गणैति प-1, बहुगणवतुडति संख्या 1.1.23

'स्थण्डिलाच्छयितरि' व्रते। (4.2.15) इति निर्देशोऽस्यां ज्ञापकः। उर्णुनविषतीत्यादिसिद्धये कार्यमनुभवन्निति। अत्र हि- 'द्विर्वचनेऽचि' (1.1.59) इति

नुशब्दस्य द्वित्वम्। अन्यथा 'सन्यङोः' (6.1.9) इत्यस्य षष्ठ्यन्तत्वात् सन्नन्तस्य कार्यित्वेन इसो द्वित्वनिमित्तत्वाभावात् तत्प्रवृत्तिर्न स्यात्। वस्तुतः समवायिकारणनिमित्तकारणयोर्भेदस्य सकल लोकतन्त्रप्रसिद्धतया तस्य तत्त्वेनाश्रयणाभावेन नैषा ज्ञापकसाध्या। अतएव हि प्रयुक्तः। सहि तत्त्वेनानाश्रयणे हेतोः प्रसिद्धत्वं द्योतयतीति तत्त्वम्। 'द्विर्वचनेऽचि' (1.1.59) इत्यत्र भाष्ये ध्वनितैषा॥10॥

त्वादितिध्येयम्। न बोधोपयो[1]गीति द्रव्य[2]त्वप्रकारक द्रव्यविशेष्यं सामान्यज्ञानं घटत्वप्रकार[3]कघट विशेष्यक विशेषज्ञानं[4] प्रति न कारण[5]मित्यर्थः। सामान्य[6]ज्ञानं तु सामान्यबोधोपयोगिभवत्येव एतेन[7] सामान्यज्ञानस्य बोधानु[8]पयोगित्वे जगत्[9]सकल कृत्स्नादि[10]भ्योपि बोधो[11] न स्यादिति दूषण[12] दत्तज[13]लाञ्ज-लित्वमापादितम्॥9॥

---

1. बोधोपणेगीति अ-1, अ-3.
2. द्रव्यंत्व अ-4.
3. प्रकारंकटविशेष्यक अ-4.
4. विशेष्यानं अ-2, अ-4.
5. कारकम् अ-2, अ-4; करणम् अ-3.
6. बोधोपयोगीति इत्यारभ्य ज्ञानन्तु सामान्य इत्यन्तं प-1 मातृकायां नोपलभ्यते.
7. ते एन प-1.
8. बाधानुपयोगित्वे ज-2, अ-3.
9. जगसकल प-1.
10. कृत्स्नादिन्योपि अ-4.
11. बोधे अ-2, अ-4.
12. दृषणं ज-4.
13. दत्तम् प-1.

ननुप्रणिदापयतीत्यादौ दारूपस्य विधीयमाना धुसंज्ञा दापेर्न स्यादत आह-

यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते॥11॥

अध्ये[1]ताशयितेति। तृजन्तमेतत्[2]। यत्तु केयटानुयायिभिः ननु दोधीवेव्योर्ङित्वात्क्ङिति[3] चेति सिद्धेतयोः[4] पृथक्[5] निषेधो व्यर्थोऽत[6] आहेति परिभाषावतारितात्तत्तुच्छम्[7]। भाष्ये दीधीवे[8]व्योर्निषेध[9]विषयेऽदीधे-ददीध युदाशराज्ञे[10] वृत्तास[11] इत्यादौ[12] गुणदर्शनेन छांद[13]सत्वेनैव तत्र निषेधाप्राप्तेर्वक्तव्यतया सूत्रमेव मास्तित्यर्थक[14] दीधीवेव्योरश्छन्दो विषय[15] त्वात् दृष्टा[16]नुविधित्वाच्च छंदस इत्युक्तत्वेन तद्विरोधपर्वत[17]पातेन तेन त्वदुक्तावतरणस्य चूर्णितत्वात्। सूत्रकाररीत्यापि न[18]।

---

1. अध्यता अ-1, अ-3.
2. लृजन्तमेतत् अ-4.
3. दोधोवेव्यार्डत्वात् प-1.
4. पाठोऽयं अ-1, अ-2, अ-3, अ-4, सिद्धतयोः ज-1, ज-2, प-1.
5. पृथकं ज-2.
6. व्यर्थोति ज-2, प-1.
7. अवतारितात्तुंछ ज-2; अवतारितातुछं प-1; अवतारिताततुच्दं अ-1, अ-3.
8. दोधोवोव्योनिषेध ज-2.
9. निषेधे अ-1, अ-3.
10. नुदीधेदधोधर्युदाशराज्ञे अ-2; उदीधेदधोधयुदीस राज्ञे अ-4.
11. नृतास अ-1; नृताम ज-2.
12. इत्यादौर्गुण अ-4.
13. छांदस इत्युक्तत्वेन तद्विरोध इति पाठोपलभ्यते अ-2, अ-4.
14. मास्त्वत्यर्थक प-1; सूत्रमेवास्त्वित्यर्थक अ-3.
15. दीघोवेषोछंदो ज-2.
16. दृष्टानुविधिताच्च ज-2.
17. पयर्तपातेन अ-1.
18. ना अ-4.

यमुद्दिश्यागामो विहितः स तद्गुणीभूतः शास्त्रेण तदवयवत्वेन बोधितोऽतस्तद्ग्रहणेन तद्ग्राहकेण शब्देन गृह्यते बोध्यत इत्यर्थः। तत्र तद्गुणीभूता इत्यंशो बीजकथनम्। लोकेऽपि देवदत्तस्याङ्गाधिक्ये

आदीध्यक इत्यादावनिग्ल[1]क्षणाचोञ्णितीति निषेधेन[2] चरितार्थत्वात्। स्पष्टश्चाय[3]मर्थः शब्दकौस्तु[4]भादौ स्थण्डिलाच्छयितरीति। ननु उर्णु[5] न विषतीत्यादाविस्[6] शब्दस्य निमित्तत्वेनाश्रय[7]णार्थं प्रशस्तकार्यिणः[8] निमित्तत्वं नास्तीत्यर्थो ज्ञापनीयः[9]। स च कार्यमनुभवन्नित्यादिना क्रोडीकृतः[10]। एवञ्च[11] धर्मिग्राहक[12] मानविरोधः। तथाहि। शयितरीत्यत्र प्रशस्तकार्यित्वं सार्वधातुकार्ध-धातुकयो[13]रित्यस्येगन्ताङ्गात्य[14]स्य गुण इत्यर्थे नेकारस्य[15]। न च तत्र ङित्वमस्ति तस्य समुदायानुबन्धत्वात्[16]। यश्चङिन्नासौ कार्यी[17]। न च प्रशस्तकार्यिघटिततयांगस्य तत्वम्।

---

1. अनिलक्षणा अ–4.
2. निषेधेन अ–2.
3. स्पष्टाश्चायमर्थ अ–1, अ–2, अ–3, अ–4.
4. कौस्तमादौ ज–2.
5. ऊर्णु ज–2, प–1, अ–1, अ–3.
6. 'हस' ज–2, अ–1, अ–2.
7. इत्यादाचित्सशब्दनिमितत्वेना इति पाठोपलभ्यते अ–4.
8. कार्यिणी प–1; कायिणेः अ–3.
9. ज्ञापनियः प–1.
10. क्रोदीकृतः ज–2.
11. 'च' नाऽस्ति अ–2, अ–4.
12. ग्राहमान प–1.
13. 7.3.84 अष्टा. धातुकार्द्ध ज–2, अ–4.
14. गन्ताङ्गात्परस्य प–1.
15. नकारस्या अ–4.
16. समुदायानुवेधत्वात् अ–1.
17. कार्यो अ–1, अ–3; कार्या अ–4.

तद्विशिष्टस्यैवदेवदत्तग्रहणेन ग्रहणं दृश्यते। यमुदिश्य विहित इत्युक्तेः प्रनिदारयतीत्यादौ न दारित्यस्य धुत्वम्। 'आने मुक्' (7.2.82) इति मुग्विधानसामार्थ्यादेषाऽनित्या। अन्यथा पचमानः इत्यादावकारस्य मुकि

उर्णु[1] न विषती[2]त्यादावपि समुदाय[3]स्थ तत्वेन दोष[4]स्योज्वलत्वात्[5]। न च तद्[6] घटितत्वेन तस्य तत्वेपि तद्घटकस्य तस्य[7] तत्वेनाश्रयणे बाध काभाव[8] इति वाच्यम्। परिभाषाया[9] कार्यी[10]निमित्त तयानाश्रीयत[11] इति। यथाश्रुतार्थकत्वे उर्णु[12] न विषती[13]त्यादौ सन्नन्तसमुदायस्य कार्यि[14]त्वेपि इस्[15] शब्दस्य कार्यित्वा[16]भावेन तस्य विना यत्न[17] निमित्तत्वे[18] –

---

1. ऊणु प-1; ऊर्णु अ-1, अ-2, अ-3, अ-4.
2. विशत्ति प-1.
3. समुदायस्य प-1, अ-1, अ-2, अ-3, अ-4.
4. दोषस्य पाठो नाऽवलोक्यते प-1.
5. सोज्वलत्वात् प-1.
6. द् नाऽस्ति अ-4.
7. तस्य नाऽस्ति अ-2, अ-4.
8. बाधकाभावादिति अ-2, अ-4.
9. परिभाषाया ज-2, प-1, अ-1, अ-4.
10. कार्यो अ-1, अ-3.
11. नाश्रीयत्त ज-2.
12. ऊर्णु ज-2, अ-1, अ-2, अ-3, अ-4.
13. विषयीत्यादौ ज-2.
14. कार्यत्वेपि ज-2.
15. इसूत्रो शब्दस्य अ-1; इसूत्राशब्दस्य अ-3.
16. कार्यत्वाभावेन प-1.
17. यत्रं अ-2; यत्नं अ-4.
18. निमितवो अ-3.

नाश्रयणेऽति[1]देश प्रवृत्तौ यत्नानर्थक्येन कार्यिघटकतया[2] तस्यापि। कार्यित्वे[3] एव यत्नस्य साफल्येनाऽत्रापि[4] विनिगमना विरहेण प्रशस्त कार्यिघटकतया[5] प्रशस्तकार्यित्वस्येस्[6] शब्देपि[7] सत्वेन[8] तस्यापि निमित्तत्वानापत्तौ[9] दोषास्योद्-भवत्वात्।

ननु प्रकृतेपि[10] यत्ने[11] परंपरया प्रशस्तकार्यिणो ग्रहणे यत्नानर्थक्येन साक्षात्प्रशस्त कर्मिणी ग्रहणेनेस्[12] शब्दस्य तत्वाभावेन निमित्तत्वे[13] नात्रयणम्। द्वितरव:[14] रुढमिति चेत्तर्हि तैनैव यत्नेन[15] प्रशस्त[16]कार्यिघटितत्वेन[17] समुदायस्य[18] निंबत्तर्वा[19]रुढतां कथं न[20] जानासि[21]। न चङित्वस्य

1. 'ऽ' नाऽस्ति अ-2, अ-4.
2. घटिकतया ज-2; घटतया अ-4.
3. कार्य्यत्वे अ-4.
4. 'ऽ' नाऽस्ति -2 अ-1, अ-3, अ-4.
5. घटिकतया अ-4.
6. कार्यि घटकत्वस्येस् अ-2, अ-4; प्रशस्तपित्वस्येस् अ-3.
7. शब्देन अ-2, अ-4.
8. सत्वे नोपलभ्यते अ-2, अ-4.
9. नायतो अ-3; उद्भटत्वात् अ-1, अ-2, अ-3, अ-4.
10. च कृतेपि ज-2, प-1, अ-1, अ-2, अ-3, अ-4.
11. 'इति' अप्यस्ति अ-4.
12. ग्रहणेनेस ज-2, अ-1, अ-3.
13. निमित्ते अ-2, अ-4.
14. सं. पा. द्वितर्वारूढमिति ज-1, द्युत्तर्वारूढमिति प-1, अ-2, अ-3 द्युतवीरूढमिति ज-2; युतवसिढमिति अ-4.
15. यत्नेत ज-1.
16. प्रकाश अ-4.
17. घटितेन ज-2, घटित्वेन प-1.
18. समुदायस्यो अ-2, अ-4.
19. निवंत विरूढतां प-1; निंवर्त्तर्वारूढतां अ-1; निंवर्तावारूढतां अ-3.
20. ना प-1.
21. जानामि ज-2.

स्वोपलक्षित[1] समुदायघटकत्वरूप परंपरया ईकारे[2] सत्वेन तस्य प्रशस्त[3] कार्यित्वेन च तस्य[4] दोष इति वाच्यम्। अत्रापि स्वघटित[5] समुदायघटक-त्वरूपपरम्परा सम्बन्धेन प्रशस्तकार्यित्वस्येस् शब्देपि सत्वेन दोषस्या शीविषायमानत्वात्। न च सर्वेसर्वपदादेशा इति न्यायेन शी इत्यस्य शे इत्यादेशे दोषस्य[6] गंगाजलावसेक इति वाच्यम्। उर्णु[7] न विषती[8]त्यादावपि तस्या विशिष्टे[9]नेसः कार्यितया निमित्तत्वानापत्तिः। न च[10] समुदायस्य तत्त्वेपि नावयवस्य तत्वम्। पूर्वोक्त द्वितीय[11] प्रदूषणोक्त[12]दिशादोषस्य जागरुकत्वेन[13] तस्य कुत्सितकर्दमह्रदोन्मज्जन[14]प्रसंगादिति चैन्न। सार्व धातुकार्धधातुकयोरित्यादाविक्। परिभाषा प्रवृत्तौ प्रथमांत[15]गुणपद श्रवण[16]मात्रस्य प्रयोजकतया तज्ज्ञाने[17] सर्वापेक्षया[18]न्तरंगत्वात्तदुपस्थितौ[19]वाक्यार्थ –

---

1. लाक्षित ज–2 रथोपलक्षित अ–2; सोपलक्षित अ–4.
2. इकारे प–1.
3. प्रशस्ता अ–2, अ–4; 'तस्य प्रशस्तकार्यित्वेन' पाठोनोपलभ्यते अ–2.
4. तस्य पाठोनाऽवलोक्यते अ–1, अ–3 तस्य न पाठोनोपलभ्यते अ–2, अ–4.
5. घटितस्य ज–2.
6. 'स्य' नोपलयते अ–2, अ–4.
7. ऊणु ज–2, प–1, अ–1, अ–2, अ–3, अ–4.
8. न षत्तो त्यादावपि प–1; विषयी त्यादावपि ज–2.
9. विसिष्टत्वनेसः प–1; विशेष्टेनेसः अ–4.
10. व अ–4.
11. द्वितीय ज–2.
12. दृषणोक्त ज–2, अ–1, अ–4; दृषणात्तू प–1.
13. 'जा' नाऽस्ति अ–4.
14. कुत्सित्वकदंह्रदोन्मज्रन अ–4; ह्रदोन्मज्जन अ–2.
15. गुपद प–1.
16. श्रवणा प–1.
17. तजज्ञाने प–1.
18. सर्वापेक्षायां प–1; सर्वानेक्षयां अ–4.
19. उपस्थिते ज–2.

बोधे जाते स्थान षष्ठीत्व निर्णये पश्चात् प्रसक्तालोन्त्य[1] परिभाषाया निषेधाश्च बलीयांस इति न्यायेन क्ङिति चेत्यस्योपस्थित्या निषेधेपर्युदासार्थकन ञोऽभावेन[2] वाक्यैकवाक्यतयाऽन्वयबोधे[3]तदवस्थायामंगे ङित्वस्य प्रशस्त-कार्यित्वस्य[4] च सत्वेन परिभाषोत्पत्तौ[5] पश्चादप्रतिबद्ध[6] प्रसरालोन्त्यपरिभाषा[7] प्रवृत्तावपि तस्याः पूर्वपरिभाषा व्याख्यात[8] भाष्यध्वनित[9] रीत्याऽप्रयोजकत्वेन ज्ञापक[10]त्वस्य मेरुशिखरारुढत्वात्। न चान्तरंगोपजीव्या[11]दपि निषेधस्य प्राबल्येनेक्। परिभाषायामन्तरंगत्व[12]स्योपजीव्य[13] त्वस्य च[14] सत्वेन तस्यापि प्रतिबन्धः[15] स्यात्। अत एव सवर्णसंज्ञाया[16] निषेधोपजीव्यत्वेपि[17] न तदंशे प्रवृत्तिरितिवाच्यम्। इक्[18] परिभाषा प्रवृत्तिमंत्तरागुण[19]स्येक्। लक्षणत्वाभावेन

---

1. प्रसक्तालोप प-1.
2. नजो ज-2, अ-3.
3. बोधेन अ-2, अ-4; बोधेत्तदवस्थायां प-1.
4. कार्येत्वस्य अ-2, अ-4.
5. परिषोत्पत्तौ प-1.
6. प्रतियद्ध प-1.
7. परिभाषा शब्दो नाऽस्ति अ-2, अ-4.
8. व्याख्यान ज-2, अ-2, अ-4.
9. धुनित ज-2.
10. ज्ञापकस्य ज-2, अ-1.
11. उपजीव्यत्वादपि अ-2, अ-4.
12. गत्वास्य अ-2, अ-4.
13. उपजीव्य त्वस्या अ-2, अ-4.
14. 'च' नाऽस्ति ज-2.
15. वंधा अ-2, अ-4.
16. अत एवर्ण अ-4.
17. जीव्यात्वेपि प-1.
18. एकू अ-3; यकू अ-2, अ-4.
19. गुणस्येक ज-2, अ-2, अ-4.

गुणोपजीव्यत्वेपि निषेधोपजीव्यत्वाभावेन च त्वदुक्त[1] दूषणस्याकिञ्चित्[2] करत्वात्। उर्णु[3] न विषतीत्यादौ तु सन्नन्ते[4] प्राप्त कार्यित्वस्या[5]प्रतिबद्ध[6] प्रसरेण अजादेर्द्वितीयस्येत्यनेना[7]वयवस्यैव प्रशस्तकार्यित्वपर्यवसानमिति[8] ध्येयं सुरिभिरिति[9] दिक्।

भाष्येध्वनितैषेति। तत्र हि सूत्रेण कार्यमति[10] दिश्यत[11] इति मनसि[12] निधाय चक्रतुरित्यादौ यणि[13] अनच्कत्वेन[14] द्‌वित्वाप्राप्तौ अनेन द्वित्वरूपकार्यातिदेशेपि अभ्यासेऽकारस्य[15] श्रवणं न स्यादिति दोषेऽज्[16] ग्रहणस्य रुपातिदेशे ज्ञापकत्वमुक्तम्[17]। अज्ग्रहण[18]व्यावर्त्य[19] जेध्री[20]यते

---

1. 'उक्त' नाऽस्ति अ-2; दुक्त नाऽस्ति अ-4; त्यदुक्त अ-3.
2. किंवित् अ-1, अ-3; किंचित्कारंत्वात् अ-4.
3. ऊर्णु ज-2, अ-1, अ-3, अ-4.
4. सन्नेते अ-4.
5. प्रत्यकायित्वस्या प-1.
6. प्रतिवध प-1, प्रतिबुद्ध अ-3.
7. द्वितीयस्यैवप्रशस्तकार्यित्व इति पाठोपलभ्यते अ-2, अ-4.
8. पर्यवज्ञानमिति प-1.
9. सुरिभिरिदिक् अ-4.
10. कार्षमिति अ-4.
11. 'दि' नाऽस्ति प-1.
12. मसिप-1.
13. याणि अ-2, अ-4.
14. षणि अ-3.
15. अनुक्तत्वेन अ-2; अनच्यूत्वेन अ-3; अनन्कात्वेन अ-4.
16. ऽज अ-2, अ-4.
17. उक्त अ-3.
18. ग्रहणस्य ज-2, अ-4; ग्रहस्य अ-2, अ-3.
19. व्यवर्त्य प-1.
20. जेप्रीयते अ-4.

अनया परिभाषया विशिष्टस्य सवर्णदीर्घे तद्वैयर्थ्यं स्पष्टमेव।

तेन दिदीय इत्यादौ यणादि न, जहार इत्यादौ 'आत औ णलः' (7.1.34) इति च न। न चाकारादेवर्णस्य वर्णान्तरमवयवः कथमिति वाच्यम्, वचनेनावयव त्वबोधनात्। तस्य चावयवत्व सादृश्ये पर्यवसानं बोध्यम्।

देध्यीयते[1] इत्यादि सति च कार्यातिदेशे[2] तत् व्यर्थमेव स्यादित्याशयः। एवञ्च कृतेपि अज् ग्रहणेऽरिषतीत्यादौ[3] गुणस्य इस् निमित्तक[4] स्थानिवद्भावेनेस् शब्दस्य या द्वित्वं दुर्निवारमेवेति[5]। कथमिष्टसिद्धिरुक्ता। किञ्चाज्[6] ग्रहणे सत्यसति[7] वा[8] उभयथाप्यत्र दोषसत्वेन[9] तत्परित्यज्य अन्योदाहरणध ावनमसंगत[10] स्यात्। तस्मांत्तेन[11] तत्सत्वमनुमीयते इति ध्येयम्[12]॥10॥

तद्गुणीभूतः इति। यत्तु कैयटानुयायिभिः प्रयोगसंपादने उपकारका इति कैयटोक्तार्थोक्तः स तु[13] प्रत्ययस्यापि[14] प्रकृत्युपकारकत्वात्तद्विशिष्ट

---

1. देध्योयते अ-1, अ-3.
2. देशेत् अ-3.
3. ग्रहणेऽरितिरिषतीत्यादौ अ-1, अ-3.
4. निमिक ज-2, प-1, अ-1, अ-3.
5. इवेति अ-4.
6. किज्वात् अ-4.
7. सत्यतिवा अ-1, अ-3.
8. 'वा' नाऽस्ति च अस्ति अ-2, अ-4.
9. दोषत्वेन तत् अ-2, अ-4.
10. धावनसंगतं अ-4.
11. तस्माप्तेन अ1, अ-3.
12. बोध्यम्।
13. सत्तु प-1, अ-1, सत्यु अ-2.
14. प्रत्ययस्यापे ज-2.

न चोक्तज्ञापकाद्वर्णग्रहणेऽस्या अप्रवृत्तिरिति वाच्यम्, 'आने मुक्' (7.2.82) इति सूत्रे भाष्येऽकारस्याङ्गावयवस्य मुगित्यर्थेपचमान इत्यत्र तास्यनुदात्तेत् (6.1.186) इति स्वरो न स्यादि त्याशङ्क्यादुपदेशभक्तस्तद्ग्रहणेन ग्रहीष्यत इत्युक्तेरसङ्गत्यापत्तेः।

किञ्चङमन्तपदावयवस्य ह्रस्वात्परस्य ङमो ङमुडि त्यर्थे कुर्वन्नास्त इत्यादौ ङमो ङमुडागमे णत्व प्राप्तिमाङ्क्य 'यदागमा' इति न्यायेनाद्यनस्यापि पदान्त ग्रहणेन ग्रहणात् 'पदान्तस्य' (8.4. 37) इति निषेध इत्यनया परिभाषया आगमानामागमिधर्मवैशिष्टयमपि बोध्यत हत्याशयक 'ङमुट्' (8.3.32) सूत्रस्थभाष्यासङ्कतेः।

किञ्च गुणादे रपरत्वे रेफविशिष्टे गुणत्वाद्येष्टव्यम्। अन्यथा ऋकारस्य गुणवृद्धी अरारावेवेति नियमो न स्यात्। तच्च वर्णग्रहणे

स्यापि ग्रहणापत्तेः। युक्तेस्तुल्यत्वादिति दूषणेन तत्रैव विवरणकारैर्दूषितत्वेन मूलोक्तार्थस्यैव प्रयुक्तत्वात्। एवञ्च स्वस्य[1] विवरणापर्यालोचनांधतमः प्रवेशो[2] बोधितः।

मुग्विधान[3] सामर्थ्यादिति। ननु मुग्विधानस्यश्रवणार्थतया[4] वक्तुं शक्यत्वेन तत्सामर्थ्यात्परिभाषाऽप्रवृत्तिः[5]? सुलभेति चेन्न। सामर्थ्य[6]कल्पना पेक्षया[7] ज्ञापकत्वस्यौचित्यादित्याशयः। तच्च[8] प्रमाणानां सामान्ये[9]

---

1. अस्य विवणी अ–2, अ–4.
2. प्रदेशो अ–4.
3. मुग् विधो सामर्थ्यादिति प–1.
4. श्रेवणार्थतया ज–2; श्रवणार्थत्ताया प–1; श्रवर्णार्थतया–अ–2.
5. ऽप्रवृत्तिऽसुलभेति अ–4.
6. सामथ्य प–1.
7. अपेक्ष्यया ज–2, कल्पेनापेक्षया प–1, कल्पनामेपेक्षया अ–3.
8. तच्चे अ–4.
9. समान्य अ–4.

एददप्रवृत्तौ न सङ्गच्छते। अत एव 'रदाभ्याम्' (2.42) इति सूत्रे भाष्ये गुणो भवति वृद्धिर्भवतीति रेफशिरा गुण वृद्धिसंज्ञकोऽभिनिर्वर्त्तते

पक्षपातात्सामान्यविषयकमेव। ननु पचआन[1] इत्यवस्थायां अकः सवर्ण[2] दीर्घ इति दीर्घे[3] प्राप्ते विशेष विहितेनातोङि्त[4] इतीयादेशे[5] न तद्बाधे तस्यापि मुकाऽपवादत्वात्[6] बाधेन[7] मुग् विधानस्य चरितार्थ्ये[8] कथमेतत्[9] परिभाषाया[10] अनित्यत्वे[11] ज्ञापकत्वम्? न च रमायामित्यादि सर्वथा[12] नवकाशस्थले[13] पुनरुत्सर्गप्रवृत्तिस्वीकारेण मुक्यपि परिभाषामवलंव्ये[14] यस्य प्रवृत्तिरव्याहतैवेति[15] वाच्यम्? सर्वथा[16] नवकाशस्थले तथांगीकारेपि[17] येन नेति[18] न्यायेन बाध स्थले-

---

1. अन प-1 ज्ञान अ-2.
2. पंचआन अ-4.
3. वर्णेदीघ प-1.
4. पाठोऽयं ज-2, प-1, अ-1, अ-2, अ-3, अ-4.
5. हिवितेन अ-2, अ-4.
6. ईयादर्शे अ-4.
7. पाठोऽयं ज-21, अ-1, अ-2, अ-3, अ-4; मुक्यऽपवादत्वात् ज-1; मुका अपदत्वात् प-1.
8. बोधेन ज-2.
9. चरित्तर्थे प-1.
10. न कथमेतत् अ-2, अ-4.
11. परिभाषाय अ-3.
12. अनित्वे ज-2, अ-1; अतित्वे अ-3. अनित्येत्वे अ-4; अनित्यवे प-1.
13. पाठोऽयं प-1, अ-1, अ-2 सर्वथा ज-1, सर्वथाऽनवकाश ज-2, ज-4; सर्वथानवकार अ-3.
14. स्थाले प-1; मुकपरिभाषा अवलंव्य अ-2; मुकपरिभाषावलंव्ये अ-4.
15. अव्याहैवेति प-1; अन्याहतैत्वेवेति अ-3.
16. सर्वस्थानवकाश अ-4.
17. तथांगोकरेपि अ-1, अ-3; तथांगोकारोपि अ-4.
18. ये न न नेति इति पाठः अ-2.

इति। अत एव 'नेटि' (7.2.4) 'णेरनिटि' (6.5.51) इत्यादि चरितार्थम्। अनागमकानां सागमका आदेश इत्यस्य त्वयमर्थः- आर्द्धधातुकस्येडागम इत्यर्थे ज्ञाते नित्येषु शब्देष्वागमविधानानुपपत्त्याऽर्थापत्तिमूलक वाक्यान्तरकल्पनेनेङ्हितबुद्धिप्रसङ्गे सेङ्बुद्धि कर्त्तव्येति। एवं चादेशोष्विवात्रापि बुद्धि विपरिणाम इति न

तथानंगीकारात्। न्यायेन हि कृते यत्र सावकाशत्वं तत्र बाधः द्विर्वचनादाविव[1]प्रकृतेपी[2]यादेशे सर्वेसर्व पदेति[3] न्यायेनानस्येयादेशे स्थानिवद्भावेन मुकश्चारितार्थ्येपि तस्य तेन बाधः[4]। यत्तु **आने मुगिति**[5] सूत्रे मुकि[6] इयादेशप्रवृत्तिं[7] परिभाषया[8]शंक्य वर्णग्रहणे यदागमा इत्यस्या प्रवृत्त्या[10] न दोष इति समाहितं विवरणे तत्तु[11] प्राचीनानुरोधीति दिक्।

न च तावत्तापि[12] सवर्णदीर्घो[13] दुर्वार ऐवति वाच्यं आनस्यनेति[14] न्यासे। **आतोङित**[15]। इत्यातोऽनुवृत्या आनस्यातोनेत्यर्थेन[16]–

1. 'व' नाऽस्ति अ-2, अ-4.
2. पाठोऽयं अ-1द्व अ-2, अ-3, अ-4; प्रकृतोपीयादेशे ज-2; प्रकृतेकृतेपि यादेशे प-1.
3. यदेति अ-1.
4. तस्येतेन अ-2, अ-4.
5. मुकिति प-1.
6. मुको इत्यादेश अ-2.
7. प्रवृत्ति अ-2, अ-4.
8. परिभाषामांशक्य अ-2, अ-4.
9. पदागमा ज-2.
10. प्राप्ता ज-2.
11. तत्तु अ-1.
12. तावपि ज-2.
13. सवर्णे अ-3.
14. आनस्येनेत्ति प-1; अनस्यनेति अ-2, अ-4; भानस्येनेति अ-3.
15. अष्टा 7.2.81. आतो ङित् अ-4; आतोङीत प-1.
16. नेत्यर्थे ज-2.

नित्यत्वहानिः। स्थानिवत्सूत्रे च नेदृशादेशग्रहणम्, साक्षादष्टाध्यायी बोधितस्थान्यादेशभावे चारितार्थ्यात्। किञ्चेवं सति स्थानिबुद्धयैवकार्यप्रवृत्त्या 'निर्दिश्यमानस्य' इति परिभाषया अप्राप्याडागमसहितस्य पिबाद्यादेशापत्त्या लावस्थायामडिति भाष्योक्तसिद्धान्तासङ्गतिः। स्थानिबद्भावविषये 'निर्दिश्यमानस्य' इति

आनेदीर्घ[1] आने[2] आ इति न्यासेन वा इयाऽप्रवृत्तौ[3] मुग्विधानस्य सवर्ण[4] दीर्घैकवाधकत्वादिति चेन्न। दत्तोत्तत्वात्।

ननु मुगागमस्यावर्णत्वेन ग्रहणे आनेऽचि आद्गुणे[5] ओकाररूप गुण सम्पादनेन चारितार्थ्यमिति[6] चेन्न। अवर्णत्ववत्[7] कंठ्यत्व[8]स्याप्यतिदेशे तत्प्रतिबंधात्[9]। गुणस्य सवर्ण[10]दीर्घ बाधाच्च[11]। एतेन कंठयत्वातिदेशेप्यम् इत्यस्य समुदायस्य तत्वेपि ऋकारैकदेश[12] रेफीयेषत्स्पृष्टप्रयत्नमादाय ऋकारस्येषत्स्पृष्टस्य[13] सिध्यावार्त्तिक द्वयमपि न कर्त्तव्यमित्युक्तरीत्या अत्रोप्येक[14]देशमकारसादृश्यमादायौ[15]कारो गुणो दुर्वार इत्यपास्तम्।

---

1. आने दोषः नोपलभ्यते ज-2, अ-1, अ-3.
2. आमे अ प-3.
3. इयाप्रवृत्तौ अ-2, अ-4.
4. सवर्णदीक ज-2; सर्वदीधैकत्वात् प-1.
5. आद्गुणः 6.178.
6. चरितार्थामति प-1.
7. अवर्णत्ववत्वंत् अ-2; अवर्णत्ववत्वं अ-4.
8. कंठयस्याप्यति प-1; कठत्वस्याप्यति अ-4; कंठत्वास्याप्यति अ-2.
9. प्रतिवधात् अ-4.
10. दीर्घेण ज-2, अ-3.
11. बाधत्वाच्च प-1.
12. देशे अ-3.
13. स्पृष्ट अ-2.
14. 'एक' नोपलभ्यते प-1.
15. पाठोऽयं ज-2 प-1, अ-1, अ-2, अ-3, अ-4 सादृश्यमायादौ ज-1.

परिभाषायाः प्रवृत्तौ तिसृणामित्यर्थ पर त्वात्तिस्रादेशे स्थानिबद्भावेन त्रयादेशमाशङ्क्य सकृद्गति न्यायेन समाधानपरभाष्यासङ्गतिः। 'एरुः' (3.4.86) इत्यादौ स्थानषष्ठीनिर्देशात्ततदन्तपरतया पठितवाक्यस्यैव समुदायादेशपरत्वेनादेशग्रहणसामर्थ्यात्तस्य स्थानिवत्सूत्रे ग्रहणेन न दोषः। आनुमानिकस्थान्यादेशभावकल्पनेऽपि श्रौतस्थान्यादेशभावस्य

ऐचोश्चोत्तर[1]भूयस्त्वादिवदत्र पूर्वभागस्य[2] बाहुल्येन तत्सादृश्यमादाय[3] आ इत्युत्तरभागमादाय वा[4] ओकारस्याप्राप्तेश्चेति दिक्। ननु मुग्विधानेन परिभाषाया अनि[5]त्यत्वेपि मुग्विषये[6] कुतो[7] न प्रवर्तते लक्ष्यानुरोधान्[8] मुग्विधानसामर्थ्याद्वेति समाधान[9]स्यान्ततोप्याश्रयणीय[10]तयान्तेरंडा विवाहश्चेदादावेव कुतो[11] न स[12] इति न्यायेन लक्ष्यानुरोधा[13]त्सामर्थ्याद्वा सवर्णदीर्घे[14] कर्त्तव्येमुग्विषयेऽ-प्रवृत्ति[15]रिति पूर्वमेव कुतो नोच्येत[16] इति चेत्सत्यम्।

1. ऐचौश्चोत्तर प-1.
2. भागस्थ प-1.
3. 'दा' नाऽस्ति प-1.
4. 'वा' नाऽस्ति ज-2.
5. अनित्यत्वेनापि मुहुषे कुतो न इति पाठोपलभ्यते अ-2, अ-4.
6. मुविषये प-1.
7. कुतो ज-2.
8. अनुरोधामुण् अ-2, अ-4.
9. समाधान प-1.
10. आश्रयणीयांते प-1; आश्रयाणीयतपांते अ-1, अ-2, अ-3, अ-4.
11. कृतो ज-2.
12. स् अ-4.
13. लक्ष्यानरोधात् अ-1, अ-3.
14. सवर्णे दीर्घ अ-3.
15. अप्रवृत्तैरिति प-1; ऽप्रकृतैरिति अ-1, ऽप्रव्यतैरिति अ-3; ऽप्रवर्तिरिति अ-2; ऽप्रवृत्तिपूर्वमेव इति पाठ, अ-4.
16. नोच्येत् प-1.

न त्याग इति 'अचः परस्मिन्' (1.1.57) इत्यादेर्नासङ्गतिः। एतेन 'यदाग मा' इति परिभाषा स्थानिवत्सूत्रेण गतार्थेत्यपास्तम्। एतत्सर्वं 'दाधा ध्वदाप्' (1.1.20) इति सूत्रे भाष्ये स्पष्टम्॥11॥ नन्वेवमुदस्थादित्यादौ 'उदः' स्थास्तम्भोः पूर्वस्य (8.4.61) इति पूर्वसवर्णापत्तिरत आह-

---

अत एवारूचेराह[1] तेनेति[2]। तच्छब्दस्य[3] बुद्धिस्थपरामर्शकतया वुग्युटाविति[4] वार्त्तिके युट् ग्रहणात्[5]परिभाषाया अनित्यत्वेनेत्यर्थः। युटिकृते तस्याभीया सिद्धत्वेन[6] यणि प्राप्ते तदभावाय[7] प्रवृत्तं वार्त्तिकमफलमेव स्यादिति भावः।

नन्वत्रापि युट् विधान सामर्थ्येनैव निर्वाहः। यद्[8] द्वयश्रवणानापत्तेः। न च यणोमय इति **वार्त्तिके** न तत्सिद्धिः[9]। अंतर्भूत निमित्तके[10] द्वित्वे तस्यासिद्धत्वात् ननु च त्रिपाद्यांत्तद प्रवृत्तिरिति चेद्यकारत्रय[11]श्रवणार्थं तर्हि तदित्यवेहि। न च यकार[12]द्वय विशिष्ट एव[13] युट् विधेयः।

---

1. अतएवाहचेराह अ-1, अ-4.
2. नेनेति अ-3.
3. 'स्य' नाऽस्ति प-1.
4. यटाविति प-1.
5. ग्रणात् अ-1, अ-3.
6. सिधत्वेन अ-1.
7. तदाभावाय ज-2.
8. सं. पा., यद्वय ज-1: ज-2, अ-1, अ-2, अ-3, अ-4.
9. तत्सि ज-2.
10. निमित्तनिमित्तके अ-1, अ-3.
11. चेत्यकारत्र य अ-2; चेयुकारत्रप अ-4.
12. युकार अ-4.
13. एक अ-3.

निर्दिश्यमानस्यादेशा भवन्ति॥12॥

'षष्ठी स्थाने योगा' (1.4.49) इति सूत्रमावर्त्तते। तत्र द्वितीयस्यायमर्थः- षष्ठयन्तं निर्दिश्यमानमुच्चार्यमाणमुच्चार्यमाण-सजातीयमेव निर्दिश्यमानावयवरूपमेव वा स्थानेन स्थाननिरूपित सम्बन्धेन युज्यते न तु प्रतीयमानमिति (अर्थः) तेनेदं सिद्धम्। न च

अर्ध[1]मात्रागौरवादिति संक्षेपः। ननु चात्रापि[2] पूर्ववदेव वार्त्तिकारंभ सामर्थ्यमिति चेत्तर्हि लक्ष्यानुरोध एव शरणम्। अनित्यत्वे ज्ञापिते क्व[3]नित्यत्यत्वमित्यस्य लक्ष्यानुरोधेनैव[4] निर्णेयत्वात्। लोकव्यवहारः उभयथापि दृश्यते। अतएवाधिक्ये[5] देवदत्तग्रहणेन ग्रहणमयं देवदत्त इति। देवदत्तस्यायमवयव[6] इति च। तथाच लोकत एव[7] तद् व्यवहारा[8]व्यवहारयोः सिध्या न तदंशे[9] ज्ञापकानुशरणं लोकसिद्ध्य[10]र्थानुवादकत्वं वास्तुः। अत एवात्रांशे भाष्य[11] प्रमाणत्वेन नील्लिखितमिति[12] दिक्। **अत एवाह। जहारे[13]त्यादो चेति।** चेन-

---

1. अर्द्धमात्र ज-2.
2. ननुत्रापि प-1.
3. क्वा ज-2; क्वनित्यत्वं क्वानित्यत्वमित्यस्य इति पाठोपलभ्यते प-1.
4. नैव ज-2.
5. एवाणाधिक्ये अ-1, अ-3.
6. देवदत्तल्यायमवय ज-2.
7. एवात्रांशे भाष्य प्रमाणत्वेन इति पाठोपलभ्यते अ-1, अ-3.
8. तद्व्यवहारायोः ज-2.
9. नदत्तंशे अ-4.
10. सिध्येर्थानु ज-2; सिद्धार्थानु प-1 अ-1, अ-4.
11. भाष्य अ-2, अ-4.
12. नोल्लिख्तिामिति अ-2, अ-4; लोकत एवात्रांशे भाष्यं प्रमाणत्वेन इति पाठोपलभ्यते अ-1.
13. जाहारेत्यादौ अ-3.

लक्ष्या[1]नुसारोऽत्रसूचित:। धातो रधिकारा[2]भावेन यद्विनेति[3] न्यायाप्रसरा-दाक्षेपस्यापि कर्त्तुमशक्यत्वेवात:[4] परस्यणल[5] औकार[6] इत्यर्थे आकार-मुद्दिश्यरेफस्य विधानेनानया तद्विशिष्टस्य ग्रहणे आदेशापत्ति:। **प्रनिदारय-तीत्यादौ**[7] तु घु संज्ञोद्देश्यदामुद्दिश्य[8] रेफस्या विधानान्न दोष इति भाव:। ननु किं विशेषणतया यत्र वर्णग्रहणं तत्र नेत्यर्थ उत विशेष्यतया वा[9] यत्र वर्णग्रहणं तत्र नेत्यर्थस्तव विवक्षित इति विकल्पनाद्य[10] इत्याह। आने[11] मुगिति। नांत्योपीत्याह। किं च ङमन्तेति? ननु आवृत्यादिकरण[12] गौरवेणास्य भाष्य[13]स्यैकदेश्युक्तित्वेन मिदचोऽन्त्यात्परेति[14] सूत्रस्थमित:[15]। परादिवद्भावे द्विषत्[16] शब्दोपपदात्[17] तपे: खशि-

---

1. लक्षानुसारो ज-2, अ-1.
2. अधिकाभावेन अ-2, अ-4; अधिकाभवे प-1.
3. भावेनर्याद्विनेति ज-2, अ-1, अ-3.
4. अशक्यतवेनात: ज-2, अ-1ख अ-3; अशक्यत्वे चाद्रत: अ-2; अशक्यत्वेचाटत: अ-4.
5. परस्ययणल अ-2, अ-4.
6. औकारमुद्दिश्यरेफस्य इति पाठोपलभ्यते अ-2, अ-4.
7. प्रनिदारयतेत्यादौ, प-1; प्रनिदारयति तादौक संज्ञोद्देश्य अ-4.
8. दामुदिश्य ज-2, अ-3.
9. 'क' ज-2.
10. विकृ त्यनाद्य ज-2; कल्प्यनाद्य अ-1; विकल्पनाय अ-2; कल्यानाद्य अ-3.
11. आनेनुणीति अ-4.
12. करणं अ-2.
13. भाष्यैक प-1.
14. मिदचोऽन्त्यात्पर: 1.1.47
15. मिति अ-3; मित्त: ज-1, प-1.
16. द्विशत् अ-2, अ-4.
17. उपपदा तपे: अ-3.

द्विषच्छब्दात्तकारात्पूर्वं मुमि मोऽनुस्वारो[1]ऽपदान्त[2]त्वान्न प्राप्नोति इति भाष्यविरोधेन परिभाषाया अर्थान्तरस्य कर्त्तुमशक्यत्वेन च कुर्वन्नास्त। इत्यादौ णस्य दुर्वारतया तथा भाष्योपष्टंभकतानुचितेत्यरूचेराह[3]। किंचेति। एतेन[4] मूलोक्त परिभाषार्थमनुद्य[5] द्विषन्तप इति भाष्य[6] विरोधमुद्भावयत:[7] कैयटानुयायिन[8] समाहिता:[9] वस्तुतस्तु द्विषंतपे[10] तकारस्य संयोगान्तलोपे एकदेशविकृतन्यायेन पदान्ततयानुस्वार: सिद्ध एवेति भाष्यमेक देश्युक्तिरेव। स्पष्टश्चायमर्थो विवरणे इति दिक्[11]।

रदाभ्यामितीति। तत्र हि कृ[12] धातो: क्ते[13] तस्मादित्रि[14]–

वृद्धौ रेफा[15]त्परत्वेन तकारे नत्वमाशंक्यवृद्धिर्निमित्तं यस्य[16] तस्मात्परस्य प्रतिषेध[17] इत्यर्थकेन वृद्धिनिमित्तात्प्रतिषेध[18] इति वार्त्तिकेन समाहितम्।

---

1. संशोधित पाठ: 8.3.23 अष्टा., मोनुस्वारो अ–2, अ–4.
2. तदान्तत्वात्र प–1.
3. रूचेराह्न ज–2.
4. एते प–1; एतेना अ–3.
5. अरूद्य अ–1, अद्यहि अ–3.
6. भाष्या ज–2.
7. भावयन्त: ज–2.
8. पाठोऽयं ज–2, प–1, अ–1, अ–2, अ–3, अ–4, कयटानुयायिन: ज–1.
9. समाहित: अ–4.
10. द्विषयंतपे अ–4.
11. स्पष्टश्चायं विवरण इति पाठोपलभ्यते प–1.
12. क अ–3.
13. धातोक्ते प–1.
14. तस्मादिनि अ–1, अ–3; तस्मादितिनि अ–2, अ–4.
15. रफात् प–1; रेफात्यत्बेन अ–1, अ–, ज–2.
16. पश्य अ–1, अ–3
17. प्रतिषेध इति वार्त्तिकेन समाहितं इति पाठोपलभ्यते अ–2, अ–4.
18. पाठोऽयं ज–2, प–1, अ–1, अ–2, अ–3, अ–4 निमित्ताप्रतिषेध: ज–1.

'अस्य चौ' (7.4.32) इत्यादौ दीर्घणामादेशानापत्तिः, तेषां निर्दिश्यमान त्वाभावादिति वाच्यम्, जातिपक्षे दोषाभावात्। किञ्च न भूसुधियोः (6.4.85) इति निषेधेन ग्रहणक शास्त्रगृहीतानां निर्दिश्यमानकार्यबोध नात्र दोषः। इयङुवङोङित्त्वं त्विवर्णोवर्णान्तधातुश्नुभ्रुवामित्यर्थेन धात्वादीनामपि निर्दष्टत्वादन्त्यादेशत्वाय। रीङ्रिङोङित्त्वं तु स्पष्टार्थमेव। एतेनेदं ङित्त्वं वर्णग्रहणे निदिश्यमानपरिभाषाया अप्रवृत्तिज्ञापकमित्य-पास्तम्, 'हयवरट्' सूत्रस्थेन अयोगवाहानामुपदेशेऽलोऽन्त्यविधिः प्रयोजनम्- वृक्षस्तत्रः, नैतदस्ति प्रयोजनं निर्दिश्यमानस्येत्येव सिद्धम् 'इति भाष्येण विरोधात्। अनया परिभाषया येन विधिः' (1.1.72)

रेफस्य वृद्धिनिमित्तत्व[1] प्रदर्शनाय तत्र तथोक्तम्। ननु रेफे परिभाषया वृद्धिनिमित्तत्व प्रदर्शनाय तत्र तथोक्तम्। ननु रेफे परिभाषया वृद्धित्वादेरतिदेशेपि प्रत्येकं[2] तत्पर्याप्त्या समुदाये तत्वा[3]भावेन विशिष्टे वृद्ध्या[4]दिव्यवहार पर[5]भाष्यासंगतेरिति[6] चेन्न। तदग्रहणेनेत्यस्य[7] तद् ग्राह[8]केनेत्यर्थ करणे न मूल कृतैव[9] तद्दोषवारणात्॥11॥

पूर्वसवर्णापत्तिरिति। ननु यमुदिश्येत्यर्थस्य पूर्वं[10] व्यवस्थापितत्वे नाडागम विधायकेंगस्योद्देश्यत्वेनांगस्यानयाति[11]देशेपि-

---

1. पाठोऽयं ज-2, प-1, अ-1, अ-2, अ-3, अ-4 निमित्त ज-1.
2. प्रत्येकं अ-1, अ-3 प्रत्येक अ-2, अ-4.
3. समुदायैतत्वा अ-2, अ-7.
4. वृधाति ज-2.
5. 'पर' नाऽस्ति अ-2, अ-4; परिभाषासंगतेरिति प-1.
6. संगतिरिति ज-2.
7. नेत्यर्थ प-1; ग्रहणेनत्यस्य अ-1.
8. ग्रहके अ-3.
9. कतैव अ-3.
10. पूर्वे ज-2.
11. गत्वस्यानयाति; न पात्ति ज-2; अनुयातिदेशेपि अ-2, अ-4; अनयानिदेशेपि अ-3.

इति सूत्रबोधिततदन्तस्य स्थानित्वाभावबोधनं 'यदागमाः' इति लब्धस्य च। तेन सुपदः, उदस्थादित्यादिसिद्धिः।

अनया च स्वस्वनिमित्तसन्निधापितानाम् 'अलोऽन्त्यस्य' (1.1.52) इत्यादीनां समावेश एव, न बाध्यबाधकभावः, विरोधाभावात्। नाप्येतयोरङ्गाङ्गिभावः, उभयोरपि परार्थत्वेन तदयोगात्। 'अनेकाल् शित्' (1.1.55) इति सूत्रे सर्वश्चैतत्परिभाषाबोधित एव गृह्यते।

स्थात्व[1]स्यानतिदेशेन[2] कथं तदापत्तिरिति चेन्न? उद्देश्य[3]तावच्छेदक धर्म[4]स्यैवानयातिदेशेतकारथकारयोर्विधीयमान सुटित[5]त्वादेरतिदेशेपि आर्ध[6]धातु-कत्वस्यानतिदेशे इडागमानापत्या उद्देश्यतावच्छेद[7]कीभूत[8] धर्मसमानाधि करणयावद् धर्माणां अतिदेशस्य कार्यार्थतया कार्यप्रयोजकानां सर्वेषामतिदेशेन स्थात्वस्याप्यति देशे[9] तदापत्तेर्दुर्धरत्वात्। किञ्च **न भूसुधियोरितीति**[10]। इदञ्च व्यक्तिपक्षे बोध्यम्[11]। न चान[12]वकाशयालोन्त्य परिभाषया[13]–

---

1. स्थात्व नाऽस्ति अ–2. अ–4.
2. अतिदेशेनतिदेशेन कथं इति पाठः प–1.
3. उद्देशताया प–1.
4. धर्मस्यवानया अ–2, अ–4.
5. सुहितत्वादेशेपि अ–2, अ–4.
6. आर्द्ध ज–2.
7. तावछेऽदको अ–3.
8. आर्धधातुक त्वस्याऽवतिदेश न कथं तदापत्तिरिति चेन्न उद्देश्यतावद्देदकीभूत इति पाठोपलभ्यते अ–2, अ–4.
9. देशे तु इति पाठः प–1.
10. 'इति' नाऽस्ति प–1, अ–2, अ–4.
11. बाध्यम् प–1.
12. 'व' नाऽस्ति अ–3.
13. परिभाष्यषय अ–3; परिभाषाषया अ–1.

यत्तु 'आदेः परस्य' (1.1.54) अलोऽन्त्यस्य (1.1.52) इत्येतावेव तद्वाधकाविति तन्नः 'उदः स्था' इतिसूत्रविषयेऽस्याः 'पादः पत्' (6.4.130) इति सूत्रे भाष्ये सञ्चारितत्वात्। नाप्येतयोरियं बाधिका,

---

अस्याबाधेना[1]स्यच्वा[2]वित्यादौ ग्रहणकशास्त्रेण सर्वेषामपि स्थानित्वे[3] इष्टसिद्धिरिति वाच्यम्। आदेः परस्येति[4] परिभाषा[5] बाध्यालोन्त्यस्येत्यनेन[6] निदि्र्दश्यमान[7] परिभाषाया[8] बाधे आदेः[9] परस्येत्यने[10]नावश्यं निर्दिश्यमान[11] परिभाषाया बाधेन उदस्था[12] दित्यादौ दोषस्योज्वलत्वात्। न चोदस्थादित्यादौ यदागमा इति प्राप्त विशिष्ट[13] स्थानित्वस्य निर्दिश्यमान परिभाषया बाधे स्था इत्यस्यैव स्थानित्व[14] प्राप्त्यादेरिति[15] परिभाषया तस्यापि[16] बाधके[17] दोष इति वाच्यम्। पूर्वप्राप्त यदागमेति[18] परिभाषया प्राप्त स्थानित्वस्यैवाऽनया बाधे कर्त्तव्ये तदपवादकपरिभाषा[19]बाध-

---

1. बाधोस्य ज-2.
2. च्चावित्यादौ अ-2, अ-3, च्चवित्यादौ अ-4; च्चावित्यादो अ-1.
3. स्थानिवत्वे प-1; स्थानित्व अ-2.
4. आदेः परस्य 1.1.54; परस्येति अ-3; अदेः परस्य प-1.
5. परिभाषया अ-2; परिभाषया अ-4.
6. अलोन्त्यस्यै अ-3.
7. निर्दिश्यमान ज-2.
8. परिभाषायां प-1.
9. आदेशः अ-1, अ-3.
10. परस्यै अ-3.
11. निदि्र्दश्यमान अ-2, अ-3.
12. उदस्यादित्यादौ अ-1, अ-2, अ-3, अ-4.
13. विशिष्टस्यानित्यत्वे निर्दिश्यमान परिभाषाया इति पाठोपलभ्यते अ-2, अ-4.
14. स्थानिवत्व ज-2; प्राप्त्याऽदेरिति ज-2.
16. अस्यापि अ-2, अ-4.
17. बाधेकवदोष ज-2, अ-3, अ-4.
18. 'इति' नाऽस्ति अ-4.
19. परिभाषया ज-2.

एतयो र्निर्विषयत्वप्रसङ्गादितिति विंशतेः (6.4.142) इति सूत्रे कैयटः। अकज्विषये तु नायं न्यायः स्थानिवद्भावेनेव तन्मध्यपतित न्यायेन तद्बुद्धयैव कार्यजननात्।

---

[1]पर्यन्तानुधावनस्य निर्वीजत्वात्। किञ्च तद्वाध्यत्ववदेत्तत्[2] बाध्य-बाध्य[3]त्वस्यापि वक्तुं शक्यत्वाच्च। न च विरोधाभावेन तस्याः कथं बाध इति वाच्यम्। निर्दिश्यमान[4] स्थास्त[5]म्भोरादेः[6] पूर्वसवर्ण इति वाक्यभेद-निर्मोकेनाविरोधस्यात्रापि त्वयापर्यालोचनीयत्वात्[7]। इदमेवाग्रे[8] समावेश व्याख्यावसरे[9] स्फुटी[10] भविष्यति **न च यदागमा**[11] इति प्राप्त स्थानित्व-स्याप्यनया बाध इति वाच्यम्। नन्वेवं उद[12]स्थादित्यादाबुदस्थास्तंभो[13]रिति पूर्व सवर्णापत्तिरत आहेति[14] त्वदीय परिभाषा[15]वतरणस्य दत्तजलाञ्जलि[16]त्व-पात्तात्। एतेन न भू सुधियोरिति ग्रंथमनूद्य रीङ[17]रिङोरित्यादि ग्रंथमनूद्यानया चेत्यादि संचारितदित्यन्तं[18]-

---

1. पर्यताधावनस्य अ-3; पर्यतावाधनस्य अ-4; पर्य्यतानु ज-2.
2. वदेतत् अ-1, वदेतद्बाध्य अ-4.
3. बाध्येत्वस्यापि अ-4.
4. निर्दिश्यमान ज-2, अ-2.
5. स्थ अ-4.
6. स्तम्भारादेः ज-2.
7. लोचननीयत्वात् ज-2, प-1, अ-1, अ-3.
8. इदमग्रे प-1.
9. अवसरे स्फुओ इत्यारभ्य इति वाच्यम् इत्यन्तं नोपलभ्यते अ-2, अ-4.
10. स्फटो ज-2, स्फुटि प-1.
11. यदगमा ज-2, पदागमा प-1.
12. उत् प-1. उदः स्थास्तम्भोः पूर्वस्य 8.4.61, स्तंभारिति अ-4.
14. ग्राहेति ज-2.
15. परिभाषायातरणस्य अ-2, अ-4.
16. जलान्जलीलत्व प-1.
17. रीङ् रीङो ज-2.
18. संचारित्तत्वादित्य तं प-1; संचारित्यंतं अ-2, अ-4; संचारितदित्यनं अ-3.

इयं चावयवषष्ठीविषयेपि। अतएव 'तदोः सः सौ' (7.2.106) इति सत्त्वम् अतिस्य इत्यत्र उपसर्गतकारस्य न। निर्दिश्यमानयुष्मदाद्यवयवमपर्यन्तस्यैव यूयादयो न त्वतियूयमित्यादौ सोपसर्गावयवमर्यन्तस्येति बोध्यम्। 'पादः पत्' (6.4.130) इति सूत्रे

समावेश ग्रन्थमनूद्य[1] चानवकाशत्वेन दूषयित्वाऽनव्यतराणा[2] प्रदीप निर्वापक-फुत्कारप्रशमितो वेदितव्य[3] इति वदन्तः कैय्यटानुचरा:[4] प्रदीपनिर्वाप[5]क-फुत्कारनिसृत[6]दूषणरजः कणपूरितनयना[7] आन्ध्य[8] प्रापिता इति ध्येयम्।

निर्दिष्टत्वादिति। ननु ये न विधिरिति[9] परिभाषया[10] तदन्तविधौ प्राप्तथानित्वस्य यदागमा इति न्यायेन प्राप्त स्थानित्वस्य[11] चाभावो बोध्यते[12] इति[13] वक्ष्यमागेन ग्रंथेन एतद्रीत्यारीङादावपि[14] ङित्वस्य साफल्यात्तद् वैयर्थ्यप्रतिपादक[15] ग्रंथे नातिस्यमित्यादावपि तद्वयस्य सत्वाभावप्रतिपादक

---

1. अनूद्यं अ-1.
2. ऽनेव्यत्त एणां अ-1, अ-2; नव्यतराणां प-1.
3. चेदितव्य अ-1, अ-3.
4. कैय्यय्यटानुचर्रो: अ-1, अ-3; कैयटानुचरः अ-4.
5. निर्वायक अ-1, अ-3.
6. निसृष्टा अ-2.
7. र:जकरणपूरितनयनोः अ-2, अ-4.
8. अध्यं प-1, अ-1, अ-3; आंध्यांशयता अ-2; आंध्यां प्रापिताः अ-4; 1-1/1/72 अष्टा.
10. 'परि' नाऽस्ति ज-2, अ-1.
11. स्थानिवत्वस्य प-1, अ-2.
12. बोध्यत ज-2, प-1, अ-1, अ-3; वोध्यमाणे अ-4.
13. 'इति' अप्यस्ति प-1.
14. रोङादायपि अ-4; रीङादावापि प-1.
15. प्रतिपादकेन अ-4.

'षष्ठी स्थाने' (1.1.49) इति सूत्रे च भाष्ये स्पष्टैषा॥12॥

ननु चेतेत्यादौ ह्रस्वस्येकारस्य प्रमाणत आन्तर्यादकारोऽपि

ग्रंथेन च विरुद्धमिति[1] चिन्त्यमिदमिति चेन्न[2]। अनुवृत्तस्य[3] येनेति सूत्रेण तदन्तविधौ विशिष्टस्य प्राप्तस्थानि[4]त्वाभावबोधने न ग्रंथस्योज्जीवनात्।

किञ्चजस्त्वाद्यंशे[5] ङित्वस्य चारितार्थ्याच्च। न च परिभाषाया[6] यथा श्रुतेऽर्थेऽतिस्य[7] इत्यादौ तद्वयस्यापि[8] निर्दिश्यमानत्वेन[9] प्राप्तस त्ववारणायार्थान्तर स्वीकारेणानुवृत्तात्पदादिति[10] पदस्यापि[11] निर्दिश्यमानत्व[12] स्वीकारवत् रिङादिविधौ विशिष्टस्य[13] स्थानित्वेपि केवल त्यदादेरपि-

---

1. विरुद्धत्व चिंत्यमिदमिति प-1, अ-2.
2. चेत्त अ-3.
3. अणुवृत्तस्य ज-2; अवृत्तस्य प-1.
4. स्थानिवत्वाभाबोधनेन प-1.
5. किंचाद्यंशे प-1; किंचश्वाद्यंशे अ-1; किंचश्चाद्यंशे अ-2, अ-3; किंचश्चाद्यंशे अ-4, ज-2.
6. परिभाषया अ-2, अ-4.
7. श्रुतेर्थेतिस्म अ-2, अ-4.
8. तद्वयस्यपि अ-2.
9. निदि्र्दश्यमानत्वेन ज-2, प-1.
10. अनुवृत्तत् ज-2, प-1, अ-1, अ-2, अ-3, अ-4.
11. पादस्यापि अ-3.
12. निर्दिश्यमानत्व ज-2, अ-3; निदि्र्दश्यनत्व प-1; निर्दिश्यमानस्वोत्वकारवत् अ-2, अ-4.
13. विशिष्टस्य स्थानित्वेपि इत्यारभ्य रिङादि विधौ इत्यन्तं नोपल भ्यते अ-2, अ-4; रिङाविधावपि अनुवृत्तंगस्येत्यस्य तत्रं दुर्वारमिति वाच्यम्। सत्त्वविधात्पदा-देरनुवृत्यातदंत विधौ विशिष्टस्य इति पाठस्तु प-1 मातृकायां एव लभ्यते.

स्यादत आह-

यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तयर्म्बलीयः॥13॥

अनेकविधं स्थानार्थगुणप्रमाणकृतम्। अत्र मानम्- 'षष्ठी स्थाने' (21.1.49) इत्यत एकदेशानुवृत्त्या स्थाने-ग्रहणेऽनुवर्त्तमाने पुनः 'स्थानेऽन्तरतमः' (1.1.50) इति सूत्रे स्थाने-ग्रहणमेव। तद्धि तृतीयया विपरिणम्य वाक्यभेदेन स्थानिनः प्रसङ्गे जायमानः सति सम्भवे स्थानत एवान्तरतम इत्यर्थकम्। तमब्ग्रहणमेवानेकविधान्तर्यसत्तागमकम्।

स्थानित्वस्य संभवेन परिभाषा विषयाद्विशिष्टस्य[1] सत्त्वाप्रवृत्तावपि रिङादिविधौ तु अनुवृत्तांगादित्यस्य केवलस्य स्थानि[2]त्वेऽतिप्रसंगादवश्याश्रयि तव्ये तदन्त विधौ[3] परिभाषा प्रवृत्या[4] निद्र्दिश्य[5]मानस्यैवादेश सिद्धौ[6] ङित्वस्य[7] वैयर्थ्यात्[8]। एवं च निद्र्दिश्यमान[9] इत्यस्य साक्षादनुवृत्या[10]-

वा निर्दिश्य[11]मान इत्यर्थः। इदं सर्वं पादः पदिति[12] सूत्रस्थ परिभाषा विषयकातिस्य[13] इत्युदाहरणपरभाष्यादनुमीयते। **इति संक्षेपः[14]। समावेश**

---

1. परिभाषयाद्विशिष्टस्य अ-3.
2. स्थानिवत्वे प-1.
3. श्रयितव्येतवाधौ इति पाठः अ-4, तदन्त 'नाऽस्ति'।
4. प्रवृत्ता ज-2; वृत्या अ-4.
5. निर्दिश्य ज-2, प-1.
6. सित्वो प-1; शिद्धौ अ-4.
7. ङित्व अ-2, अ-4.
8. वैय्यर्यात् ज-2, अ-3.
9. निर्दिश्यमान ज-1, प-2, अ-1.
10. साक्षादवृत्या प-1
11. निद्र्दयमान प-1.
12. पादः पत् 6.4.130.
13. हत्युिदाहरण ज-2.
14. 'इति संक्षेपः' नोपलभ्यते प-1.

स्थानतः स्थानेनेत्यर्थः। तत्र स्थानत आन्तर्यम् 'इको यणचि' (6.1. 77) इत्यादौ प्रसिद्धमेव। अर्थतः 'पदन्न' (6.1.63) इत्यादौ। स्थान्यर्थाभिधानसमर्थस्यैवादेशतेति सिद्धान्तात् यदर्थभिधानसमर्थो यः स तस्यादेश इति तत्समानार्थतत्समानवर्णपादादीनां ते। 'तृज्वतकोष्टुः'

इति। त्यदादीनाम[1] इत्या[2]दावंगाधिकारेण तदन्त[3] विधौ निर्दिश्यमान[4] त्यदाद्यं तस्याकार इति सूत्रार्थे न बाधकाभावात्सः। एवं बृद्धत्वनिमित्तछ[5]संनियोगेन विधीय[6]माने राज्ञः कचेति[7] कादेशेपि निर्दिश्य[8]मानांत्यस्य कादेश[9] इत्यर्थेन[10] सबोध्यः[11]। एवमादेः परस्येत्यंशेपि[12] द्वयन्तरुपसर्गेभ्योऽप ईत्[13] छपादिभ्यः[14] परस्य[15] निर्दिश्यमानस्याया[16]देरीदादेशः[17] एवमुदस्थास्तंभोरित्यत्रापि बोध्यम्। तथानेकाल् शित्सर्वस्येत्यंशेपि[18] निर्दिश्यमानस्य[19]–

---

1. त्यदादिनाम प–1.
2. इत्यावंगाधिकोरेण ज–2.
3. तदंतरविधौ ज–2; तदेतविधौ अ–1, अ–3.
4. निर्दिश्यमान प–1, अ–1, अ–3.
5. संन्नियोगेन प–1.
6. विधीयमानेन अ–2, अ–4; विधीयमानो अ–3.
7. केचेति अ–1 केचिति अ–3.
8. निदि्र्दश्य प–1, अ–3.
9. कादेश्य ज–2.
10. इर्थेन प–1.
11. संबोध्य प–1, अ–4.
12. परस्यैत्यंशेपि ज–2, अ–1, अ–3.
13. सं. पाठः 6.3.97 अष्टा.
14. छपादिभ्यः प–1; द्वयादिभ्यः अ–1, अ–3; वृद्धयादिभ्यः अ–2, अ–4.
15. परस्परस्य अ–2, अ–4.
16. निर्दिश्यमानस्याय आदे प–1, अ–1, अ–3, अ–4.
17. रीरादेशः अ–1, अ–3; रीत्यादेशः अ–4.
18. सर्वस्यैत्यंशेपि अ–3.
19. निदि्र्दश्य अ–3.

(7.1.95) इति च गुणतो वाग्धरिरित्यादौ। प्रमाणतः 'अदसोऽसेः' (8.2.90) इत्यादौ 'स्थानेऽन्तरतमः' (1.1.50) इति सूत्रे भाष्ये स्पष्टैषा॥13॥

सर्वस्य[1] पा[2] च शब्दस्थानेकालादेशरित्यादिरर्थः। यद्यपि[3] अलोन्त्य परिभाषयान्त्यस्य स्थानित्वं[4] द्वितीय[5] पा[6] च यदागमा[7] इतिन्याय[8]लब्धस्यागम विशिष्टस्यादेः स्थानित्वं[9] तृतीये तु तदन्तविधौ विशिष्टस्य[10] तत्त्वमनया[11] तु विपरीतमिति कथमेक[12]वाक्यतया समावेशस्त[13]थापि तच्छेष पक्षेमृजेर्वृद्धि[14] रित्यादावेक[15] वाक्यतया परिभाषा द्वयस्यान्वये विरोधवदत्र[16] तदभाव इत्याशयः। नहि एकवाक्यतयान्वये[17] लक्ष्यसिद्धि[18]रत आह विरोधाभावादिति।

---

1. स्वरूपूर्वस्य याच्छब्दस्यावेनेकादेशः इति पाठः अ-2 पुस्तके; स्वरूपपूर्वस्य-याच्छब्दस्याकादेशः इति पाठः अ-4 मातृकायां.
2. याच्छब्दस्यानेकालादेश प-1, अ-1, अ-3; पाशब्दस्थाने... ज-2.
3. पाठोऽयं ज-2, प-1, अ-1, अ-2, अ-4.
4. स्थानित्वे अ-1, अ-3.
5. द्वितीय च अ-2, अ-4.
6. 'पाच' नाऽस्ति अ-2, अ-4.
7. पदागमा अ-2; पदोगमा ज-2.
8. न्यायलब्धे अ-4.
9. स्थानिवत्वं प-1.
10. विष्टस्य अ-1.
11. नत्वम् अ-3.
12. न एके ज-2.
13. 'श' नाऽस्ति अ-3.
14. वृधिः ज-2.
15. इत्यादाकेक अ-1, अ-3.
16. वदत्रदत्तभाव प-1; वदत्रभाव अ-4.
17. तपान्यये अ-3.
18. लक्षयासिविधरिति अ-2.

यद्यपि जराशब्दा[1]न्तेऽनेकालिति[2] बाधित्वा अत्याश्चारितार्थ्येन **पादः[3] पदिति** सूत्रे च भाष्ये प्रायोऽनेकालिति[4] विषये अस्याः प्रवृत्तिदर्शनादलोन्त्यस्ये[5] त्यादि परिभाषाद्वयमनव-

काशत्वादस्या[6] बाधकं तथापि अबाध[7]कत्वे नैवोपपत्तौ बाधकत्व मनुचित मिति भावः। **सूत्रे कैय्यट[8] इति।** तत्र हि[9] यस्येति चेतीकार[10]लोपे सिद्धे समुदायनिर्देशवैयर्थ्यमुक्त्वा[11] कृतेपि तन्निर्देशेत्यस्य[12] कस्मान्ने त्याशंक्य[13] निर्दिश्य[14]मान परिभाषया समाधान[15] परभाष्यमादाय[16] नात्र परिभाषाप्रवृत्तिरिष्टा न सातयो[17]र्वाधिका विरोधाभावात् किन्तु समुदायनिर्देशा स्तद्वा प्रवृत्तौ[18] सर्वादेशो नयेत्युक्तम्[19] तेनेति भावः। **अकञ्चिषय** इति।

---

1. शब्दंते ज-2; शब्देते अ-1.
2. ऽनेकासति अ-4; अनेकाल् शित्सर्वस्य 1/1/55.
3. पादः पत् 6/4/130; पाद पदिति ज-2.
4. 'ऽ' नास्ति अ-2.
5. दर्शनादत आह इति पाठः प-1.
6. अस्याः अ-2, अ-4.
7. अवधाकत्वेनोपपत्तौ अ-4; नोपपत्तौ अ-2.
8. सुत्रे कैयट अ-4.
9. हि' नाऽस्ति प-1.
10. इकार प-1.
एतत्[1] तुल्यन्यायेति। यदव्यक्ती[2]तितुल्यन्यायेत्यर्थः। **शब्दान्तरे चेति**। अत्रेद[3] बोध्यम् कृताकृतेति परिभाषाया आद्यंशस्यैव[4] प्रपञ्चः। क्वचित् कृताकृतेति वक्ष्यमाण परिभाषा तदुदाहरणन्तुदतीत्यादि। **तद्विपरीत[5]** नित्यमित्य स्य तु शब्दान्तरस्य शब्दान्तराच्छब्दान्तरे चेति[7] प्रपञ्चः। आद्यो[8]दाहरणन्तु मूल एव स्पष्टम्। द्वितीयोदाहरणन्तु[9] दतीत्यादि। गुणे कृते शब्दान्तरात्तत्प्राप्तेः[10] लक्ष्यानुसारात्तु वक्ष्यमाण क्वचिदित्यनयाबाधः। तृतीयो[11]दाहरणन्तु करिष्यते[12] -

---

1. यततुल्य ज-2; एते तुल्य अ-1, अ-3; एततुल्य अ-4.
2. य वक्तीति ज-2.
3. अत्रदं प-1; अत्रोदे अ-3.
4. पाठोऽयं ज-2, प-1, अ-1, अ-3, अ-4; आद्यांशस्यैव प्रचं क्वचित् ज-1.
5. तद्विपरितम् अ-4 तद्विपरितमनित्यम् इति पाठान्तरं प-1.
7. पाठोऽयं ज-2, प-1, अ-1, अ-4 वेति ज-1; चेति नोपलभ्यते अ-3.
8. आद्योच्चारणं तु प-1; आदोदाहरणं ज-1, अ-1; आदौदाहरणं अ-3.
9. पाठोऽयं अ-4; द्वितियोदाहरणं ज-1; द्वितीयोदाहरणं प-1, ज-2, अ-1, अ-3.
10. शब्दान्तरातत् प्राप्ते प-1, अ-1, अ-4.
11. लृतृतीयो ज-2, अ-1,; तृततीयो अ-4.
12. कष्यतीत्यादि प-1; तुकरीत्यादि अ-3; करिष्यः त्तीत्यादि अ-4.

कृताऽकृतप्रसङ्गि नित्यम्, तद्विपरितमनित्यम्।।42।।

यद्व्यक्तिसम्बन्धितया पूर्वं प्रवृत्तिस्तद्व्यक्तिसम्बन्धितयैव पुनः प्रवृत्तौ कृताकृतप्रसङ्गित्वमित्याशयेनाह-

शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति।।43।।

इदं 'शदेः शितः' (1.3.60) इति सूत्रे भाष्ये स्पष्टम्। तत्र हि न्यविशतेत्यत्र विकरणे कृते तदन्तस्याडकृते धातुमात्रस्येत्यडनित्य इत्युक्तम्।।43।।

एतत्तुल्यन्यायेनाह-

शब्दान्तरात् प्राप्नुवतः शब्दान्तरे प्राप्नुवतश्चानित्यत्वम्।।44।।

एतन्मूलकमेवाह-

इत्यादि लादेशे कृते स्यादीनां[1] शब्दान्तरे प्राप्तत्वेन न नित्यत्वम्। किन्तु परत्वात्तिवादयः[2]।।44।।

असिद्धवत्सूत्रे इति। तत्र हि तत्सूत्रप्रत्याख्याने दोषोद्भा[3]वक भाष्य व्याख्यापरे कुर्व[4] इत्यत्र नित्यत्वात्पूर्वमुकारलोपः। पश्चात् गुणे कृते ह्युकार[5] लोपे प्रत्ययलक्षणमिति गुणे न भाव्यम्। ततो **लक्षणान्तरेण** च प्राप्नु[6]वन् विधिरनित्य इति गुणस्या[7]नित्यत्वमुक्तम्। सति तु सूत्रे गुणे कृते सार्वधातुक

---

1. स्थादीनां ज-2; स्यादीना प-1.
2. किंत्व परत्वातिवादयः ज-2, प-1, अ-4.
3. पाठोऽयं प-1, अ-4; दोषोद्भवक ज-1, ज-2, अ-1, अ-3.
4. कुर्वान्नित्यत्र अ-4.
5. पाठोऽयं प-1, अ-4 गणः कृतेह्युकार लोपे ज-; गुर्णेः कृते ह्यिय उकार लोपे ज-2; गुर्णे कृतेत्द्युकारलोपे अ-1, अ-3.
6. प्राप्नुवान् ज-2; प्राप्नुचेन् अ-1, अ-3; प्राप्नुवत् अ-4.
7. गुणस्य नित्यत्वं ज-2.

लक्षणान्तरेण प्राप्नुवन्विधिरनित्यः।।45।।

अतिदेशविषय इयमसिद्धवत्सूत्रे कैयटेनोक्ता।।45।।

यदा तु शास्त्रव्यतिरेकेण तद्विधेयकार्ययोरेव नित्यत्वादि-विचारः, यदापि व्यक्तिविशेषाश्रयणाभावस्तदाह-

क्वचित् कृताकृतप्रसङ्गमात्रेणापि नित्यता।।46।।

कृते द्वितीये नित्यत्वेनाभिमतस्य पुनः प्रसङ्गमात्रं नित्यत्वव्यवहारे प्रयोजकं न तु बाधकाबाधितफलोपहितप्रसङ्गोऽपि तथेति भावः।।46।।

तदाह-

यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम्।।47।।

क्वचित्तु बाधकाबाधितफलोपहितप्रसङ्ग एव गृह्यते। तदाह-

यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम्।।48।।

सप्तमे कैयटे नैतदुपष्टम्भकं लोकव्यवहारद्वयमुदाहृतम्। वालिसुग्रीवयोर्युध्यमानयोर्भगवता वालिनि हतेऽपि सुग्रीवस्य वालिनः प्राबल्यं न व्यवहरन्ति, भगवत्सहायैः। पाण्डवैर्जये लब्धेऽपि पाण्डवानां प्राबल्यं व्यवहरन्ति चेति। सर्वं चेदं लक्ष्यानुरोधद्वयवस्थितम्।।48।।

परे[1] उकारो विधीय[2]माना ते उदित्युकारः प्रव[3]र्तते। कुरुत इत्यादावुत्वार्थं तथार्थस्यावश्यकत्वात्[4]। स्थानिवत्वन्तु न अकारस्यादिष्टादचः पूर्वादिति ध्येयम्॥45, 46॥

---

1. पाठोऽयं प-1, ज-1, ज-2, अ-1, अ-3.
2. पाठोऽयं प-1; उकारे विधीयमानात ज-1; उकारिविधियमानो त ज-2, अ-1, उकारे.
3. उदित्युकारऽप्रवर्त्तते अ-4.
4. पाठोऽयं ज-2, प-1, अ-4; अवश्यतवात् ज-1; अवस्यत्वात् अ-1; अवस्यात्वात् अ-3.

'लुटः प्रथमस्य' (2.4.85) इति सूत्रे भाष्ये-

स्वरभिन्नस्य प्राप्नुवन्विधिरनित्यो भवति॥49॥

इति पठ्यते। यत्र त्वेकस्यैव कार्यस्य परत्वं नित्यत्वं च तत्रेच्छयान्यतरत् तदुभयं वा तस्य बलवत्त्वे नियामकमुल्लेख्यम्। अत एव तत्र तत्र परत्वान्नित्यत्वाच्चेति भाष्य उच्यते। वस्तुतस्तत्र परत्वादित्युक्तिरेकदेशिनः। स्पष्टं चेदं विप्रतिषेधसूत्रे कैयटे। 'णो चङि' (7.4.1) इति ह्रस्वापेक्षया नित्यत्वान्तरङ्गत्वप्रयुक्तद्वित्वस्य

सप्तमे इति। तत् कुलमित्यत्रात्वलुकोः सम्प्रधारणायां[1] परत्वा दत्वं नित्योलुक्[2] कृतेप्यत्वे प्राप्नो[3]त्य कृतेऽपि अनि[4]त्योलुक्। न हि कृते[5] अत्वे प्राप्नोति अतोम्[6] इत्यम् भावेन[7] भवितव्यमिति भाष्यमादाय तेनोक्तम्। एवञ्च पूर्वाक्वचिदित्यस्याः[8] प्रपञ्चः। अपरा तु यद्[9] व्यक्तीत्याद्यर्थक कृताकृतेत्यस्या इति तत्त्वम्। तत्र प्रथमस्योदाहरणन्तु तुदतीत्येव[10] द्विती यस्य स्योन इति मूले एवाग्रिम परिभाषाव्याख्यायां स्पष्टम्[11]। क्रमेणोपष्टं- भकमाह।[12]

---

1. पाठोऽयं अ-1, अ-3; सम्प्रधारणयाम् ज-1; संप्रधानरणायां ज-2; संप्रधारणीयां प-1; आत्वलुसोऽसंप्रसारणायाम् अ-4.
2. नित्ये अ-1, ज-2.
3. प्राप्नोत्य प-1.
4. अनित्योक्लु प-1.
5. कत्वे ज-2; कते अ-1, अ-3.
6. अतो नित्यम् अ-3.
7. भावेनं अ-1; भाविनं अ-4.
8. क्वचिदित्यस्य अ-3, अ-4.
9. यथोक्तोत्याद्यीकिकृताकृते प-1; यद् व्यक्तोत्पाद्यर्थककताकतेत्यस्या ज-2, अ-1, अ-3.
10. तदतीत्येव अ-3.
11. स्पष्टाम् ज-2, अ-1, अ-3.
12. वालीत्यादि वा प-1; वालीसादिना तु ज-2, अ-1, अ-3.

प्रथमतः प्रवृत्तौ नित्यत्वादित्येव भाष्य उक्तम्। एवं नित्यान्तरङ्गयोर्बलवत्त्वमपि यौगपद्यासम्भव एवेति बोध्यत्॥49॥

(नित्यादप्यन्तरङ्गं वलीयः)

नित्यादप्यन्तरङ्गं बलीयः, अन्तरङ्गे बहिरङ्गस्यासिद्धत्वात्।

तदाह-

असिद्धं बहिरङ्गमन्तरङ्गे॥50॥

अन्तर्मध्ये बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्येऽन्तर्भूतान्यङ्गानि निमित्तानि यस्य तदन्तरङ्गम्। एवं तदीयनिमित्तसमुदायाद् बहिर्भूताङ्गकं बहिरङ्गम्। एतच्च 'खरवसानयोः' (8.3.15) इति सूत्रेऽसिद्धवत्सूत्रे च भाष्यकैयटयोः स्पष्टम्। अत्राङ्गशब्देन शब्दरूपं निमित्तमेव गृह्यते, शब्दशास्त्रे तस्यैव प्रधानत्वात्। तेनार्थनिमित्तकस्य न बहिरङ्गत्वम्। अत एव 'न तिसृचतसृ' (6.4.4) इति निषेधश्चरितार्थः। अन्यथा स्त्रीत्वरूपार्थनिमित्तकतिस्त्रपेक्षयान्तरङ्गत्वात्त्रयादेशे तदसङ्गतिः स्पष्टैव। अत एव त्रयादेशे स्रन्तस्य प्रतिषेधः 'इति स्थानिवत्सूत्रस्थ भाष्यवार्तिकादि संगच्छते। एतेन गौधेरः, पचेरन्नित्यादावेयादीनामङ्गसंज्ञासापेक्षत्वेन बहिरङ्गतयाऽसिद्धत्वाद्वलिलोपो न स्यादिति परास्तम्, एयादेशादेरपरनिमित्तकत्वेनान्तरङ्गत्वाच्च।'

वालीत्यादी[1]नाम्॥48॥

लुटः प्रथमस्येति। तत्र हि श्वः[2] कर्त्तेत्यादौ तस्यानु[3]दात्तेन्ङिति निधातः[4] डादेशयोः[5] प्रधारणायां डादेशा नित्यत्वमुक्तम्॥49॥

---

1. वालीत्यादिव प-1; वालीसादिनां ज-2, अ-1, अ-3.
2. स्वः अ-3, अ-4.
3. सं. पाठ. 6/1/186 लास्यनुदात्तेदिति प-1; नुस्यानुदात्तेहिति ज-2; नस्यानुदात्तेः रूति अ-1; नस्यानुदात्तेरु निधातः अ-3; नस्यानुदात्तेदिति अ-4.
4. निचातः ज-2.
5. पाठोऽयं प-1; डादेशवेस्यानित्यत्वम् ज-1, ज-2, अ-1, अ-3 डादेशेवस्यानित्यत्वं अ-4.

ननु 'येन विधिस्तदन्तस्य' (1.1.72) इति सूत्रे भाष्ये 'इको यणचि' (6.1.77) इत्यादावपि तदन्तविधौ स्योन इत्यत्रान्तरङ्गत्वाद्यणो गुणबाधकत्वमिष्यते तन्न सिद्ध्येत्, ऊनशब्दमाश्रित्य यणादेशो न शब्दमाश्रित्य गुण इत्यन्तरङ्गत्वाद्गुण एव स्यादित्युक्तम्।

अत्र कैयटः- सिवेर्बाहुलकादौणादिकं न प्रत्यये गुणवलोपोठां प्रसङ्गे ऊडपवादत्वाद्वलोपं बाधते गुणं त्वन्तरङ्गत्वाद्बाधते। गुणो ह्यङ्ग सम्बन्धिनीमिग्लक्षणां लघ्वीमुपधामादर्धधातुकं चाश्रयति। उठ् तु वकारान्तमङ्गमनुनासिकादिञ्च प्रत्ययमित्यल्पापेक्षत्वादन्तरङ्गः, तत्र कृतेयणगुणो प्राप्नुत इति एवं च संज्ञापेक्षस्यापि बहिरङ्गत्वं

अत एव नतिसृ[1]तीति। ननु इदं ज्ञापकं कि[2] सूत्रकाररीत्या उतवार्त्तिककाररीत्या भाष्यकाररीत्या वा[3] नाद्यः समर्थग्रहणेन परिभाषाया अनित्यत्वज्ञापनेन तत्सार्थक्यात्[4]। न च षत्वतुकोरसिद्ध[5] इति सूत्रस्थ तुक् ग्रहणं ज्ञापक[6]मस्त्येवेतिवाच्यम्। समानकालप्राप्तिकस्य जातस्य[7] वा वहिरंगस्यासिद्धत्व[8] प्रतिपादक परिभाषावाच्यांशद्वये[9] क्रमेणाङ् ग्रहणोठ्[10] ग्रहणयोर्ज्ञापकत्ववदंश[11]द्वयेप्यनित्यत्वस्यावश्यं वाच्यतया तन्मध्ये-

---

1. पाठोऽयं ज-2; नतिस्त्रितीति ज-1, प-1; नस्तितीति अ-1, अ-3.
2. कि ज-2, अ-1, अ-3.
3. चानायऽऽसमर्थ ज-2; चानाद्यऽसमर्थ अ-1, अ-3; वानद्यः समर्थ अ-4.
4. तत्सार्थकात् अ-3.
5. तकोरसिद्धं अ-4.
6. ज्ञापकात्तस्येवेति ज-2.
7. तातस्य ज-2, अ-1, अ-3.
8. असिद्धत्वं अ-4.
9 वाच्यांशद्वये ज-2; वाच्यांशेद्वये प-1.
10. पाठोऽयं प-1; ग्रहणेठ् ज-1; ग्रहणोढ ज-, अ-1; ग्रहणोङ् अ-4.
11. ज्ञापकत्वदंशद्वयेप्यनित्यत्व अ-4; वदंशद्वयेप्यति नित्यत्वस्यावनृपवाच्यतपतिन्मध्ये इति अ-3.

स्पष्टमेवोक्तमिति चेत्? न तदन्तविधावपि बहुपदार्था पेक्षत्व-रूपबहिरङ्गत्वस्य गुणे सत्त्वेन तत्र दोषकथनपरभाष्यासङ्गतेः। बहिरङ्गणान्तरङ्गशब्दाभ्यां बह्वपेक्षत्वाल्पापेक्षत्वयोः शब्दमर्यादयाऽ-लाभाच्च।

तथा सत्यसिद्धं बह्वपेक्षमल्पापेक्ष इत्येव वदेत्। अत एव 'विप्रतिषेध' सूत्रे भाष्ये गुणाद्यणादेशोऽन्तरङ्गत्वादित्यस्य स्योन इत्युदाहरणं न तु गुणादूडन्तरङ्गत्वादित्युक्तम्। त्वद्रीत्या तदपि वक्तुमुचितम्। प्राथम्यात्तदेव वा वक्तुमुचितम्। मम त्वन्तरङ्ग परिभाषया तद्वारणासम्भवात्तनोक्तम्। किं च सिद्धान्ते नित्यत्वाद् गुणात्पूर्वमूठ् गुणस्तु ऊठि यणा बाधितत्वादनित्यः। ऊनशब्दमाश्रित्येत्यादिभाष्येण च परिभाषायामङ्गशब्देन सप्तम्याद्यन्ततयोपात्तं शब्दरूपं निमित्तमेव गृह्यत इति स्पष्टमेवोक्तम्।

यत्तु कैयटेन तदन्तविधिपक्षे परत्वाद्गुणः प्राप्नोतीत्युक्तं तत्तुनशब्दमाश्रित्येत्यादिभाष्यासङ्गत्या चिन्त्यम्। बलि लोपेऽन्त-रङ्गपरिभाषा न प्रवर्तत इति तु न युक्तम्, तत्सूत्रे भाष्य एव ब्रश्चादिषु लोपातिप्रसङ्गमाशङ्क्योपदेशसामर्थ्यान्नः न च वृश्चतीत्यादौ

द्विती[1]यांशस्य षत्वतुकोरसिद्ध इति सूत्रस्थ तुक्[2] ग्रहणस्य ज्ञापकत्वाद नित्यत्वेनाक्षधूरित्[3]यादि सिद्धावपि द्वितीयांशस्यानित्यत्वाभावेन[4] तिसृणमित्याद्यसिध्यापतेस्तस्याप्यनित्यत्वस्यावश्यकत्वेन तदनित्यत्वस्यानेन बोधनात्। **किञ्चनाजानन्तर्य। इति** परिभाषायाऽभावे[5] प्रमाणाभावस्याग्रेतत्-परिभाषाव्याख्यावसरे वक्ष्यमाणतया तत् ज्ञापकत्वे न तु[6] ग्रहणस्योपक्षीणत्वात्-

---

1. द्वतीतीयां प-1.
2. त्वकग्रहणस्य ज-2.
3. अनित्यत्वेनाक्ष घरित्यादि ज-2, अ-1, अ-3 अनित्यत्वेनाद्यूसित्यादि प-1.
4. अभावेनितिसृणाम् ज-2, अ-1; अभावेनेतिसृणाम् अ-3
5. अभावेनतिसृणाभिद्यसिद्धयायतत्वांतेस्तस्या अ-4; ज्ञापकत्वेन नुग् ग्रहणस्य अ-1, अ-3.
6. ज्ञापकत्वेन तुग् ग्रहसाम्यो पक्षीणतवात् अ-4.

चारितार्थ्यम्, बहिरङ्गतया संप्रसारणस्यासिद्धत्वेन पूर्वमेव तत्प्राप्तेरिति भाष्योक्तेः।

परिभाषा[1]ऽनित्यत्वे एतस्यैवाश्रयणीयत्वात्। वर्णो[2]वर्णेनेतिसूत्रे विप्रतिषेध प्रक्रमे[3]वीरपुरुषकोग्राम इत्यादौ समानाधिकरण समासाद्बहुब्रीहि विप्रतिषेधेनेति[4] विप्रतिषेध खंडकनैषयुक्तो[5] वि[6]प्रतिषेधः अन्तरंगः कर्मधारयः कान्तरंगता-स्वपदार्थे[7] कर्मधारयः अन्यपदार्थे[8] बहुव्रीहिरिति[9] भाष्येण पंचगावो यस्य[10] सन्ति पंचगुरित्यत्र मतुप् प्राप्नोतीत्यांशक्य **अन्तरंगत्वाद्बहुव्रीहिः** कान्तरंगता? अन्यपदार्थे बहुव्रीहिः अस्तित्वविशिष्टेऽन्यपदार्थे[11] द्विगुरिति भाष्येण चार्थकृतवहिरंगत्वादेर्बोधनात्। प्रकृतेपूर्वोक्त निषेधेनार्थकृतवहिरंगत्वा[12] भाव बोधन समर्थ ग्रहणेन परिभाषाया अनित्यत्वबोधनं चेत्यत्र[13] विनिगमकाभाव इति तु न[14] शंकाकलंकः।[15]

---

1. परिभाषानित्यत्वे अ-3, अ-4.
2. वर्णीवर्णेन 2/1/69; वर्णीतेति सूत्रे ज-2, अ-1, अ-3; ववर्णेवर्णेनेति अ-4.
3. प्रकृते अ-4.
4. विप्रतिषेधेनति नाऽवलोक्यते अ-3.
5. षडंक ने कैषयुक्तौ अ-4.
6. पाठोऽयं ज-2, प-1, अ-1, अ-3, अ-4.
7. स्वपदर्थि ज-1, अ-1, अ-3; स्व पदार्थो अ-4.
8. आन्यपदार्थे ज-2, अ-1, अ-3.
9. 'इति' नोपलभ्यते प-1 इति भाष्येण अन्तरंगत्वाद्वहुव्रीहिः इत्यन्तं नाऽति प-1 मातृकायाम्.
10. पंचगाचोमस्य सति अ-1, अ-3; पंचाविगमस्या संति ज-2.
11. विशिष्टोन्यपदार्थे ज-2, अ-1, प-1, अ-3.
12. बहिरंगभावबोधनम् प-1.
13. वेत्यत्र ज-2, प-1, अ-1, अ-3, अ-4.
14. शङ्कावलंकः अ-2'
15. कालं ज्ञापरिभाषस्ये अ-4; कालं संसारिभाषं अ-1, अ-3;कालं संसारभाषं ज-2.

यत्तु न लोपस्य षट्संज्ञायामसिद्धत्वात्पञ्चेत्यत्र 'न षट्' (4. 1.10) इति निषेध इति तच्चिन्त्यम्। नलोपस्य हि पदसंज्ञासापेक्षत्वेन बहिरङ्गत्वं वाच्यम् तच्च न, संज्ञाकृतबहिरङ्गत्वस्यानाश्रयणात्। पञ्चेत्यत्र निषेधस्तु स्त्रियां यत् प्राप्नोति तन्नेति व्याख्यानसामर्थ्येन भूतपूर्वषट्त्वमादायेति बोध्यम्।

अत एव कृति तुग् ग्रहणं चरितार्थम्। वृत्रहभ्यामित्यादौ पदत्वनिमित्तकत्वेऽपि न लोप बहिरङ्गत्वाभावात्। भ्यामः पदसंज्ञा-निमित्तत्वेऽपि न लोपस्य बहिरङ्गत्वाभावात्। भ्यामः पदसंज्ञा-निमित्तत्वेऽपि नलोपस्य तन्निमित्तकत्वाभावात्। परम्परया निमित्त-त्वमादाय बहिरङ्गत्वाश्रयणे तु न मानम्। ध्वनितं

चेदं 'न लोपः सुप्' (8.2.2) इति सूत्रे भाष्य इति तत्रैव भाष्यप्रदीपोद्योते निरूपितम्।

अन्तरङ्गे कर्त्तव्ये जातं तत्कालप्राप्तिकं च बहिरङ्गमसिद्धमित्यर्थः। वृश्चेत्यादिषु पदसंस्कारपक्षे समानकालत्वमेव द्वयोरिति बोध्यम्। एतेनान्तरङ्ग बहिरङ्गाद्वलीय इति परिभाषान्तरमित्यपास्तम्। एनामाश्रित्य विप्रतिषेधसूत्रे भाष्ये तस्याः प्रत्याख्नाच्च।

कार्यकाल[1] संज्ञापरिभाषं भस्येत्युपस्थितमिदं भवति यचि भमित्येक देशि[2]भाष्यस्य कार्यकालपक्षे संज्ञा[3]शास्त्राणां वाक्यैकवाक्यता बोधकत्ववत्। पूर्वोक्तमतुप् सूत्रस्थ भाष्यस्यैक देश्युक्तित्वेपि[4] तत् बोधकत्वं बोध्यम्[5]। किञ्चवर्णो वर्णेनेति सूत्रस्थ भाष्यस्य तु सिद्धांत भाष्यत्वेन तत् बोधकत्व मव्याहतमेवेति दिक्।

1. देशिमष्टयस्य अ-3.
2. संज्ञा अ-3 'स्त्रा' नो पलभ्यते प-1.
3. देशयुक्तित्वोऽपि अ-1, अ-3, अ-4.
4 बोध्याम् अ-3.
5. सूत्रस्य ज-2, अ-1, अ-3.

न दिवतीयः नुमचि[1]रतृज्वद्भावगुणेभ्योनुटः पूर्वविप्रति[2]षेधेनेति वार्त्तिकेचतस्त्रचिरेत्यनु[3]क्तासामान्यतोऽचिरनुटोः[4] पूर्व विप्रतिषेध[5] प्रतिपादक[6] वार्त्तिक कृतापि समर्थग्रहणेन तदभ्युपगमात्। अन्यथाति[7]स्त्रभावेरादेश-स्यैवा प्राप्तेः पूर्व विप्रतिषेधोक्ति[8] कथनमसंगत[9] स्यात्। न तृतीयः बाध्य विशेष चिंतायां मध्येऽपवादन्यायेन दीर्घोत्वयोरेव[10] बाधः[11] स्यान्न गुणस्येत्यवश्याश्रयणीयायां बाध्य सामान्यचिंतायां अविशेषात् स्वविषये प्राप्त नुटोपिरेफ[12] बाधे नुमचिरेति[13] वार्त्तिकेरादेश नुटोः पूर्व विप्रतिषेधोऽसंगत[14] इत्याशंक्य नतिस्त्रितिज्ञापकान्नुडिति तृज्वत्सूत्रस्थ भाष्येण तद[15] नित्य-त्वाभ्युपगमात्। न चार्थकृत बहिरंगस्या[16] नाश्रयणेन भाष्यवार्त्तिकयोः प्रवृत्त्या न तद नित्यत्वे[17] ज्ञापकत्वमिति वाच्यम्[18]। वर्णोवर्णेनेत्यादि[19] सूत्रस्थ

1. नुमचिरतृज्वादावगुणेभ्यो ज-2, अ-3.
2. पाठोऽयं ज-2, प-1, अ-1, अ-3, अ-4 व्रिप्रतिषेधेति ज-1.
3. अनुक्त्वा अ-3, अ-4.
4. अचिरष्टो अ-4; अविरनुठो अ-3, अ-1.
5. विप्रतिषेधे प-1, अ-3.
6. प्रतिपाक अ-3.
7. तिसस्त्रज-2.
8. प्रतिषेधोक्ति अ-1, अ-3.
9. असंगत ज-2, अ-3, अ-4.
10. दीर्घोतयोरेव ज-2, अ-4.
11. वाधस्यात्र ज-2, अ-1, अ-3.
12. पाठोऽयं प-1.
13. नुटोपिरेण ज-1, ज-2, अ-1, अ-3, अ-4.
14. असंयत ज-2.
15. नित्यत्वा अ-4.
16. पाठोऽयं अ-1, ज-2, अ-3, अ-4; बहिरंगत्वस्या ज-1, प-1.
17. तत् नित्यत्वे ज-2.
18. वाच्य ज-2, अ-1, अ-1, अ-3.
19. वर्णोनेत्यादि ज-2.

अन्तरङ्गशास्त्रत्वमस्या लिङ्गम्। इयं च त्रिपाद्यां न प्रवर्त्तते, त्रिपाद्या असिद्धत्वात्। अस्याञ्च 'वाह ऊठ्' सूत्रस्थमूठ्ग्रहणं ज्ञापकमित्येषा सपादसप्ताध्यायीस्था। अन्यथा संप्रसारणमात्रविधानेन लघूपधगुणे 'वृद्धिरेचि' (6.1.88) इति वृद्धौ विश्वौह इत्यादि-सिद्धेस्तद्वैयर्थ्यं स्पष्टमेव। सत्यां ह्ययेतस्याबहिरङ्गसम्प्रसारणस्या-सिद्धत्वाल्लघूपधगुणो न स्यात्। न च 'पुगन्त' (7.3.86) इति सूत्रे निमित्तमिको विशेणमत एव भिनत्तीत्यादौ न गुणः, एवं च 'नाजानन्तर्ये' (प. 51) इति निषेधात्कथं परिभाषाप्रवृत्तिरिति वाच्यम्। प्रत्ययस्याङ्गांश उत्थिताकाङ्क्षत्वेन तत्रैवान्वयात्। पुगन्तेत्यादौ कर्मधारयाश्रयणेन प्रत्ययपराङ्गावयवलघूपधारूपेको गुण इति 'इको गुणवृद्धी' (1.1.3) इति सूत्रभाष्यसम्मतेऽर्थे भिनत्तीत्यादावदोषाच्च। अकारान्तोप-सर्गेऽनकारान्ते चोपपदे वहेर्वाहेर्वा ण्विविचावनभिधानान्न स्त एव। वार्य्यूहेत्यादि तूहतेः क्विपि बोध्यम्। धातूनामनेकार्थत्वान्नार्थासङ्गतिः। प्रौह इत्याद्यसाध्वेव, वृद्धेरप्राप्तेः। अस्योहस्यानर्थक्यात् न 'प्रादूहोढो'

भाष्य[1]विरोधे न तथा कल्पयितुमशक्यत्वात्। पूर्वोक्त भाष्यवदर्थकृत-बहिरंगत्वाभावबोधकप्रत्यक्ष- भाष्यस्यानुपलंभाच्च[2]। अत एव वक्ष्यमाण[3] स्थानिवत्सूत्रस्थ[4] भाष्यविरोधोपि नेति चेन्न। अत्रांन्तरङ्गशब्दे[5] नेत्यस्याग्रे प्राय इति शेषेण सर्वसामंजस्यात्। तेनेत्यस्य[6] प्रायः शब्द[7]रूपनिमित्तत्वाश्रयणे[8] नेत्यर्थः अर्थनिमित्तकस्येत्यस्य सर्वं वाक्यमिति न्यायेनार्थानिमित्तकस्यैवेत्यर्थः।

---

1. भाविरोधेन प-1.
2. अनुपलंभाव ज-2,; अनुलभाच्च प-1.
3. वक्ष्यमाणः ज-2, प-1, अ-1, अ-3, अ-4.
4. सूत्रस्था भाष्या विरोधोपि अ-1, ज-2.
5. अत्रांगशब्दनेत्यस्या प-1; अत्रांतरस्येशब्दनेत्यस्य अ-4.
6. तेनत्यस्य ज-2, अ-1, अ-3; तेन्नेत्यस्य अ-4.
7. तेनत्यस्य ज-2, अ-1, अ-3; तेन्नेत्यस्य अ-4.
8. रूप निमित्तत्वा ज-2; रूपनिमित्त कल्येत्यस्य अ-1, अ-3.

(6.1.89 वा 3) इत्यस्यापि प्रवृत्तिः।

न च कार्य्यकालपक्षे त्रिपाद्यामेतत्प्रवृत्तिदुर्वारेति वाच्यम्, पूर्व प्रति परस्यासिद्धत्वादन्तरङ्गाभावेन पूर्वस्य तन्निरूपित-बहिरङ्गत्वाभावात्तया तस्या सिद्धत्वप्रतिपादनासम्भवात्।

न चानया पूर्वस्यासिद्धत्वात्तदभावेन तं प्रति परासिद्धत्वं 'पूर्वत्र' (8.2.1) इत्यनेन वक्तुमशक्यमिति वाच्यम्, एवं हि विनिगमना-विरहादुभयोरप्यप्रवृत्त्यापत्तेः।

किं च पूर्वत्रेत्यस्य प्रत्यक्षत्वेन तेनानुमानिक्या अस्या बाध

ननु अर्थ निमित्तक[1]बहिरंगत्वाश्रयणे वर्णोवर्णेनेत्यादि भाष्यवत्। संज्ञाकृतशब्द[2]निमित्त कृतबहिरंग[3]त्वाश्रयणे न मानमित्याशंक्याह। **नतिस्त्रितोति।** अन्यथा इत्यस्यार्थकृतबहिरंग[4]त्वस्यैवाश्रयणे इत्यर्थः। अत एवैकाजिति[5] कर्मधारयो वर्त्तिपदार्थ प्रधानत्वेनान्त रंगत्वादित्याद्यर्थकृतबहिरंगत्वाश्रयक[6] निपात एकाजनाङित्यादि सूत्रस्थ शेखरग्रन्थः संगच्छते[7]। अत्रांग[8]शब्देन शब्दरूप[9] निमित्तमेव गृह्यते[10]–

---

1. निमित्तत्वाश्रयणे अ–4.
2. संज्ञाकृतं ज–2.
3. बहिरंगात्वाश्रयणेन अ–4.
4. बहिरंगत्वाश्रयणे प–1.
5. अत एव एकानिति अ–1, अ–3; अत एवेकातृतिकर्म अ–4; अत एव एकाजिति इत्यारभ्य 'निपात' इत्यन्तं प–1 मातृकायां नावलोकयते.
6. बहिरंगत्वोश्रयक अ–4.
7. सं. पाठः, संगच्छते ज–1, ज–2, प–1, अ–1, अ–3, अ–4 संगच्छते संज्ञकृततदाश्रयणे दीर्घोकित इति सूत्रस्थं भाष्यमग्रे स्फुटी भविष्यति किन्च अत्राङ्ग इति पाठान्तरं प–1.
8. आत्राङ्ग अ–1.
9. 'श' रूपम् ज–2, अ–3.
10. गृह्यति ज–2.

एवोचितः। अतः कार्य्यकालपक्षेऽपि त्रिपाद्यामस्य। अनुपस्थितिरेव। अत एव कार्य्यकालपक्षमेवोपक्रम्योक्तयुक्तीरुक्त्वा 'अतोऽयुक्तोऽयं परिहारो न वा बहिरङ्गलक्षणत्वात्' इतीत्युक्तं विसर्जनीयसूत्रे भाष्ये सिद्धान्तिना। त्रिपादीस्थेऽन्तरङ्गे कर्तव्येऽयं परिहारो न युक्त इति तदर्थः, किं तु वचनमेवारब्धव्यमिति तदाशयः। अत एव निगाल्यत इत्यादौ लत्वार्थ 'तस्य दोषः' इति वचनमेवारब्धम्। अन्यथान्तरङ्गत्वाण्णि लोपात्पूर्वं वेकल्पिकलत्वे तद्वैयर्थ्यं स्पष्टमेव। येऽपि लक्ष्यानुरोधादानुमानिक्याप्यन्तरङ्गपरिभाषया प्रत्यक्षसिद्धस्य पूर्वत्रेत्यस्य बाधं वदन्ति

इत्यनुक्ता[1]शब्दरूपं निमित्तं गृह्यत[2] इत्युक्तमपि संगच्छते[3]। ननु इदं सर्वमसत्[4]। तथाहि अन्तरंगत्वाज्जातेऽपि त्रयादेशे[5]ऽन्तरंग प्रवृत्त्युतरं बहिरंगशास्त्रप्रवृत्तेः सर्वसंमतत्वेन पश्चात्ति[6]स्रदेशे न तिस्रित्यस्य सार्थक्यात्[7]। कथं ज्ञापकत्वोपपादनमिति[8] चेन्न। अर्थकृतबहिरंगत्वस्यै[9]वाश्रयणेस्त्र्यर्थ निमित्तक तिस्रु पेक्ष[10]याप्यंतरंगत्वात् त्रयोदेशे[11] पश्चात्तिस्रादेशेपि नामीति दीर्घदृष्ट्यास्त्र्यर्थ निमित्तकत्वेनतिस्रा[12]देशस्य बहिरंगत्वादसिद्धत्वे दीर्थस्यैवा प्राप्तौ[13] निषेधवैय्यर्थेन तत् ज्ञापकत्वमित्याशयात्। एतेन–

---

1. इत्यनुक्त्वा अ–3, अ–4.
2. गृह्यते अ–4; अनुपलब्धोऽयं गृह्यत शब्दः प–1.
3. सं. पाठः, संगछते ज–1, ज–2, प–1, अ–1, अ–3, अ–4.
4. न ननु इदं अ–1, अ–3.
5. त्रयादेशेतरांग अ–4; अ–1, अ–3.
6. पश्चातिस्रादेदो जाते ज–2, अ–1, अ–3.
7. पाठोऽयं ज–2, प–1, अ–1, अ–3; सार्थक्ये ज–1; सार्थकरात् अ–4.
8. पाठोऽयं ज–2, प–1, अ–1, अ–3, अ–4; उपपादानम् ज–1.
9. बहिरंगत्वाश्रयस्यैवाश्रयणे प–1.
10. पाठोऽयं प–1; तिस्रपेक्षयान्तरंगत्वात् ज–1, ज––2, अ–1, अ–3, अ–4.
11. त्रयादेशश्चतिस्राादेशे पि अ–3.
12. पश्चात्तिस्रादेशे जाते नतिस्रित्यस्य सार्थपि नामीति दीर्घः इति पाठान्तरं अ–4.
13. बहिरंग त्वारासिद्धत्वे अ–4.

तेऽपि लक्षणैक चक्षुर्भिर्नादर्तव्या इति दिक्।

त्रिशब्दार्थ समवेत[1] संख्या समर्थके[2] आमित्रयादेश[3] इत्यर्थकस्य[4] त्रैस्त्रय इत्यस्य माधवमते[5] गौणे अप्रवृत्या[6]प्रिय तसृणामित्यादो निषेधस्य चरितार्थत्वात्[7]। अन्तरंगप्रवृत्त्युत्तरं बहिरंग प्रवृत्तेः सर्वसंमतत्वेन त्रयादेशे कृते स्थानिवद् भावात्तिस्रादेशेऽदोषा[8]च्चेति भाष्या[9]नारुढ्मार्गमवलम्ब्य ग्रन्थार्थं[10] चाविज्ञाय दूषणगणावभासं[11] प्रयुञ्जाना आधु[12]निकतराः प्रत्युक्ता[13] इति दिक्।

एवमेव सर्वत्रार्थसंज्ञाकृतबहिरंगत्वानाश्रयकग्रन्थायोजयितुं शक्या इति मात्सर्यमुत्सार्य[14]सुधिभिरुह्यम्। **एतेनगौधेरः** इति। ऐतेनेत्यस्यार्थसंज्ञाशब्द रूप निमित्तकृतान्तरंग बहिरंगत्वाश्रयणेनेत्यर्थः तदेवाह। एयादेशादेरितिः चोहेतौ[15] अयन्भावः धियतीत्यादौ[16] प्रक्रियाक्रमेणपूर्वोपस्थित[17] निमित्तकत्वं

1. समवेतस्व्यासंसभकेय प-1; संभवेत संख्या अ-1, अ-3.
2. पाठोऽयं अ-3, अ-4; समर्यके ज-1, ज-2.
3. आमित्रायादेश अ-3.
4. इत्यर्थकस्य अ-4.
5. माधवसत्ते ज-2, अ-1, अ-3.
6. पाठोऽयं ज-2, प-1, अ-1, अ-3, अ-4; अप्राप्त्या प्रिय ज-1.
7. चरितार्थाचात् ज-2, अ-1, अ-3; चरितार्थत्वा अ-4.
8. अदोषोच्चेति प-1, अ-1.
9. भाष्यानरुहलमार्गमधलव्यम् अ-2, अ-3.
10. पाठोऽयं प-1, अ-4; ग्रन्थार्थ ज-1, ज-2, अ-1, अ-3.
11. दूषणावभास प-1; दूषणगणावभाष अ-4.
12. आधुनिकतरा प-1.
13. प्रयुक्ता ज-2, ऽप्रयुकता अ-1, अ-3.
14. इतिमात्समार्यमुत्सार्य प-1.
15. विहितौ ज-2; चहितौ अ-1, अ-3, अ-4.
16. ध्रियतीत्यादौ प-1; व्रिपतीत्यादौ ज-2.
17. पूर्वेपस्थित ज-2.

रूपांतरंगत्वस्यगुणे[1]सत्वेऽपि लक्ष्यानुसारात्तदा छाद्य[2] प्रयोगीयो[3]च्चारण-क्रमेणपूर्वस्थितत्व रूपांतरङ्गत्वमादायेयङ् प्रवृत्तिवत्[4]। प्रकृतेपि[5] संज्ञाकृत-बहिरंगत्वस्य एयादेशे[6] सत्यपि तदाछाद्यापरनिमित्तकत्व रूपांतरंगत्व-मादायेष्टसिद्धौ संज्ञाकृतबहिरंगत्वेनेयादेरसिद्धत्वे लोपाप्राप्तौ परिभाषाया अनि[7]त्यत्वाल्लोपविषये[8] तद प्रवृत्तेरवश्यं वाच्यतया लोपविधायक सूत्रस्थ वृश्चतीत्यादिषु परिभाषाया[9] संप्रसारणस्यासिद्धत्वेन प्राप्तलोपवारकव[10]कारोप-देशसामर्थ्यप्रतिपादक भाष्य[11] विरोध सहनन्त्वनुचित्तमिति। यथाश्रुतन्तु न साधु। दीर्घोकित इति सूत्रस्थ छोच्छेदन[12] इत्यस्मादात्वे लिटि[13] छाशब्दस्य[14] द्वित्वे छा छा[15] इत्यवस्थायां[16] अंतरंगत्वात्तुकि अजन्ताभ्यासाभावेन ह्रस्वाप्राप्तिमाशंक्य यंयस्येत्य[17]त्रदीर्घवारणायकृताकित् ग्रहणस्याजन्ताभ्यासस्य पूर्वोक्तोदाहरणे[18]ऽसत्त्वात्तदप्राप्तौ वैय्यर्थ्येनाकिद्वचन मन्यत्र किदन्तस्यालोंत्य

---

1. गुणसत्वेपि ज-2, अ-1, अ-3.
2. तदाछाज ज-2.
3. प्रयोगोच्चारण ज-2.
4. प्रवृस्तवत् ज-1, अ-1, अ-3.
5. पाठोऽयं ज-2, अ-1, अ-4; कृतेपि ज-1.
6. एयाद्यादेशे ज-2.
7. अनित्वाल्लोप ज-2, अ-3; अनित्यत्वालोप प-1.
8. विशेषयेतद ज-2 अ-1, अ-3; विषयते तद अ-4.
9. पाठोऽयं प-1, अ-4; परिभाषया ज-1, ज-2, अ-1.
10. बार ककारोपदेश अ-4; वकारोपद्देश ज-2.
11. भाष्याविरोध ज-2.
12. 'छो' नाऽस्ति अ-4.
13. लिटो प-1.
14. शब्दस्याद्वित्वे अ-4.
15. 'छा' नाऽस्ति अ-4.
16. इत्यवस्था प्राक् अ-3.
17. यम्येत्यत्र दीर्घ अ-1,अ-3, अ-4.
18. उदाहरणोऽसत्यातद अ-1, ज-2, अ-3.

अत एव 'ओमाङोश्च' (6.1.95) इत्याङ्ग्रहणं चरितार्थम्। तद्धि षट्वा आ ऊढेत्यत्र परमपि सवर्णदीर्घंबाधित्वा अन्तरङ्गत्वाद्गुणे कृते वृद्धिप्राप्तौ पररुपार्थम्। साधनबोधकप्रत्ययोत्पत्त्यनन्तरं पूर्वं धातोरुपसर्गयोगे पश्चात् खट्वाशब्दस्य समुदायेन योगाद्गुणस्यान्त-रङ्गत्वमिति 'सम्प्रसारणाच्च' इति सूत्रे भाष्ये स्पष्टम्। एहीत्यनुकरणस्य शिवादिशब्दसम्बन्धे तु नास्य प्रवृत्तिर्ज्ञापकपर 'सम्प्रसारणाच्च' इति सूत्रस्थभाष्यप्रामाण्येनानित्यं प्रकृतिवदनुकरणमित्यतिदेशमादाय लब्धाङ्गत्वे एतदप्रवृत्तेः।

यत्तु पूर्वं धातुरूपसर्गेणे युज्यते पश्चात्साधनेन। उपसर्गेण=

निवृत्यर्थमिति[1] ज्ञापकेन समाधाय विप्रतिषेधात् सिद्ध[2] नैतानि सन्ति। प्रयोजनानीत्युक्त[3]याऽकिद् ग्रहण ज्ञापितांशस्य पूर्वोक्तस्यनावश्यकत्वं बोध यित्वा वर्णाश्रयत्वात्तुकोन्तरंगत्वेन ह्रस्वस्याचांगत्वेन बहिरंगत्वादयुक्तो[4] विप्रतिषेध इत्यर्थक[5] कैय्यटविवरणावतारित[6]तदंताग्रहणाद्वा अथवा[7] नैवं विज्ञायतेऽभ्यासस्याजंतस्येति कथं तर्हि अभ्यासस्य योऽच् इति भाष्येण तदनुवादक कैय्यट विवरणा[8]भ्यामे तद्भाष्यानुवादक ह्रस्व इति सूत्रस्थ शेखरग्रन्थेन च संज्ञाकृततत्वस्याश्रयणात्। अभ्याससंज्ञाप्रवृत्तिकाले स्थानि द्वारा–

---

1. निकृत्यर्थमिति अ–1, अ–3.
2. सिंध ज–2, अ–1, अ–3.
3. पाठोऽय अ–1, ज–2, अ–4; इत्युक्तयऽकिग्रहण प–1, ज–2.
4. पाठोऽयं प–1अ–1, अ–3; युक्तो अ–4; अयुक्तै ज–1; अयुक्तो ज–2.
5. इत्यर्थ अ–1, अ–3 इत्यर्थे अ–4.
6. पाठोऽयं ज–2, प–1, अ–1, अ–3, अ–4; विवरणमवतारिता तदंणाग्रहणाद्वा ज–1.
7. अधवाने चं ज–2, अ–3.
8. विचरणाभ्यामेतभ्यामेतभ्यामेतादाभाष्यानुवादक ज–2, अ–1, अ–3; विवरणाभ्यासेतद्भाष्यानु अ–4.

तत्संज्ञक शब्देन, साधनेन=कारकेण तत्प्रयुक्तकार्य्येण च। अत एवानुभूयत इत्यादौ सकर्म्मकत्वात् कर्म्मणि लकारसिद्धिरिति तन्न। क्रियायाः साध्यत्वेन बोधात् साध्यस्य च साधनाकाङ्क्षतया तत्सम्बन्धोत्तरमेव निश्चितक्रियाबोधेन साधनकार्य्यप्रवृत्त्युत्तरमेव क्रियायोग- निमित्तोपसर्गसंज्ञकस्य सम्बन्धौचित्यात्। अत एव 'सुट्कात् पूर्वः' (6.1.35) इति सूत्रे पूर्वं धातुरूपसर्गेणेत्युक्त्वा नेतत् सारं पूर्व धातुः साधनेन युज्यते पश्चादुपसर्गेणेत्युक्त्वोक्तयुक्त्या अस्यैव युक्तत्वमुक्तं साधनं हि क्रियां निर्वर्त्तयतीत्यादिना भाष्ये। उपसर्ग-

---

साक्षाद् वा संनिहितानां[1] हलामेवनुगत इति नुग्विधानात्। निवृत्तेर्ज्ञापितत्वेन[2] न दोष इति समाधिस्य विवरणे न वार्णादाङ्गमित्यस्य[3] चोभयोरादेशत्वे एव प्रवृत्तिरित्याग्रहपूर्वक ह्रस्वा[4]भाव प्रतिपादक ह्रस्व इति सूत्रस्थ शेखरग्रन्थेन च समाधानात्[5]। तुकि कृतेपि हलादिः शेषेणतन्निवृत्तौ[6] ह्रस्व सौलभ्येन वार्णपरिभाषया ह्रस्व सौलभ्येन च तद्भाष्यमेकदेश्युक्तमिति तु नाशंकनीयम्। किञ्चान्तरंगत्वाद्यादेशापेक्षयापदद्वय[7]निमित्तसमास[8] संज्ञाप्रयोज्यप्रातिपदिक संज्ञासापेक्षत्वेन[9] बहिरंगलुकः प्राबल्यप्रतिपादकभाष्येण अन्तरंग ईत्वापेक्षया समाससंज्ञासापेक्ष बहिरंगल्यपः प्राबल्यबोधक[10]भाष्येण प्रकृतपरिभाषा ज्ञापक

---

1. संविहितानाम् ज-2.
2. ज्ञापितत्वेन दोष इति प-1; ज्ञापितत्वेननु दोषः ज-2; ज्ञापितत्वेनुनदोष अ-1, अ-3; निवृत्तेर्तापितरित्यसाग्रहपूर्वकहुत्वाभाव इति पाठान्तरं उपलभ्यते अ-4.
3. वर्णदांगायस्य ज-2, अ-1, अ-3.
4. हुत्वाभाव अ-4.
5. समाधातनां तुकि प-1.
6. पाठोऽयं ज-2, प-1, अ-4 शेषेणतन्निवृत्ता अ-1, ज-2, अ-3.
7. पदद्वयानिमित्तसमासंज्ञा अ-3; यवृद्धयो नैमित्तसमास ज-2.
8. समाससंज्ञा इत्यारभ्य ईत्वापेक्षया इत्यन्तं अ-4 मातृकायां नोपलभ्यते.
9. संज्ञापेक्षत्वेन प-1; संज्ञासापेक्षत्वेमबहिरंग ज-2, अ-1, अ-3.
10. प्राबल्यप्रतिपादकभाष्येण प-1.

द्योत्यार्थान्तर्भावेण धातु नैवार्थाभिधानादुक्तेषु कर्म्मणि लकारादिसिद्धिः। पश्चाच्छ्रोतुर्बोधाय द्योतकोपसर्गसम्बन्धः। एवं च अन्तरङ्गतरार्थ-कोपसर्गनिमित्तः सुट् संकृतीत्यवस्थायां द्वित्वादितः पूर्वं प्रवर्त्तते ततो द्वित्वादि। अत एव प्रणिदापयतीत्यादौ णत्वं 'यदागमाः' (प.- 11) इति न्यायेन समाहितं भाष्ये। अत एव प्रत्येति प्रत्ययः इत्यादि सिद्धिः। अन्यथान्तरङ्गत्वात् सवर्णदीर्घे रूपासिद्धिः। यदुपसर्गनिमित्तकं कार्य्यमुपसर्गार्थाश्रितं विशिष्टोपसर्गनिमित्तकत्वात्तदन्तरङ्गम्। यत्तु न

पर[1] वाहऊठ् सूत्रस्थ भाष्येण[2] च तत्वाश्रयणबोधनाच्च। अपि च एङ् ह्स्वात्संबुद्धेरुस्य[3] पदान्तादित्यादि सूत्रस्थ शेखर ग्रंथादपि[4] संज्ञाकृतान्तरंगबहिरंग भावा[5]श्रयणलाभाच्चेति तत्प्रदर्शनानुसरण्येक दिक्।

विद्यमान[6]मपि संज्ञा[7] कृतान्तरंगबहिरंग भावमाछाद्यलक्ष्यानुरोध्यन्तरंग बहिरंगभावग्रहणे भाष्यान्तरमुपपादयन् तदुपपादिकामन्यथा कैय्यटोक्ति-मनुवदति[8]। अत्र कैय्यट इत्यादिना संज्ञापेक्ष[9]स्यापीति। अपि शब्दोक्त[10] ऊन शब्दमाश्रित्य यणा[11]देशो न शब्दमाश्रित्यगुणे इत्यंतरंग बहिरंगभावस्य[12] समुच्चायकः:-

---

1. वाह ऊठ् 6/4/132; परिवाहाउठ् ज-2; परहावा ऊठ् प-1.
2. भाष्ये रगवतत्वा ज-2, अ-3; भाष्येण चत्वारश्रयण प-1.
3. एङ् ह्स्वारं सम्बुद्धेः 6/1/69.
4. गुंदारि पि अ-4.
5. भावो अ-3.
6. पाठोऽयं ज-2, प-1, अ-1, अ-3, अ-4; विद्यमानपि ज-1.
7. संज्ञादि प-1; संज्ञाम् अ-4
8. अनुवेदिति अ-4.
9. साज्ञापेक्षस्यपिति अ-1, ज-2, अ-3.
10. शब्दौ अ-3; शब्दा अ-4.
11. यगादेशो इत्यारभ्य ऊठमंगी कुर्वतः इत्यन्तं प-1 मातृकायां नाऽवलोक्यते.
12. इत्यन्तरंगभावस्य अ-4.

तथा तत्र पूर्वागतसाधननिमित्तकमेवान्तरङ्गम्। अत एव 'न धातु' (1.1.4) इति सूत्रे प्रद्ध इत्यत्र गुणो बहिरङ्ग इति भाष्य उक्तम्।

किञ्च पूर्वमुपसर्गयोगे धातूपसर्गयोः समास ऐकस्वर्य्याद्-यापत्तिरिति 'उपपदमतिङ्' (2.2.19) इति सूत्रे भाष्ये स्पष्टम्। भावार्थप्रत्ययस्यापि पूर्वमेवोत्पत्तिः। अतएव 'णेरध्ययने' (7.2.26) इति निर्देशः सङ्गच्छते। इदं च सामान्यापेक्षं ज्ञापकं भावतिङोऽपि

तद समुच्चायकत्वे तद्व्याख्या[1]नेऽप्रवृत्यापत्तेः। **भाष्यासंगतेरिति।** गुणे संज्ञा कृतबहिरंगत्वमाश्रित्यान्तरंग त्वादूठ[2]मंगी कुर्वतः कैयटस्यान्त-रंगत्वाद्यणपेक्षया गुणे एव स्यादिति दोषप्रतिपादक भाष्यविरोधा-पत्तैरवश्यमूठ्विषये[3] विद्यमानमपि गुणे[4] संज्ञाकृत बहिरंगत्वमाच्छाद्य मदुक्त रीत्या नित्यत्वे[5] नैव पूर्वमूठ[6] सम्पा[7]द्याग्रिमभाष्येपि गुणे तत्वमाछाद्य भाष्यस्य सुयोजत्वादिति भावः। एवञ्च लक्ष्यानुरोध्य[8]न्तरंगबहिरंगभाव इति फलितम्[9]। ननु लक्ष्यानु रोध्यन्तरंगभावस्यावश्यकत्वे ऊठ[10] विषये गुणशास्त्रे संज्ञाकृतबहिरंग[11]त्वमाश्रियोत्तरभाष्येगुणे तदनाश्रित्य

---

1. तद्वयाने अ–1; तसमुच्चयकत्वे न आनेऽप्रवृत्यापनेः अ–3; तद्वानिऽप्रवृत्यापत्ते ज–2, प–1.
2. ऊठूमंगी अ–3; अंगीकुवतःअ–4.
3. विषयेविषये अ–3.
4. विद्यमानमपि गुणे माछाद्य भाष्यसुयोजत्वादिभावः एवन्चलक्ष्यानुणे संज्ञाकृतबहिरंगत्वमाछाद्यमदुक्तरीत्या नित्यत्वैनैव पूर्वमृडं इतिपाठोप लभ्यते अ–4. संज्ञाकृत इत्यारभ्य अग्रिम भाष्येपि इत्यन्तं अ–1 नास्ति.
5. नित्यानित्यत्वे नैव अ–4.
6. पूर्वमूढम् ज–2, अ–1; पूर्वमृडं अ–3.
7. संधायाग्रिम ज–2 अग्रिमभापि अ–4.
8. रोध्यंतरं बहिरंग प–1.
9. फलिताम् ज–2, अ–1, अ–3.
10. उठ अ–3.
11. बहिरंगमाश्रित्योत्तर प–1.

पूर्वमुत्पतेः। अन्यथा तत्र समासापत्तिः। तिङित्वतिङिङतिषेधात्र तत्र दोषो यदि भावतिङ्युपसर्गयोगोऽस्तीत्यलम्।

यत्तु विशेषापेक्षात्सामान्यापेक्षमन्तरङ्ग विशेषापेक्षे विशेषधर्म्मस्याधिकस्य निमित्तत्वात्। यथा 'रूदादिभ्यः सार्वधातुके' (7.2.66) इत्यत्र रूदादित्वं सार्वधातुकत्वं च। तत्र सार्वधातुकत्वज्ञानाय प्रकृतेर्धातुत्वज्ञानं प्रत्ययस्य प्रत्ययत्वज्ञानं चावश्यकमिति यासुडन्तरङ्गः।

एतेन यद् 'अनुदात्तङितः' (1.3.13) इति सूत्रे कैयटेनोक्तं 'लमात्रापेक्षयाऽन्तरङ्गास्तिवादयः, लकारविशेषापेक्षत्वाद्बहिरङ्गाः

भाष्यं[1] सुयोजमिति क्व[2] कैयटस्य विरोध इति चैत् वाढ़[3] मदुक्तरीत्या नित्यत्वेनैव गुण[4] वाधसिद्धौ वैरुप्येण भाष्य[5] योजनस्य परिभाषया वाधनस्य चानुचित[6]त्वात्। स्पष्टश्चायमर्थो नित्यत्वांतरंगत्वयुक्त[7]त्वेपि चङीत्यस्य नित्यत्वेनैव णौचङ्युपेत्यस्य बाधने भाष्ये तथैत्येधत्यूठ[8]स्विति सूत्रे शब्दरत्ने अत्रैव[9] पूर्वं मूले च[10]। एतेन संज्ञाकृत्तान्तरंग बहिरंग[11]त्वस्य गुणे सत्वेनेति। मूलग्रन्थं प्रत्याहार[12]त्रयं तददि–

1. भाव्ये ज–2, अ–1, अ–3.
2. पाठोऽयं ज–2, प–1, अ–1, अ–3, अ–4; स्वयं कैयटस्य ज–1.
3. चैद्वटं अ–4.
4. गुबाध ज–2, अ–1, अ–3.
5. भाष्ये.
6. चामुचितत्त्वात् प–1.
7. अन्तरंगत्वसूक्तत्वेपि ज–2; अन्तरंग प्लुकृत्वेपि अ–1; अन्तरंगत्वदनुक्रत्वेपि अ–3.
8. तथेत्येधारूढस्विति ज–2. तथैवत्येधत्यूदत्विति अ–4.
9. अत्रैक प–1.
10. पाठोऽयं ज–2, प–1, अ–1, अ–3, अ–4, प–2; मूलैव ज–1.
11. बहिरंगभावनाश्रयेकं ग्रन्थार्थं बुध्यातदंतविधापि बहुपेदार्थापेक्षत्वरूप बहिरंगत्वस्य गुणे सत्वेवेति इति पाठोपलभ्यते प–1 मातृकायां.
12. प्रत्यहरत्रय प–1, प–3; प्रत्याहारं त्रयम् अ–4.

स्यादयः' इति तत्परास्तम्। विशेषापेक्षत्वेऽपि तस्य सामान्यधर्म्म-निमित्तकत्वाभावेन तत्त्वस्य दुरुपपादत्वात्, परनिमित्तकत्वेन स्यादीनां बहिरङ्गत्वाच्चेति तन्न। विशेषस्य व्याप्यत्वेन व्यापकस्यानुमानेनोपस्थितावपि तस्य निमित्तत्वे मानाभावेनाधिकधर्म्म निमित्तकत्वानुपपादनात्। भाष्य एवंविधान्तरङ्गबहिरङ्गभावस्य क्वाप्यनुल्लेखाच्च।

यत्तु मतुप्सूत्रे भाष्ये पञ्च गावो यस्य सन्ति स पञ्चगुरित्यत्र मतुप्प्राप्तिमाशङ्कय प्रत्येकमसामर्थ्यात् समुदायादप्रातिपदिकत्वात् समासात् समासेनोक्तवादिति सिद्धान्तिनोक्ते नैतत्सारमुक्तेऽपि हि

तदन्तेविधी[1] च द्वे इत्येवं यणोपि पंचकाश्रयत्वात् पुनरपि समत्वादिति ग्रंथेन दूषयित्वा च केयटभूषण[2] कुर्वन्तो भकारे दकारमंगीचक्रुः केचित्। किञ्च यथाश्रुतेपि गुणेंण इक लघु उपधा[3] आर्द्धधातुक गुणानां षण्णां[4] सत्वेन कथं साम्यप्रतिपादनमिति[5] तु एवे[6]कान्ते प्रष्टव्या इति दिक्।

वह्वपेक्ष[7]त्वाल्पापेक्षत्वयोरिति। सर्वं वाक्यं सविधारणमिति न्यायेन तयोरेवेत्यर्थः[8]। एवं चान्य विधस्यापि अंतरंग बहिरंग[9]भावस्य ग्रहीतु[10]

---

1. पाठोऽयं प-1; तदन्त विधोचर्द्वे ज-1; तदेत्व विधीवद्वेत्येव ज-2, अ-1, अ-3.
2. भूषण कुर्व मकारे दकारे प-1.
3. उपधाजार्ध धातुक अ-1, अ-3; उपधातुक गुणानां प-2.
4. पाठोऽयं प-1, प-2; षणां सत्वेन ज-1, ज-2, अ-1, अ-3; षणत्षंगसत्वेन अ-4.
5. साम्यमतिपादनम् प-2.
6. तदावैकांते ज-2.
7. सं. पाठः.
8. न्यायेनतयोरेनेत्यर्थः ज-2, अ-1, अ-3; न्यायोरेवेत्यर्थ प-2.
9. बहिरंग नाऽवलोक्यते प-1, प-2, अ-4.
10. पाठोऽयं प-1, प-2, अ-3, अ-4; गृहीतुं ज-1, ज-2.

प्रत्ययार्थ उत्पद्यते द्विगो स्तद्धितो यथा पान्चनापितिरिति पूर्वपच्युक्तिर्भाष्ये। 'द्विगोर्लुगनपत्ये' (4.1.88) इति लुग्विधाना-त्तद्धितार्थद्विवगोस्तद्धितो तद्धितो भवति पञ्चगुशब्दश्च द्विगुरिति तदाशयं कैयटः। ततो द्वैमातुरः, पाञ्चनापितिः, पञ्चसु कपालेषु संस्कृत इत्यादौ सावकाशद्विगोर्बहुव्रीहिणा प्रकृते परत्वाद्बाध इत्याशयेन नैव द्विगुः। कस्तर्हि? बहुव्रीहिरिति सिद्धान्तिनोक्ते तमवकाशमजानानोऽपवादत् वाद् द्विगुः प्राप्नोतीति पूर्वपक्षी। अन्यपदार्थैः सुबन्तमात्रस्य विधीयमानबहुब्रीहेः संख्यायास्तद्धितार्थे विधीयमानो द्विगुर्विशेष विहितत्वाद्बाधकः प्राप्नोतीति कैयटः। ततः सिद्धान्त्येक-देश्याह, अन्तरङ्गत्वाद्बहुब्रीहिः। कान्तरङ्गता? अन्यपदार्थे बहुब्रीहि-विशिष्टेऽन्यपदार्थे द्विगुस्तस्मिश्चास्य तद्धितेऽस्तिग्रहणं क्रियत इति। अधिकास्त्यर्थापेक्षमत्वर्थनिमित्तो द्विगु र्बहिरङ्ग इति कैयट इति। नेषा

शक्यत्वेन संज्ञाकृत[1] तत्वमाश्रित्य भाष्यविरुद्धान्तरंगबहिरंग कल्पनातवानुचितेति भावः[2]। अङ्ग[3]शब्दे नेति। प्रकृत विषये इत्यर्थः। यथाश्रुतन्तु न साधु[4]। पूर्वोक्त रीत्या अनेक विधांतरंगबहिरंगभावमध्ये शब्दरूपं निमित्त[5]मादाय भाष्यप्रवृत्तिरित्युक्तया प्रथमदूषणस्य तवाप्यंग[6]शब्देन शब्दरूपं[7] निमित्तं ग्राह्यमित्यत्र मदुक्तानेकपूर्वोक्त भाष्य[8]विरोधादवश्य माश्रयणीयेन[9] संज्ञादि कृतांतरंग बहिरंगभावेन द्वितीयदूषणस्य ऊठो नित्यत्वेनापि -

---

1. संज्ञा कृत्यव प-1.
2. भाः अ-4.
3. पाठोऽयं प-1, अ-1, अ-3, अ-4; अन्तरंग शब्देने प्रकृत ज-1; अंतरंगशब्देनेति ज-2.
4. साध ज-2.
5. निमित्तं ग्राह्यमित्यत्रमदुक्तानेक पूर्वोक्त इति प-1 मातृकायां पाठो पत्यते.
6. तवाप्यंवा शब्देन ज-2, अ-1, अ-3.
7. शब्देरूपं मितं ज-2, अ-1, अ-3.
8. भाविरोधाद प-1.
9. 'न' नास्ति अ-4.

सिद्धन्त्युक्तिरेतावताप्यपवादत्वाहानेः। अच् सामान्यापेक्षयणो विशिष्ट-सवर्णाजपेक्षदीर्घेण बाधदर्शनात्।

किञ्च उक्तरीत्या परत्वेनैव बाधसिद्धेः। किञ्च अत्राधि कापेक्षत्वेनैव बहिरङ्गत्वम्; न केवलविशेषापेक्षत्वेनेति नैतद्भाष्यारूढं विशेषापेक्षस्य बहिरङ्गत्वम्। अतएव सुबन्तसामान्यापेक्षो बहुब्रीहि-स्तद्विशेषापेक्षो द्विगुरिति नोक्तं भाष्ये। न चार्थकृतबहिरङ्गत्व-स्यानाश्रयणादिदमयुक्तम्, एकदेश्युक्तित्वेनादोषात्। अत एवास्तिग्रहणं नोपाध्यर्थं, किन्तु अस्तिशब्दान्मतुबर्थमिति त्वदभिमतं बहिरङ्गत्वमपि

गुणस्य वारयितुं[1] शक्यत्वेन तृतीय दूषणस्यानयैवयुक्त्या चतुर्थस्य तदादितदन्त[2] विध्युपक्रमा[3] दूनशब्दमाश्रित्येत्युक्तं भाष्ये इत्युक्तया[4] मूलोक्त पञ्चमदूषणस्य च क्रमेण-

परिहर्तुं शक्यत्वात्। किञ्च संज्ञा[5]कृततत्वानाश्रयणे पूर्वोक्ता नेक भाष्यकोपाच्चेति दिक्। **संज्ञा कृतबहिरंगत्वस्येति।** अस्य प्रकृते इति शेषः। एतत्परिभाषाविषये यथोद्देश[6]पक्षस्यैववक्ष्यमाण[7]त्वादेतत्। षष्ट्या[8] न लोपस्या सिद्धत्वेनानयालोपस्यासिद्धत्व[9] प्रतिपादना योगादिति भावः। किञ्चा[10]नंतरस्येति न्यायेन ङीप[11] एव निषेध इति शंकायाः भाष्योक्त

---

1. वारयित्वम् ज-2, अ-1.
2. तदादिरतदन्त प-1.
3. क्रमादून ज-2, प-1, अ-1, अ-3.
4. उक्तभाष्यो प-2, ज-2, अ-1, अ-3.
5. संज्ञोकृत अ-1, अ-3.
6. यथोदेश अ-1, अ-3; यथोद्देशपक्ष्यस्यैव अ-4.
7. माणत्वादतदृष्ट्या अ-1, अ-3.
8. पाठोऽयं प-1, प-2, अ-1, अ-3, अ-4, दृष्ट्या न ज-1, ज-2.
9. असिद्धत्विप्रति ज-2, अ-3; असिद्धत्वे नानयसालोपे अ-1, अ-4.
10. किं चानंतस्येति प-1, प-2.
11. ङिप एव प-1 ङी एव अ-4.

द्विगोर्नास्तीति प्रतिपाद्य सिद्धान्तिना 'मत्वर्थे द्विगोः' प्रतिषेधो वक्तव्यः इति वचनेनैतत्सिद्धमित्युक्तम्। अत एव 'तदोः यः सौ (7.2.106)' इति सूत्रेऽनन्त्योरिति चरितार्थम्। अन्यथा प्रत्ययसामान्यापेक्षत्वेनान्तरङ्गत्वादन्त्यस्यात्वेऽनन्त्यस्यैव सत्वे सिद्धे तद्वैयर्थ्यं स्पष्टमेव। 'पादः पत्' (6.4.130) इति सूत्रे भाष्यकैयटयोरप्येतदन्तरङ्गत्वाभाव एव सूचित इति सुधियो विभावयन्तु।

नन्वेवमसुस्नुवदित्यत्र लघूपधगुणादुवङोऽल्पनिमित्तत्वाभावादुवङ्

व्याख्याने नैव वारणीयत्वाच्चेत्यप्याशयः। अत एव वृद्धैरपि[1] अन्यत्र संज्ञा[2] कृततत्वाश्रयणेपि अत्र तदनाश्रयणमित्युपसंहारोऽस्यकृत इति ध्येयम्[3]। **अत एव कृतीति।** अत एवेत्यस्य न लोप विषये संज्ञाकृत बहिरंग[4]त्वानाश्रयणादेवेत्यर्थः। **नमानमिति।** अत्र विषयेत्यर्थः। यथाश्रुतं तु न साधीयः[5]। परिभाषा ज्ञापक परभाष्येण[6] संज्ञाकृतबहिरंगत्वस्य लाभेन[7] पूर्वोक्तानेकभाष्येण[8] च प्रथम दूषणस्य अपर[9] निमित्तकत्वांतरंगत्वस्य[10] न लोपे सत्वात् परिभाषया तुग्वारणस्य कर्त्तुं[11]मशक्यत्वेन कृति तुग्ग्रहणस्य सार्थक्यात्। द्वितीय[12]दूषणस्य-

---

1. वृद्रेरपि प-1; कृद्धेरपि प-2; वृद्यैरपि अ-4.
2. संज्ञाकृत बहिरंगत्वातत्वाश्रयणेपि प-1, प-2.
3. ध्येयः प-2; ध्येयाम् अ-4.
4. रंगत्वनाश्रयणाद् प-2; बहिरंगत्वस्यानाश्रयणाद् अ-4.
5. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; सध्वीयः ज-1.
6. परिभाष्येण ज-2; ज्ञापकर भाष्येण अ-4.
7. सामनेज-2, अ-1; लाभौ न प-1; भावेन अ-3; लाभेन इत्यारभ्य कृत्वांतरंगत्वस्य इत्यन्तं अ-4 मातृकायां नाऽस्ति.
8. भाष्ये नण च प-1.
9. अपहनिमित्त ज-2.
10. कत्वातपरंगत्वस्य अ-3.
11. कतु प-1.
12. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; द्वितीय ज-1.

न स्यादिति चेत्? न। तत्रान्तः कार्य्यत्व रूपान्तरङ्गरङ्गत्वसत्त्वात्। अन्तः कार्य्यत्वं च पूर्वोपस्थितनिमित्तकत्वमङ्गशब्दस्य निमित्तपरत्वात्। इदमन्तरङ्गत्वं लोकन्याय सिद्धमिति मनुष्योऽयं प्रातरुत्थाय स्वशरीरकार्य्याणि करोति, ततः सुहृदाम्, ततः सम्बन्धिनाम्। अर्थानामपि

चोद्धर्त्तुं[1] शक्यत्वात्। पदार्थमुक्त्वा[2] वाक्यार्थमाह। **अंतरंगे कर्त्तव्ये**[3] इति। **त्रिपाद्यां न प्रवर्त्तते इति।** यत्तु कैय्यटानुयायिनः अनया अतरंग[4] बलीय इत्यस्याः प्रत्याख्यानेपि[5] प्रत्यगवर्तीति लोकन्यायसिद्धाच:[6] परस्मिन्निति सूत्रभाष्योक्त परिभाषायाः प्रत्याख्यानाभावे[7]नास्यात्रिपाद्यां प्रवृत्तौ न बाधक[8]मित्यूचुस्तत्त्वनबधानग्रस्तम्[9]। पूर्वप्रदर्शिता चः परस्मि[10]न्निति सूत्रभाष्यात्प्रत्यंगवर्त्तिलोकन्याय[11] सिद्धोऽयमर्थ इति। यत्र युगपदु[12]भयप्रसंगस्तत्रैव प्रवर्तमानो वाहऊठ्[13] सूत्रीयासिद्ध परिभाषाया[14] न संग्राहक इति पूर्वमुक्ता[15] अग्रे च लोकन्याय सिद्धायाः त्रिपाद्यां प्रवृत्ति स्वीकारेण परस्पर[16] विरोधात्।

---

1. वोद्धतुम् ज-2.
2. पदार्थमुमुत्कवाक्यार्थम् प-2; पदार्थमुत्का प-1; पदार्थ मुक्ता अ-1, अ-3, अ-4.
3. कर्त्तव्य ज-2, अ-1, अ-3.
4. अंतरंग बलिय ज-2, अ-1; अंतरवलिय अ-3, अ-4.
5. प्रत्याख्यानोपि प्रत्यंगवतीति प-2; प्रत्याख्यानेपि प्रत्ययर्गतीति अ-4.
6. सिद्धाव: ज-2, अ-1, अ-3.
7. भावेनस्याः ज-2.
8. न बाधके प-2.
9. पाठोऽयं ज-2, प-1, अ-1, अ-3, अ-4; ग्रस्ते ज-1; वधातग्रस्ते प-2.
10. परस्मिंति प-2.
11. पाठोऽयं ज-2, प-1, प-2, अ-1 अ-3, अ-4; न्याये ज-1.
12. युगपद भय ज-2, अ-1; युगपदभाय अ-3.
13. उठ अ-3 ऊह ज-2.
14. परिभाषया अ-4; उट् प-2.
15. पूर्वमुक्त्वा अ-1, अ-3; पूर्वक्त्वा अ-4.
16. स्वीकारेण परेण परस्पर प-2.

जातिव्यक्तिलिङ्गसंख्याकाराकाणां बोधक्रमः शास्त्रकृत्कल्पितस्तत्क्रमेणैव च तद्बोधकशब्दप्रादुर्भावः कल्पित इति तत्क्रमेणैव तत्कार्य्याणीति षट्व्येत्यादावन्तरङ्गत्वात् पूर्वं पूर्वयणादेशः परयणादेशस्य बहिरङ्गतया असिद्धत्वादित्यनेन 'अचः परस्मिन्' (1.1.57) इति सूत्रे भाष्ये स्पष्टम्। तदपि युगपत्प्राप्तौ पूर्वप्रवृत्तिनियामकमेव। यथा पट्व्येत्यत्र पदस्य विभज्यान्वाख्याने न तु जातस्य बहिरङ्गस्य तादृशेऽन्तरङ्गेऽसिद्धतानियामकं प्रागुक्तलोकन्यायेन तथैव लाभादिति 'वाह ऊठ्' (6.4.132) सूत्रे कैयटे स्पष्टम्। अत एव वाय्वोरित्यादौ वलि लोपो यणः स्थानिवत्त्वेन वारितो 'अचः परस्मिन्' इत्यत्र भाष्यकृता। क्रमेणान्वाख्याने तु उक्तोदाहरणे पूर्वप्रवृत्तिकत्वमप्यन्तरङ्गत्वं बहिरङ्गत्वासिद्धत्वमपि निमित्ताभावादप्राप्तिरूपं बोध्यम्।

यत्तु एवं रीत्या पूर्वस्थानिकमप्यन्तरङ्गमिति तच्चिन्त्यम्, स्रजिष्ठ इत्यादौ विन्मतोर्लुकि टिलोपस्थापवादविन्मतोर्लुक् प्रवृत्त्या जातिपक्षाश्रयणेन वारण प्रयासस्य 'प्रकृत्यैकाच' (6.4.163) इति सूत्रप्रयोजनखण्डनावसरे भाष्यकृत्कृतस्य नैष्फल्यापत्तेः। त्वदुक्तरीत्या विन्मनोर्लुको बहिरङ्गासिद्धत्वेन अनायासतस्तद्वारणात्। भाष्य ईदृशरीत्या बहिरङ्गासिद्धत्वस्य क्वाप्यनाश्रयणाच्च। परिभाषायामङ्गशब्दस्य निमित्तपरत्वाच्च।

इयं चोत्तरपदाधिकारस्थबहिरङ्गस्य नासिद्धत्वबोधिकेति 'अच एकाचोऽम्' (6.3.68) इति सूत्रे भाष्ये पूर्वपक्ष्युक्तिरिति सा नादर्त्तव्या। परन्तप इत्यादावनुस्वारे नासिद्धत्वं मुमस्त्रिपाद्यामेतदप्रवृत्तेः। नव्यमतेऽपि यथोद्देशपक्षात्रयणेनान्यथासिद्धोदाहरणदानेन तस्य तदुक्तित्वमावश्यकमित्याहुः।

आभीयेऽन्तरङ्ग आभीयस्य बहिरङ्गस्य समानाश्रयस्य नानेनासिद्धत्वमसिद्धत्वादित्यसिद्धवत्सूत्रे भाष्ये स्पष्टम्। एवं सिचिवृद्धेर्येन नाप्राप्तिन्यायेनान्तरङ्गबाधकत्वमूलकं न सिच्यन्तरङ्गमस्तीति 'इको गुणो' (1.1.3) इति सूत्रे भाष्ये स्पष्टम्।।50।।

नन्वेवमक्षद्यूरित्यादौ बहिरङ्गस्योठोऽसिद्धत्वादन्तरङ्गो यण् न स्यादत आह-

नाजानन्तर्य्ये बहिष्ट्वप्रक्लृप्तिः॥51॥

अत्र 'षत्वतुकोः' (6.1.86) इति सूत्रस्थतुग्ग्रहणं ज्ञापकम्। अन्यथाधीत्य प्रेत्येत्यादौ समासोत्तरं ल्यप्प्रवृत्या पूर्वं समासे जाते तत्रसंहिताया नित्यत्वाल्ल्यबुत्पत्तिपर्यन्तमप्संहितयावस्थानासम्भवेनैकादेशे

तथा हि त्रिपादिस्थ पूर्व परशास्त्राणां यद्यु[1]गपदेकत्र प्रसंगस्तदाप्रवृत्तिर्युक्ता स्यात्तदेव[2]। पूर्व प्रतिपरासिद्धत्वेन युगपत्प्राप्त्याभावात्[3]। किञ्च पूर्वत्रेत्यनेन शास्त्रसिद्धायाः परिभाषायाः यादृश विरोधेनबाधस्तादृश विरोधस्यात्रापि सत्वात्। अनुमिताया अपि बाधने[4] लोकन्यायसिद्धाया बाधने[5] तस्य श्रमाभावाच्चेति[6] दिक्। यथा गुरुवत् गुरुपुत्र[7] इति लोकन्यायेन हंते[8] कार्यं वधेः स्यात्तत्किं स्थानिवत्सूत्रेणेत्याशंक्य[9] स्वरुपेति परिभाषणात्धंतेः[10] कार्यं वधेर्नस्यादिति तदित्युक्तं तथा[11] प्रकृते भावः। बहिरंगसंप्रसारणस्यासिद्धत्वादिति। एऐन संज्ञाकृत बहिरंगत्वस्य परंपरया प्रत्ययनिमित्तकबहिरंगत्वस्य च ग्रहण[12]

---

1. शास्त्रानामयुगपद् ज-2.
2. स्यातदेव ना ज-2, अ-1, अ-3.
3. युगपप्राप्त्यभावात् प-1, प-2, अ-1, अ-3, अ-4.
4. वाधेन अ-1; बाधेने अ-3.
5. वधने ज-2; वाधिते अ-4.
6. तस्यश्रन्या भावाच्चेति अ-4.
7. गुरपुत्र प-2.
8. हंनकार्यवधेः ज-2; हने अ-1, अ-3; हंतेः प-1, अ-4; हंतः प-2.
9. आशक्यम् प-2.
10. परिभाषगाद्वतेः ज-2, स्वेतेवधेन प-1; परिभाषणात्धतेऽकार्य अ-1, अ-3; परिभाषधंतेः अ-4.
11. तथा प्रकृतेति भावः ज-2, अ-1, अ-3, अ-4; तथा प्रकृतेपीति भाव प-1, प-2.
12. ग्रह परिभाषायां प-1, प-2.

ल्यपि तुगपेक्षया पदद्वयसम्बन्धिवर्णद्व यापेक्षैकादेशस्य बहिरङ्ग-तयाऽसिद्धत्वेन तद्वैयर्थ्यं स्पष्टमेव। पदद्वयसंम्बन्धिवर्णद्वयापेक्षैकादेशस्य बहिरङ्गत्वमिति प्रेद्ध इत्यादौ गुणो बहिरङ्ग इति ग्रन्थेन 'न धातुलोप:' (1.1.4) इति सूत्रे 'संयोगान्तस्य लोप:' (8.1.23) इति सूत्रे च भाष्ये स्पष्टम्।

यत्तु षत्वग्रहणमपि ज्ञापकम्, अन्यथा कोऽसिचदित्यादौ पदद्वयसम्बन्धिवर्णद्वयापेक्षत्वेन बहिरङ्गस्यैकादेशस्यासिद्धत्वेन

परिभाषायां सूचितम्।

अत्र देवानां प्रिय:[1] कश्चित्। अत्र सम्प्रसारणपदेन संप्रसारण[2]स्थानी लक्ष्यते। एवञ्च सम्प्रसारणस्यासिद्धत्वात् इत्यस्य सम्प्रसारण[3] स्थानिकपूर्वरूपस्यासिद्धत्वादित्यर्थ:। तथा च नवीन[4] मतेन संज्ञाकृत[5] बहिरंगत्वस्य न वा परम्परया[6] प्रत्ययनिमित्तक बहिरंगत्वस्य प्राप्तिरित्याह। तत्तु[7] विप्रतिषेध सूत्रस्थ पदयं वाहऊठ् इति ऊठ[8] शास्तीति[9] परिभाषाज्ञापकपरभाष्य[10]स्थ ज्ञापकोपपादक[11] कैय्यटग्रंथीयगुणेकृते वृद्धौ कृतायामिति ग्रन्थ व्याख्या[12] परसत्यां च परिभाषायां विभक्ति निमित्तक[13]

---

1. प्रिय ज-2, अ-1, अ-3, अ-4.
2. संप्रसारण पद स्थानी अ-4.
3. संप्रसारणम् अ-4.
4. नविन प-1; नवनमतेन अ-3.
5. संज्ञकृत अ-4 यज्ञाकृत प-2.
6. परम्पराया प-2.
7. यत्तु ज-2, अ-1, अ-3, अ-4.
8. उठम् अ-3.
9. शास्तिति प-1; शास्तोति ज-2.
10. परिभाष्यस्थम् ज-2; ज्ञापकरं भाष्यस्थं अ-1, अ-3.
11. उपपादूक प-1.
12. पाठोऽयं ज-2, प-1, अ-1, अ-3, अ-4; ग्रन्थव्यापार सत्यां च ज-1.
13. निमित्तकम् प-1, प-2.

षत्वाप्रवृत्तौ किं तेनेति तन्न। इणः पूर्वपदसम्बन्धित्वेन षत्वस्यापि पदद्वयसम्बन्धिवर्णद्वयापेक्षत्वेन उभयोः समत्वात्। एकादेशस्य परादिवत्त्वेनौसिचदित्यस्य पदत्वेन सस्य पदादित्वाभावान्न 'सात्पदाद्योः' (8.3.111) इत्यनेन निषेधः। त्रैपादिकेऽन्तरङ्गे कार्यकालपक्षेऽपि

सम्प्रसारणस्यासिद्धत्वाद्। गुणाभावे रुपासिद्धौ ऊठ् ग्रहण[1]मिति विवरणग्रन्थेन लघुभांडस्थित[2] लघु[3]मर्कटबद्धमुष्टिस्थ चणक[4]तुल्यत्वं प्रापितमिति न मत्कृत यत्न[5]मपेक्षते। एवञ्च मन्मता ज्ञानपूर्विकायुक्तिरिति बोध्यम्। न च वाह ऊठ् सूत्र[6]भाष्यस्थसंप्रसारणपदे[7] लक्षणेति मदाशय[8] इति चैत्तर्हि प्रापित[9]स्त्वदीयनवीनग्रन्थाभिनिवेश[10] स्त्यैवदत्तजलाञ्जलित्वम्। किञ्च[11] नवीनप्राचीनो[12]भयमार्गभ्रष्टस्य तव[13]जनैरसंभाव्यतैवायातीति कथं न पर्या[14]लोचये नहि–

---

1. गुणमिति प–1, प–2.
2. पाठोऽयं ज–2, प–1, प–2; भांडस्थिलघुमोड स्थित अ–3; लघु भांडस्थे अ–4; भांडास्थित ज–1.
3. कर्मट प–1.
4. चणकि ज–23, अ–1, अ–3.
5. पाठोऽयं अ–4; कृतपलमपेक्षते ज–1; कृतज्ञमपेक्ष्यते प–1; कृतलमपेक्षति प–2; कृतपलमपक्षते ज–2 कृतज्ञमपेक्ष्यते प–1; कृतलमपेक्षाते प–2; विवरणग्रंथेन इतयारभ्य अपेक्षते इत्यन्तं पुन रावृत्तिरस्ति प–2.
6. सूत्रस्थभाष्यसंप्रसारणे प–1, प–2, अ–4.
7. पाठोऽयं ज–2, प–1, प–2, अ–1, अ–3, अ–4; पदलक्षणेति ज–1.
8. मादाशय रति ज–2, अ–1, अ–3; तदाश इति अ–4.
9. प्राप्तितस्त्वदीय अ–4.
10. निविशस्त्वयेव अ–1, अ–3, ज–2.
11. पाठोऽयं ज–2, अ–1, अ–3.
12. प्राचीनोभयम् ज–1; प्रावीन प्राचीनोभय प–2.
13. तवननैरसभाष्यतेवाद्यानीति कथं ज–2; जनैरसंभाव्यतैवायानीति अ–1, अ–3.
14. पर्यालोचये: ज–2, अ–4; पयौलोचये: अ–1, अ–3; प्रयालोचये:, प–1.

प्राचीन[1]नवीनैः सम्प्रसारण[2]पदस्य भाष्यस्थ तादृशोर्थः[3] कृतः। ननु भाष्यस्थ[4] संप्रसारणपदेऽवश्य[5] लक्षणाऽभ्युपेया विभक्तिनिमित्तक सम्प्रसारण-स्यासिद्धत्वादिति विवरणस्य[6] त्वयमर्थः विभक्ति निमित्तक सम्प्रसारण स्थानि[7]कस्येति एवञ्च न[8] विरोधः[9]। अन्यथा[10]पूर्वंसम्प्रसारणे पश्चात् पूर्वरूपेण सम्प्रसारण[11]पहारे सम्प्रसारणाभावेनांतरंगगुणदृष्टया सम्प्रसारणस्यासिद्धत्वं वक्तुमशक्यं स्यात्। पूर्वस्य परस्य वा कार्याभावेन[12] सम्प्रसारणस्याल् वृत्तित्वे नाल् मात्रवृत्तित्वेन परिभाषा[13]प्रवृत्तिरुपा[15] शास्त्रोपकायेऽतिदेश प्रवृत्यभावेन[16] चाचः परस्मिन् स्थानिवदादेश[17] अंतादि वच्चेत्यन्यत्तम सूत्रेणाति[18]दिष्टे इति[19] –

1. प्राचिन प–1.
2. पदस्या ज–2; संप्रसारपदस्य प–1.
3. तादृशोर्थतः ज–2, अ–3.
4. भाष्यस्थं अ–1, अ–3.
5. अचश्यं ज–2, अ–3, पदऽवश्य प–2.
6. विवरणास्य अ–4.
7. स्थासिद्धत्वादिति कल्येति एवं च न विरोध इति पाठः अ–4.
8. 'न' नोपलभ्यते प–1, प–2.
9. विराधः अ–1, अ–3.
10. जन्यथा ज–2, अ–1, अ–3.
11. पाठोऽयं अ–1; सम्प्रसारणापहारि ज–1, सम्प्रसारणस्यापद्वारे ज–2; सम्प्रसारणाभावेनांतरंग प–2, अ–3, अ–4, प–1.
12. कार्याभावतसम्प्रसात्वस्याल् प–2.
13. परिभाषाया ज–2.
14. रूप अ–3.
15. पाठोऽयं ज–2, प–1, अ–1, अ–3; शास्त्रीय कार्येऽति ज–1, अ–4; शास्त्रीय कार्योऽति प–2.
16. अभावेन व अवः ज–2, अ–1, अ–3.
17. देशे प–1.
18. सूत्रेणादितिष्टे अ–4.
19. रष्टसिद्धिरिति ज–2, अ–1, अ–3, अ–4; अष्टसिद्धिरिति प–2; इष्टसिद्धित्वेरिति प–1.

बहिरङ्गपरिभाषाया अप्रवृत्तेः पूर्वमुपपादित्वाच्च।

परिभाषार्थस्तु- अचोऽन्यानन्तर्यनिमित्तकेऽन्तरङ्गे कर्त्तव्ये जातस्य बहिरङ्गस्य बहिष्ट्वप्रक्लृप्तिर्न। बहिष्पदेन बहिरङ्गम्, तस्य भावो बहिष्ट्वम् (बहिरङ्गत्वम्) तत्प्रयुक्तासिद्धत्वस्य न प्रक्लृप्तिः न प्राप्तिरिति। असिद्धं बहिरङ्गमित्युक्त्वा नाजानन्तर्य इति वक्ष्यामीति भाष्योक्तया तत्रत्यस्यान्तरङ्ग इत्यस्यानुवृत्तिसूचनात्। तेन पचावेदमित्यादौ न दोषः। अन्तरङ्गस्याच्स्थानिक कार्यस्यैत्वस्यान्यानन्तर्यनिमित्तकत्वाभात्। जातस्य बहिरङ्गस्येत्युक्त्याऽयजे इन्द्रं धियतीत्यादौ बहिरङ्गीर्ध-गुणादेरसिद्धत्वं सिद्धम्। अत एव 'इण् ङिशीनामाद्गुणः सवर्ण-दीर्घत्वाच्चङन्तस्यान्तरङ्गलक्षणत्वात्' इत्यादि संगच्छते। अत एव 'ओमाङोश्च' (6.1.95) इत्याङ्ग्रहणं चरितार्थम्। तद्धि शिव आ

सिद्धिरिति तु नाशंक्यमिति चेन्न। बाह ऊठ् इत्यस्यांगाधिकारस्थत्वेन तदन्त[1]विधौ वाहान्तं पदंगंतस्य[2] सम्प्रसारणमित्यर्थे गावयव[3] यण् द्वयस्यापि युगपत्सम्प्रसारण[4] प्राप्तौ न सम्प्रसारण इति निषेध ज्ञापकेन परस्य यणः पूर्वं[5] सम्प्रसारणे तदानीं[6] पूर्वरूपेण कर्तव्ये द्वितीयसम्प्रसारणस्याप्राप्तौ निषेधस्याप्राप्त्या[7] पूर्वरूपे अचः परस्मिन्निति स्थानिवत्वेन परत्वात्[8]-

---

1. ददंतविध ज-2; तदंविधौ अ-2.
2. वांहते यतदंगंतस्य अ-4.
3. ऽगावगायणद्वय ज-2, अ-3जावयव यण प-2; अगावयवयण प-1; ऽणावयण् अ-1, अ-4.
5. सम्प्रसारणे अ-4.
5. पूर्व प-2.
6. तदपूर्वरूपे नित्यत्वात् कर्त्तव्ये प-1, प-2. पूर्वरूपेकर्तव्ये अ-1, अ-3, अ-4.
7. सौ निषेधस्याप्य प-2, प-1.
8. पाठोऽयं प-1, प-2 पूर्वे ये अचः ज-1; पूर्व ये अवः ज-2, अ-1, अ-3, अ-4.

प्राप्तगुण[1] प्रतिबंधे पश्चात्प्राप्त द्वितीयसम्प्रसारणस्य[2] न सम्प्रसारण इति निषेधे कर्त्तव्येऽचः परस्मिन्नित्यनैनातिदिष्ट[3] सम्प्रसारणत्वमादाय तस्यापि निषेधेपश्चात् परिभाषयाऽसिद्धत्वे[4] बोध[5]नीये वाक्य संज्ञापक्षे सम्प्रसारणाच्चेत्यस्याऽरोपित सम्प्रसारणादित्यर्थे[6]स्यावश्यकतया संप्रसारणत्वस्य वाक्य वर्णोभय[7] वृत्तित्वेनाल् मात्रवृत्तित्वाभावेनांतादिवत्सूत्रस्थापि[8] वंतीत्यत्रान्तरंगत्वात् शवकारांत्याकारयोरेकादेशेन पूर्वांतत्त्वेनातिदिष्ट शित्वमादायपिवादेश प्रवृत्तिकरणवत् प्रकृतेप्यतिदेशकरणेना[9]दोषात् हूतं इत्यत्रा सम्प्रसारणत्वाद्दीर्घो न स्यादित्यांशक्य दीर्घ विधि सामर्थ्यादंतवत्वाद्वेति भाष्यव्याख्यान परहल[11] इति सामर्थ्यात् वर्णवृत्तिधर्मस्याप्यतिदेश इति विवरणं[12] तु वर्णसंज्ञापक्षमाश्रित्य प्रवृत्तमिति[13] नास्माकं प्रतिकूलतामावहति[14]। किं च भाष्येपि मदुक्तरीत्यैव व्याख्योचिता। अन्यथा पक्षयो[15]र्भेदो न[16] स्यादिति दिक्।

---

1. गुणप्रवृत्तिप्रतिबंधे ज-2, अ-1, अ-3, प-1.
2. संप्रसारणे इति प-1.
3. तादि दिष्ट अ-4; दिष्ट प-2.
4. परिभाषाऽसिद्धत्वे प-2.
5. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; बोधनीयाक्य संज्ञा ज-1.
6. पाठोऽयं ज-2, प-1, प-21, अ-1, अ-3, अ-4; सम्प्रसारणादित्यर्थे स्याऽस्यकतया ज-1.
7. वणाभय प-1; वणीभय प-2.
8. सूत्रस्थपि ज-2, अ-1, अ-3, अ-4.
9. कारणेनादोषात् ज-2.
10. पाठोऽयं ज-2, अ-1, अ-3, प-1; वृत्त ज-1; हल प-2; दत अ-4.
11. परहंता ज-2.
12. विवर्णतु प-1.
13. प्रवृत्तित्ति प-2.
14. प्रतिकूलताभाव इति ज-2.
15. अन्यथा भेदोन प-1.
16. पक्षयो र्भेक्ष्येन अ-1, अ-3.

एहीति स्थिते परमपि सवर्णदीर्घं बाधित्वा घातूपसर्गकार्यत्वेनान्तरङ्ग-त्वादगुणे वृद्धिबाधनार्थम्।

न चाक्षद्यूरित्यत्र यणि कृते ऊठोऽसिद्धत्वाद्वलि लोपापत्ति-रिति वाच्यम्, अचोऽन्यान्तर्यनिमित्तकेऽन्तरङ्गे कर्त्तव्ये कृते च तस्मिन् यदन्तरङ्गं प्राप्नोति तत्र च कर्त्तव्ये नासिद्धत्वमित्येतदर्थात्। असिद्ध-परिभाषाया अनित्यत्वेन तद्वारणे त्वस्या वैयर्थ्यम्, तेनैव सिद्धेः। अत एव 'न लोपः सुप्' (8.2.2) इति सूत्रे कृति तुग्ग्रणं चरितार्थम्। अन्यथा वृत्रहभ्यामित्यादौ बहिर्भूतभ्याम् निमित्तकपदत्वाश्रयत्वेन बहिरङ्गतया नलोपस्यसिद्धत्वेन सिद्धेस्तद्वैयर्थ्यं स्पष्टमेव। मम तु तुक्यजानन्तर्यसत्त्वान्न दोषः।

न चैवं सति 'ह्रस्वस्य पिति' (6.1.71) इति सूत्रस्थभाष्य-विरोधः- तत्र हि ग्रामणिपुत्र इत्यत्र 'इको ह्रस्वोऽङ्य' (6.1.61) इति ह्रस्वे कृते तुकमाशङ्क्य ह्रस्वस्य बहिरङ्गासिद्धत्वेन समाहितम्। 'नाजानन्तर्य' इत्यस्य सत्त्वेवे तत्र तदप्राप्तेरसङ्गतिः स्पष्टैवेति वाच्यम्। तेन भाष्येणास्य अनावश्यकत्वबोधनात्। एतज्ज्ञापकेनान्तरङ्गपरिभाषाया अनित्य त्वबोधनस्यैव न्याय्यत्वात्। अत एव 'अचः परस्मिन्' (1.1. 57) इति सूत्रे भाष्ये पटु ई आ इत्यत्र परयणादेशस्य तया-सिद्धत्वात्पूर्वयणादेशः साधितः। अत एवैषा परिभाषा भाष्ये पुनः क्वापि नोल्लिखिता। अत एवान्तरङ्गपरिभाषामुपक्रम्य विप्रतिषेध सूत्रेऽस्या बहूनि प्रयोजनानि -

---

निषेधसूत्रस्य व्यथव्यपिव्यध्यादौ अव्यवहिते चारितार्थ्यात्। युड[1] अन् अस् इत्यत्रांतरंगपरिभाषायाः[2] अनित्यत्वेन दीर्घाप्रवृत्तौ पूर्वरुपे पश्चादेकादेशे पूर्वस्य यणः सम्प्रसारण[3] निषेधे कर्तव्ये सवर्णदीर्घस्याचः परस्मिन्निति स्थानिवत्वेन सम्प्रसारणत्वेपि-

---

1. यूड आन अस् प-1; युः अ-2 अस् अ-4.
2. परिभावायाम् ज-2; परिभाषाया प-1, प-2; अ-1, अ-3.
3. संप्रसारण नोपलभ्यते अ-4.

पुनः पूर्वोक्ताति[1]देशेनैव उकार व्यवधानेपि निषेधो[2] न स्यादित्याशंक्य व्यश्च[3] इति सूत्रेपग्रहणेनैव सिद्धे[4] व्यडः सम्प्रसारणमिति सूत्रात्। संप्रसारणपदेऽनुवर्तमाने पुनः सम्प्रसारणपदस्य[5] व्यवहित व्यथ इत्यादि सूत्र[6]विहित संप्रसारणनिषेध फलस्य[7] वैय्यर्थ्यात्[8]। व्यवहितेपि निषेधः सिद्ध इति न यून इत्यादावनुपपत्तिरित्यर्थस्यान्यत्र स्पष्टतया प्रकृते[9] वकारोत्तराकारव्यवधानेपि निषेधस्या प्राप्त्या कथं निषेध संचार इति तु न वाच्यम्। न च निर्दिश्यमान परिभाषया वाह एव स्थानिवत्वेन[10] पूर्व यणः सम्प्रसारणस्य प्राप्तरेवाभावादेतावान्पूर्वोक्तः[11] सर्वोपि प्रबन्धो निष्फल एवेति वाच्यम्[12]। सूत्रेषष्टयंततयोच्चार्यमाण सजातीय[13] स्थानि[14] निरुपित संबंधेन युज्यते[15] इत्यर्थे निर्दि्दश्यमान परिभाषाया अत्रानवतारात्। यत्सूत्रे साक्षात्षष्टयंततयोच्चार्यमाणं वाह इति न[16] तस्य स्थानि निष्टं यस्य चार्थिकं

---

1. पूर्वोक्तादेतिशेनैव प–1.
2. निषेधे ज–2, अ–1, अ–3.
3. व्यश्च 6/1/3 पाठोऽयं ज–1, अ–1, अ–3; व्यथ इति ज–1, प–1, प–1.
4. पाठोऽयं ज–2, प–1, प–2, अ–1, अ–3, अ–4; युनः सम्प्रसारणस्य व्यवहित ज–1.
6. सूत्राहितं ज–2, अ–1, अ–3.
7. पाठोऽयं प–1, प–2.
8. वैयर्थ्यात् ज–2.
9. प्राकृते ज–2, अ–1, अ–3.
10. स्थानि चत्वेन ज–2, अ–1.
11. पूर्वोक्तऽसर्वोपि अ–4.
12. वाच्यम् नोपलभ्यते अ–3.
13. पाठोऽयं ज–2, अ–1, अ–3, अ–4; सजातियं ज–1; सजातीय प–1, प–2.
14. स्थानिरूपत ज–2, अ–1, अ–3.
15. प्रत्यने इत्यर्थ फ निर्दिश्य परिभाषाया ज–2; युज्यते इत्यर्थक निर्दिश्यमान प–1, प–2, अ–4 यत्येन इत्यर्थक् निर्दिश्यमान अ–1, अ–3.
16. न तस्य यस्य चार्थिकं इति पाठः प–1.

सन्ति तदर्थमेषा परिभाषा कर्त्तव्या प्रतिविधेयं च दोषेषु इत्युक्तं 'सम्प्रसारणाच्च' (6.1.108) इति सूत्रे भाष्ये। प्रतिविधानं च परिभाषा-विषयेऽनित्यत्वाश्रयणमेवेति ध्वनितमित्यलम्॥51॥

नन्वेवं गोमत्प्रिय इत्यादौ पदद्वयनिमित्तकसमासाश्रितत्वेन बहिरङ्गं लुकं बाधित्वान्तरङ्गत्वाद्धल्ङ्यादिलोपे नुमादयः स्युरत आह-

अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते॥52॥

अत्र च 'प्रत्ययोत्तरपदयोश्च' (7.2.98) इति सूत्रं ज्ञापकम्। त्वत्कृतमित्यादौ लुगपेक्षयान्तरङ्गत्वाद्विभक्तिनिमित्तकत्वेन 'त्वमावेक-वचने' (7.2.97) इत्यनेन सिद्धे इदं व्यर्थं सदेतज्ज्ञापकम्।

ननु तव पुत्रस्त्वत्पुत्र इत्यादौ तवममादिबाधनार्थं तदावश्यकमिति चेत्? एवं तर्ह्यत्रत्ययपर्यन्तग्रहणानुवृत्तिस्तज्ज्ञापिकेति भाष्यकृतः। युष्मदादिभ्य आचारक्विप् तु न, सम्पूर्णसूत्रस्य ज्ञापकतापरभाष्य-प्रामाण्याद्; ह्रस्वनद्यापः (7.1.54) इति नुड्विधायकसूत्रस्थ-भाष्यप्रामाण्येन हलन्तेभ्य आचारक्विबभावाच्च। एवमेवैकार्थकाभ्यां प्रातिपदिकाभ्यां प्रातिपदिकणिचोप्यभिधानं बोध्यम्। एतेन तत्रादेशार्थं प्रत्ययग्रहणं चरितार्थमित्यपास्तम्।

स्थानिवत्वं[1] वकारस्य नासौ सूत्रे षष्टयंततया निर्दिर्दष्टः[2]। अत एव वाहो वा शब्दस्य सम्प्रसारण मूठ स्यादिति प्राचीनोक्त[3]मर्थमनुद्य नासौ सूत्रार्थः। किंतु यथा कथंचित्फलितार्थ कथन[4]परतया[5] योज्यमिति मनोर[6]मोक्तं संगच्छते[7]।

---

1. न तस्य स्थानित्वं ज-2, प-1, प-2, अ-1, अ-3, अ-4.
2. निर्दिष्टः प-1, प-2, अ-4.
3. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4.
4. परताया योज्य इति प-1, प-2.
5. मनोरमोक्त ज-2, प-1, प-2, अ-1, अ-3.
6. सं. पाठः।

न[1] च कार्यकालपक्षे वाह उठित्यादि सूत्रेषु सम्प्रसारण विधायकेषु इत्यण इत्युपस्थित्या वाहोऽवयव[2] यण् इत्याद्यर्थेऽवयव षष्ठी[3] निर्देशेपि निर्दश्यमानपरिभाषाया स्वीकारेणोक्त दोषतादवस्थ्यम्। किञ्च सम्प्रसारण निमित्तस्थ उपस्थितयण्विशेषणत्वेन येन नाव्येति[4] न्यायात् परस्यैव[5] सम्प्रसारण प्राप्तेर्न सम्प्रसारण इति सूत्रमपि[6] व्यर्थमिति वाच्यम्। तन्मतेष्यड:[7] सम्प्रसारणमित्यादि[8] सूत्रस्थ भाष्यप्रामाण्येन संज्ञा सूत्राणां वाक्यैक वाक्यताया: स्वीकार[9] इत्यादोषात्। न च संज्ञाकृत[10] वहिरंगत्वस्याश्र[11]यणे तव बहिरंगत्वेनाभिमत सम्प्रसारणापेक्षया अनेकसंज्ञा[12] सापेक्षत्वस्य गुणे सत्वेन[13] ज्ञापकोच्छेदापत्तिरिति वाच्यम्। संज्ञाकृत[14] तत्वानाश्रयवादिनापि परम्परया बहिर्भूतप्रत्ययनिमित्तत्वेन[15] तत्त्वाश्रयणवत्। मयापि तत्त्वस्य वक्तुं शक्यत्वेन[16] वहिर्भूत[17] प्रत्ययनिमित्तकसंज्ञा सापेक्षत्वात्तत्वस्य वक्तुं –

---

1. ननु कार्यकाल प–1.
2. वाहोवयव अ–3.
3. षष्टौ ज–2, अ–1, अ–3.
4. नाच्चेति अ–3; नाप्येति ज–2; नाव्योति प–2; नाद्येति अ–3, अ–1.
5. यस्यैव प–1, प–2.
6. सूत्रमपि न्यर्थमिति ज–2.
7. एतन्मते ज–2, अ–1, अ–3, अ–4.
8. पाठोऽयं ज–2, प–1, प–2, अ–1, अ–3, अ–4.
9. पाठोऽयं ज–2, अ–1, अ–3; स्वीकारे दोषात् ज–1; स्वीकार इत्यदोषात् प–1, प–2, अ–4.
10. कृतम् प–1; कृतां प–2.
11. बहिरंगत्वस्याप्याश्रयणे ज–2, प–2, अ–2, अ–1.
12 संज्ञयासापेक्षत्वस्य प–1.
13. पाठोऽयं ज–2, प–1, प–2, अ–1, अ–3, अ–4; मुखने सत्वेन ज–1.
14. तत्वानाना प–1; तत्त्वानाना अयवादिनापि प–2.
15. निमितत्वेतत्वाश्रयणवत् प–2.
16. शाक्यत्वेन अ–3.
17. वहिर्तप्रत्यय प–1, प–2; बहिर्भू प्रत्यय, अ–1, अ–3.

शक्यत्वेन च ज्ञापकस्य सुस्थत्वादित्येक दिक्। **एवञ्च नाजानन्तर्य इतीति।** अनेन परिभाषाश्रयणं[1] सूचितमिति बोध्यम्। अन्यथातदसत्वेनैव समाधीत्[2]। किंतु वचनमेवारब्धव्यमितीति। तच्च[3] विसर्जनीयोऽनुत्तरपद इति वक्तव्यमित्या कारकम्। उत्तरपद निमित्तकरेफस्य न विसर्जनीय इति तदर्थः। सर्पिष्याशादौ तु पाशादे[4]रुत्तरपदत्वाभावादेव न दोषः। दास्याः पुत्र इत्यलुक् समासे तु पुत्रस्योत्तरपदत्वेपि न रेफस्तन्निमित्तकः (किंतु पदांत[5] निमित्तकः) नार्कु[6]टादौ तु रेफ उत्तरपद निमित्तक ऋकार[7]स्य तद्धित निमित्तकवृद्धौ आद्य[8]त्वस्यापेक्षणात्। तच्च कुटावयवोकारापेक्षयैव[9] वाच्यम्। ततश्चोत्तरपदनिमित्तकत्वं[10] नार्कुटादौ रेफस्य स्पष्टमेवेति[11] वाच्यम्[12]। **येपीति।** कैय्यटादयः विसर्जनीयसूत्र शेषे कैय्यटेन यदा तु लक्ष्य[13]दर्शनवशात्। बहिरंग परिभाषयाश्रीयते[14] यथा रामस्तिष्ठतीत्यादौ रुत्वविसर्ग चक्रके[15]

1. परिभावाश्रयणं अ–3.
2. पाठोऽयं प–1, प–2 समादधित् ज–1; समादधीत ज–2, अ–1, अ–3, अ–4.
3. तत्त्वच्च विसर्जनीयोऽनन्तरस्पद ज–2, अ–1, अ–3.
4. पाठोऽयं प–1, प–2; तु याशादौ हुतपरपदत्वा भावादेव न प्लुः पुत्र इति ज–1.
5. पदत्वा नाऽस्ति अ–1 शशादौ ज–2 कोष्ठान्तर्गत पाठस्तु ज–2, प–2, अ–1, अ–3, अ–4 अनुपलब्धोऽयं पाठः ज–1, प–1.
6. नार्कटादौ ज–2, अ–1, अ–3.
7. ऋकारस्य प–2.
8. आद्यतवस्यापेक्षयत् प–2; अद्यत्वस्यापेक्षणात् प–1; आद्यज्ञ त्वस्यापेक्षणात् अ–4; आद्यच्चस्यापेक्षणात् अ–1, अ–3.
9. कुटककारापेक्षयैव प–2; ऊठावपववोरापेक्षणैव ज–2.
10. पाठोऽयं ज–2, प–1, प–2, अ–1, अ–3, अ–4; निमित्तकत्वे ज–1.
11. पाठोऽयं ज–2, प–1, प–2, अ–1, अ–3, अ–4; स्पष्टमेति ज–1.
12. बोध्यम् ज–2, प–1, अ–1, अ–3, अ–4; बाध्यम् प–2.
13. पाठोऽयं ज–2, प–1, प–2, अ–1, अ–3, अ–4; लक्ष्यादर्शन ज–1, प–2.
14. परिभाषाश्रीयते ज–2, प–1, प–2, अ–1, अ–3.
15. चकके प–1, प–2.

ननु मपर्यन्तानुवृत्तिरपि सर्वादेशत्ववारणाय चरितार्था। न च 'उत्सर्गसमानदेशा अपवादाः' इतिन्यायेनासिद्धत्सूत्रस्थभाष्यसम्मतेन मपर्यन्तस्यैवादेशे सिद्धे तदनुवृत्तिर्व्यर्थेति वाच्यम्, तस्य श्नम्बहुजकजादौ व्यभिचारादिति चेत्?

न, श्नमि मित्त्वेन बहुचि पुरस्तादग्रहणेनाकचि प्राकटेर्गहणेन तस्य बाधेऽप्यत्रोत्सर्गस्य त्यागे मानाभावात्। अत एव 'तस्मिन्नणि च' (4.3.2) इत्यनेन युष्माकाद्यादेश विधानं चरितार्थम्। अन्यथा आकङादेशमेव विदध्यात्। आकङि तव काद्यादेशयोरेतदपवाद-योरुक्तन्यायेनान्त्यादेशत्वापत्तिः, अतस्तद्विधानमिदमेव च तज्ज्ञापकम्।

यद्यपि विरोधे बाधकत्वमिति वार्तिकमतेऽयं न्यायो भाष्यकारस्तु विनापि विरोधं सत्यपि सम्भवे बाधकत्वमिच्छतीत्यनभिहित-सूत्रस्थकैयटरीत्या नायं नियमस्तथापि युष्माकाद्यादेशविधानज्ञापित उत्सर्गः स्वीक्रियत एवेति प्रकृते न दोषः। एतद्भाष्यमपि तत्स्वीकारे

इष्टतोऽवस्था तदायुक्त एव परिहारो न वा बहिरंग लक्षणत्वादित्युक्तम्[1]। **लक्षण चक्षुभिरिति**[2]। ननु भाष्यकारस्य लक्ष्य चक्षुष्कत्वेन[3] तन्मते तदादरो[4] युक्त इति चेन्न। नासूया[5]कर्त्तव्येति भाष्येण लक्ष्यानुरोधस्य[6] सर्वत्राप्रयोजकत्व-बोधनादित्याशयात्। अत्र तु भगवता[7] वार्त्तिककारेणानुगमस्य कृतत्वात्[8]। अन्यथा सर्व-

---

1. इत्युक्तः अ-3.
2. चक्षुर्भिरिति ज-2, प-1, प-2, अ-1, अ-3, अ-4.
3. लक्ष्यलक्षणत्वेन ज-2; लक्ष्ययलक्षुष्कत्वेन अ-1; लक्ष्य च तुकत्वेन प-1, प-2.
4. पाठोऽयं ज-2, प-2, अ-1, अ-3, अ-4; तददारीयुक्त प-1; त्तपत्तदेशयुक्त ज-1.
5. नासूर्याव्येति भाष्येण प-2.
6. लक्ष्यानुरोधेनस्य प-2.
7. भवावता प-2; भागवता अ-4.
8. कृतस्यत्वत् प-2.

मानम्। एवं च मपर्यन्तानुवृत्तिस्त्वत्कृतमित्यादौ मपर्यन्तस्यदेशविधानार्था। तत्र चान्तरङ्गत्वात् 'त्वमौ' (7.2.97) इत्येव सिद्धे व्यर्था सैतज्ज्ञापिका। ज्ञापिते त्वस्मिन्नेतद्विषये तवादीनामप्राप्त्या तदपवादत्वाभावे मपर्यन्तस्यैवादेशार्थं सा चरितार्थेति तदाशयः।

यत्तु हरदत्तेनान्तरङ्गप्रवृत्तौ प्रत्यय उत्तरपदे च मपर्यन्तासभवेन तदनुवृत्तिव्यर्था सती तज्ज्ञापिकेत्युक्तं तन्न। अन्तरङ्गाणामप्यपवादबाध्यत्वेन तद्विषये तदप्रवृत्तेः। वस्तुत इदं ज्ञापकं वार्तिकरीत्येव, भाष्यरीत्या तु वाचनिक एवायमर्थः-इत्याहुः।

शास्त्रस्यैवोन्मज्जन प्रसंगः कृतेपि[1] नवेति सूत्रे ह्क्रोरन्यतरस्यामित्यन्यतरस्यां पदे[2]नान्तराभावेन क्वचित्[3] विधिमुखेन[4] प्रवृत्ति क्वचित्[5] निषेधमुखेन प्रवृत्तेर्वाक्यभेदस्य चावश्यकतया लक्ष्यानुरोधादेव सर्वत्रेष्ट सिद्धौ सूत्रं मास्त्वित्याशयान्न तत्सूत्रस्थ लक्ष्यानुरोध[6] दिशापि वार्त्तिकमकर्त्तव्यतापदवीं प्राप्तेति[7] दिक्।

ननु एहीत्ये[8]तत्तिङतपदघटक एहीत्युभयोः परस्परसमभिव्याहृतयोः प्रत्येकमनुकरणे पश्चाच्छि[9]वशब्द संबंधे पश्चादनु[10]कार्येण देवेत्यस्य[11]

---

1. कृतोपि अ-4.
2. पदेगत्यंतराभावेन प-1, प-2; पदेनात्यंतराभावेन अ-4, ज-2, अ-1, अ-3.
3. पाठोऽयं ज-2, प-1, अ-1, अ-3, अ-4, क्वविधि ज-1.
4. विधीमुखेन ज-2, अ-1, अ-3.
5. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-4; क्वनिषेध ज-1.
6. लक्षानुरोध अ-3.
7. प्राप्नोतीति ज-2, अ-1, अ-3, अ-4.
8. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; एहित्युभयोः ज-1.
9. पाठोऽयं ज-2, प-1, प-1, अ-1, अ-3, अ-4; परत्वाछिव ज-1.
10. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; पर त्वादनुकार्येण ज-1.
11. देवेत्यपद हीत्यस्य संबंधेऽनु इति पाठोपलभ्यते अ-4.

इयं 'सुपो धातु' (2.4.71) इति लुग्विषयैवेति केचित्। 'एङ्ह्रस्वात्सम्बुद्धेः' (6.1.69) 'न यासयोः' (7.3.45) इति सूत्रस्थाकरप्रामाण्येन लुङ्मात्रविषया। आद्ये हे त्रपु इत्यादावनेन न्यायेन लोपं बाधित्वा लुग्भवतीति भाष्य उक्तम्। अन्त्येऽन्तरङ्गांश्च विधीन् सर्वोऽपि लुग्बाधते न तु सुब्लुगेव। अत एव 'सनीस्रंस' इत्यादौ न लोपो न भवति। पञ्चभिः षट्वाभिः क्रीतः पञ्चषट्व इत्यादावेकादेशात् प्रागेव टापो लुक्। अन्यथा कृतैकादेशस्य

संबंधेऽनुकार्य्ये पूर्वान्तवद्भावेनाङ्त्वात्पररुप प्राप्तौ संहिताया अविवक्षया संध्यभावे पश्चात्तत्र विद्यमानाङ्गत्वस्य[1] प्रकृतिवदित्यति देशेनातिदेश[2] वृद्धिवाधनार्थं तस्यावश्यकत्वेन कथं भाष्योक्त ज्ञापकमत आह[3]। **एहीत्यनु-करणस्येति[4]।** एहीत्येवं यत्प्रत्येकमनुकरणं तस्येत्यर्थः। हीत्यस्यानुकरणे फलं तु तिङता[5]वयवस्यए इत्यस्येदमनुकरणमिति[6] बोधक[7]त्वमेवेति बोध्यम्। एवं च वस्तुतस्तु[8] आङ्त्वस्य तस्य[9] तत्रैकदेश[10] निष्टत्वेपि समुदाया निष्टत्वेन प्रकृत्य धर्मत्वात् पररुपस्याङ्मात्र कार्य्यत्वाच्चात्रातिदेशस्य वा संभव इति भाष्यं सम्यगेव। एवं[11] चेदं प्राचामनुरोधेनेति-

---

1. विद्यमानाङत्वस्य ज-2, प-1, प-2, अ-1, अ-3, अ-4.
2. देशे ज-2, अ-1, अ-3.
3. अह् ज-2, अ-3, अ-1.
4. एहीत्य मुकरणस्येति ज-2, अ-3.
5. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4, तिर्जतावयवस्य ज-1.
6. अनुकरमिति प-1.
7. 'वो' नाऽस्ति ज-2, अ-1, अ-3.
8. वस्तु आङत्वस्य ज-2, अ-1, अ-3.
9. तस्य नाऽस्ति प-2.
10. पाठोऽयं ज-2, प-1, अ-1, अ-3, अ-4., तत्रैकनिष्ठत्वेपि ज-1; देशनिष्टत्वोपि प-2.
11. एवं चेदं इत्यारभ्य बोध्यम् नोपलभ्यते प-1 मातृकायाम्.

लुक्यकारश्रवणं न स्यादिति कैयट उक्तम्। एतद्विरोधाद्यत 'तद्राजस्य' (2.4.62) इति सूत्रे कैयटेनोक्तमङ्गानतिक्रान्तोऽत्यङ्ग इत्यत्र सुपो लुकि बहुवचनपरत्वाभावात् 'तद्राजस्य' इति लुक् न स्यादिति शङ्कापरभाष्यव्याख्यावसरेऽन्तरङ्गानपीति न्यायेनायं लुक् सुब्लुको बाधकः स्यादित्याशङ्क्य सुब्लुक एवानेन बलवत्त्वं बोध्यत इति तत् प्रौढ्येति द्रष्टव्यम्। लुको बलवत्त्वस्य वक्तुमशक्यत्वादिति तदाशङ्कासमाधानं वक्तुं युक्तम्। अनेन न्यायेनान्तरङ्गनिमित्तविनाशकलुकस्तत्प्रयोजक-समासादीनां च प्राबल्यं बोध्यत इत्यन्यत्र विस्तरः॥52॥

बोध्यम्[1] इति ग्रन्थे दूषणन्तु न चमत्काराधायकमिति बोध्यम्। अनुकार्य्ये फलाभावेनाङ्त्वस्य तत्रातिदेष्टुमशक्यत्वेनायमसंगतो ग्रन्थ[2] इत्यपि कैश्चिदुक्तं न सम्यक्। ननु संध्यर्थमति[3] दिष्टस्याङ्त्वस्य संहिताया[4] अविवक्षया संधेर्निवृतो तत्र सत्वेमानाभाव इति चेन्न। ऋलृक् सूत्रस्थ भाष्यविरोधात्[5]। प्रकृति[6]वदित्यतिदेशस्य द्विपंचत्वित्याह अग्नीत्या हेत्युदाहरण-मुक्तम्। तत्र भवदुक्तरीत्याऽनुकार्ये पंचत्वित्यादावतिदेशेनतिङ्त्वे पदत्वे[7] तिङ्त्वस्य निवृत्तौ[8] पूर्वोक्तातिदेशेन कथमनुकरणेऽतिदेष्टु[9] शक्येतेति तद्विरोधः स्पष्ट एव। ननु अनुकरणे[10] परम्परया[11]ऽतिदेश इति भाष्यता पर्यमिति चेत् समं प्रकृतेपीति दिक्।

---

1. बोध्यम् नोपलभ्यते प-1; वाध्यमिति अ-4.
2. ग्रन्थरत्यपि ज-2, अ-1, अ-3.
3. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; संबंध्यर्थमति ज-1.
4. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; संहितया ज-1.
5. भाष्ये विरोधातु अ-1, अ-3; भाष्येविरोधात् ज-2.
6. विदित्यतिदेवस्य द्विः ज-2, अ-3; पदत्वे च तिङ्त्वस्य अ-4.
8. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; निर्वृत्तौ ज-1.
9. दिष्टम् ज-2, प-1, अ-3.
10. अनुकारेणे प-1.
11. पारंपरयाऽतिदेश अ-4.

नन्वेवं सोमेन्द्रेऽन्तरङ्गत्वाद् आद्गुणे पूर्वपदात् परेन्द्रशब्दाभावेन 'नेन्द्रस्य परस्य' (7.3.22) इति वृद्धिनिषेधो व्यर्थः, अन्ताद्विवद्-भावस्तूभयत आश्रयणे निषिद्धः।

किञ्च वृद्धिरप्यत्र न प्राप्नोत्यन्तादिवत्त्वोभयाभावेऽपि पूर्वान्त-वत्त्वेनैका देशविशिष्टे पूर्वपदत्वेन न्द्रशब्दस्यैकदेशविकृतन्यायेन उभयत आश्रयणे नान्तादिवदित्य स्याभावेन तदाश्रयणे चोत्तरपदत्वेऽपि तस्यानच्कतवादेकस्यैकादेशेन परस्य नित्येन 'यस्य' (6.4.146) इति लोपेनापहारात्।

न च परादिवद्भावेनैकादेशाविशिष्टस्योत्तरपदत्वमेवास्त्विति तत्सम्भव इति वाच्यम्, उत्तरपदाद्यचस्थानिकत्वाद् वृद्धेस्तद-भावेनाप्राप्तेस्ताद्रूप्यानतिदेशात्। अन्यथा खट्वाभिरित्यादावपि पूर्वान्त-वत्त्वेनादन्तत्वे भिस ऐस्त्वापत्तिरिति भाष्ये स्पष्टम्।

अंतरंगत्वाद्बहुब्रीहिरिति। इदमपि भाष्यमर्थकृतबहिरंग[1] त्वाश्रयणे मानमुक्तम्[2]। ननु सिद्धान्तिना[3] प्रकृतेऽर्थकृतांतरंगभावस्यानाश्रयणात् पूर्वोक्त किं चाधि[4]पेक्षेत्यादिनांतरंगबहिरंगभावयोजनमयुक्तमित्याशंक्य समाधत्ते[5]। **च चार्थकृतेत्यादिना।** न चेत्यस्याग्रे[6] सिद्धांतिनेति शेषः। **इदमिति।** पूर्वोक्तांतरंगबहिरंगभावायो[7]जनमित्यर्थः। एकदेश्युक्तित्वेनेति। एक देश्युक्तयाभिप्रायकत्वेनेत्यर्थः। वृहद् विवरणकारोक्तरीत्या आशंकते[8]॥50॥

---

1. बहिरंगत्व स्याश्रयणे ज-2, प-1, प-2, बहिरंगत्वस्या असणी मानम् अ-1, अ-3.
2. मानमित्युक्त ज-2, अ-1, अ-3.
3. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; सिद्धान्तेना प्रकृते ज-1.
4. किं चाधिकापेक्षे प-1, प-2; किंचाधिपेक्षे ज-1, अ-1, अ-3.
5. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3; समाधन्ते अ-4.
6. नवेत्याशे सिद्धंततिनेति ज-2; न चेत्याग्रे सिद्धांतावनेति अ-1, अ-3.
7. भवयोजनम् प-1, प-2, अ-4.
8. अशंकते प-1; आशंक्यते अ-3.

अत एव पूर्वेषुकामशम इत्यादावन्तरङ्गत्वादाद्गुणे वृद्धिर्न स्यादित्याशङ्क्य तम्। तदेकदेशमात्रस्य विकाराभावाच्च। तदुक्तं भाष्य इन्द्रे द्वावचावेको यस्येति लोपेनापहृतोऽपर एकादेशेन ततोऽनच्क

न चैवं सति ह्रस्वस्यपितीति। अनावश्यकत्व बोधनादिति। इदंत्वसत्। नाजानन्तर्य परिभाषा अनंगीकर्तॄणां षत्वतुकोर[1]सिद्ध इति सूत्रस्थ तुक्[2] ग्रहणादसिद्ध परिभाषाया अनित्यत्वेन[3] ह्रस्वस्य पितीत्येतत् सूत्रविषयेऽप्रवृत्ति[4]र्वाच्या। अत एव तुग्ग्रहणं[5] चरितार्थम्। ततश्च ग्रामणि पुत्रो ग्रामणिकुल[6]मित्यत्र तुग्वारण त्वं सिद्धपरिभाषया[7] कर्त्तुमशक्यमिति सन्निपात[8] परिभाषयैव तुग्वारणीयः। एवं चैतत्परिभाषा सत्वेप्यन्यथैव तुग्वारयितु[10] शक्य इति। त्वदुक्त[11] परिभाषाभावसाधक[12]हेत्वसिद्धिः। न च[13] परिभाषया[14] तुग्वारकभाष्यविरोधः। तस्यैकदेश्युक्ति[15]त्वस्याजतनपुंसक–

---

1. तकोर ज–2, अ–3.
2. तुग्रहणीदसिद्ध ज–2, अ–1, अ–3; तुग्रहणादसिद्ध प–1, प–2; तुग्ग्रहणादासिद्ध अ–4.
3. ह्रस्वपितोत्यत्यत् अ–1, अ–3.
4. ऽप्रवृत्तिवाच्यां अ–3, प–2.
5. नुग्ग्रहणं वरितार्थः ज–2, अ–1, अ–3; तुग्रहणणं चरितार्थः प–1.
6. ग्रामणे पुत्रो प–2.
7. परिभाषाया अ–3.
8. सनिपात अ–4.
9. ससत्वेप्यन्यथैव ज–2, अ–1, अ–3.
10. तुश्चारयितुं ज–2; अन्यथैव तु शक्य इति पाठोपलभ्यते अ–3; तुग् वारं तुं प–1.
11. पाठोऽयं प–1, प–2, अ–3; तदुक्त ज–1; नोपलभ्यते ज–1, ज–2, अ–1, अ–4.
12. परिभाषावभासाधक प–2; परिभाषावज्ञाक अ–4.
13. 'च' नोपलभ्यते अ–3, अ–4.
14. परिभाषया तु तुग् वारक अ–4.
15. तस्यैतादेश्युक्ति ज–2, अ–1.

शेखरांते[1] मूलेपि तदुपन्यास एकदेशिन[2] इति। न तद्विरोध इत्यल[3] मित्यनेन ग्रंथेन बोधनात्[4]। अत[5] एव मूल[6]कृतापि असिद्ध परिभाषाज्ञापकोपपादनसमये गुणैऽजानंतर्य[7]सत्वेन निषेधमाशंक्य[8] परिभाषाया[9] अभावान्न दोष इत्यनुक्ता[10] युगंतेत्यादि कर्मधारयाश्रयणे न भिनतीत्यादौ[11] दोषवारणान्तनिमित्तको[12] विशेषणमित्युक्तम्। एतदसत्वे तथा समाधानपर्यन्तानुधावनम[13]संगतमेव स्यात्। किञ्च विवरणेपि तत्र नाजानंतर्य परिभाषामुक्ता[14] नित्यत्वात्तद[15]सत्वाद्वेति समाधीयते। **अत एवाचः** परस्मिन्निततीति।

---

1. पाठोऽयं ज–2, प–1, प–2, अ–1, अ–3, अ–4; शेषरान्ते ज–1; शखराते अ–4.
2. एकदेशेन प–2.
3. इत्येलमित्यनेन अ–3.
4. बोधनात्तु प–2.
5. अन्त ज–2, अ–3.
6. पाठोनयं ज–2, प–1, अ–1, अ–4; मृलापि ज–1, प–2.
7. समयगुणेऽनानन्तर्य ज–2, अ–1, अ–3.
8. निषेधमशक्य ज–2, अ–1, अ–3.
9. पाठोऽयं ज–2, प–1, प–2, अ–1, अ–3, अ–4; परिभाषायामावाच्च ज–1.
10. इत्यनुक्त्वा अ–4.
11. भित्तुनतीत्यादौ ज–2, प–1; तिनतीत्यादौ प–2 भिन्नुनतीत्यादौ अ–1, अ–3.
12. वारणात्तमितको ज–2; वारणान्ननिमित्तकिको प–1, प–2; वारणान्ननिमितको अ–1, अ–3; वारणान्नमितको अ–4.
13. अनुधावतम् अ–4.
14. मुदक्यां ज–2, अ–1, अ–3, अ–4; मुद्दक्या प–1, प–2.
15. पाठोऽयं प–1, प–2, अ–4; नित्यतवातरसत्वाद्वेति ज–2, अ–1, अ–3; नित्यत्वात् द सत्वाद्वेति ज–1.

जातस्य बहिरङ्गस्येत्युक्त्या[1] इति। पूर्वोक्त मूल[2]कारोक्तरीत्या जातस्य बहिरंगस्यासिद्धत्व प्रतिपाद[3]कांशस्यैव निषेधलाभात्[4]। ज्ञापकस्य[5] विशेषापेक्षणात्। असिद्ध[6]मिति वाचनिक परिभाषामुक्त्वा नाजानन्तर्ये इति वक्ष्यामीत्युक्तेर्वाचनिकांश निषेधलाभाच्च[7]। प्रकृते[8]ऽस्याप्राप्तौ भाष्यविरोधाभावेन द्वितीय हेतोरप्य[9]सिद्धेः। भाष्ये[10] पुनः क्वापि नोल्लिखितेति। विप्रतिषेधसूत्रे कंठत उक्ताया: परिभाषायाः अपलाप[11] कुर्वतस्तव भाष्यास्पृष्टानेकेषां सूत्राणां विलय[12] प्राप्त्या तृतीयं हेतोरप्यसिद्धिः। अत एव कैय्यटेन[13] तत्र[14] नाजानन्तर्य इति[15] निषेधमांशक्य भाष्येऽनित्यत्वात्[16] समाधीयते[17]।

---

1. सं. पाठः, युक्तेति ज-1, प-1, पव-2; यक्तेति ज-2, अ-3, अ-1, अ-4.
2. मुक्तकारोक्त प-1.
3. प्रतिपादाकांशस्यैव प-1.
4. निषेधलालात् अ-1, अ-3;
5. ज्ञापकल्प ज-2, अ-1, अ-3; ज्ञापकस्य विशेषापेक्षेणात् अ-4.
6. 'द्ध' नाऽस्ति प-1, प-2.
7. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4. लाभाय ज-1.
8. प्रत्यतेऽस्य प्रत्यौ प-2; ऽस्या अप्रत्यो प-1; स्या अप्राप्तौ ज-2, अ-1, अ-3; कृतैऽस्याप्राप्तौ अ-4.
9. द्वितीये हेतोरथ सिद्धः ज-2, अ-1, अ-3; हेतोरथासिद्धिः अ-4.
10. भाष्यो पुन कवपि प-1.
11. अपलापे ज-2, अ-1, अ-3; अपलापकुर्वतः प-2, अ-4.
12. विपलप्राप्त्या प-1, प-2.
13. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4 कैटेन ज-1.
14. तत्रतत्र ज-2, प-1, प-2, प-3.
15. पाठोऽयं प-1, प-2; 'इति' पाठो नावलोक्यते ज-1, ज-2, अ-1, अ-3, अ-4.
16. भाष्ये नित्यत्वात्.
17. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; समाधीयति ज-1.

किञ्च भाष्ये पूर्वमसिद्ध परिभाषामंगीकृत्य तस्याः **अक्षद्यूरि**'**त्यत्र** दोषमुद्भाव्यऽस्या पूर्वं ज्ञापकमुक्त्वा[1] पश्चादसिद्धपरिभाषाया ज्ञापकोक्तया[2] स्यावश्यकतत्वमुचितम्[3]। दृष्टश्चायं प्रकारो लौकिकानां वैदिकानां च पश्पशाह्निक[4] भाष्ये व्यापकवैदिकानां प्राधान्येपि[5] पर निपातो[6] लौकिकानां च[7] आदरसूचनायेति विवरणे। न च तदनित्यत्वेनैव निर्वाहेऽस्याः स्वीकारो गुरुभूत[8] इति वाच्यम्। अन्तरङ्गानपि विधीन्बहिर[9]ङ्गो लुग्बाधतेल्यप् बाधते। वार्णादाङ्गम्बलीय[10] इत्यादे[11]रप्यसत्वात्। किञ्च विप्रतिषेधसूत्रोक्त पूर्वोत्तरपद[12]निमित्तकार्यात्पूर्व[13]मंतरंगोप्येकादेशो नेत्यस्य[14]त्वंगीकारोऽस्या अस्तुनेत्यत्र बीजाभावाच्च[15]। तस्मा[16]दाग्रहमूलकमिदमिति दिक्।

---

1. ज्ञापकमुक्ता ज-2, प-1, अ-3.
2. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4, ज्ञापकोक्ते ज-1.
3. आवश्यकमुचितम् प-1.
4. सं. पाठः, चेति यस्याशास्थ प-2; चेतिपस्पशास्थ प-1; चे यस्य शास्थ ज-2; वैदिकानां यणस्थ भाष्य अ-4.
5. धान्येपि अ-4.
6. पर नियांतो ज-2; परनिपाती प-1, प-2; पर निपातौ अ-1, अ-3.
7. लौकिकानामपि ज-2, प-2, प-2, अ-1, अ-3, अ-4; 'च' नाऽस्ति.
8. गुरुतर प-1, प-2.
9. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3; वोधीन् ज-1; विधान् अ-4.
10. वाणीदंगे बलीय अ-3.
11. पाठोऽयं प-1, प-2; इत्यादिरप्यसत्वात् ज-1; इत्यादेरथसत्वात् ज-2, अ-1, अ-3, अ-4.
12. पूर्वेतर प-2.
13. कार्यापूर्वम् प-1; कायांत् ज-2, अ-1, अ-3.
14. नेत्यस्य यत्वमिकरोऽस्या प-2.
15. वीजानां भावाच्च अ-1, अ-3, अ-4.
16. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4, तस्याराग्र कुन्मैलाकमिदमिति ज-1.

प्रति[1]विधेयं दोषेष्वित्युक्तमिति। आद्ययोगे[2] बहूनि[3] प्रयोजनानि सन्ति यदर्थमेषाकर्त्तव्येति। अंतरंग परिभाषामुपक्रम्य संप्रसारणाच्चेत्यत्र भाष्ये उक्तम्[4]। तत्र आद्ययोग इत्यस्य विप्रतिषेधसूत्र इत्यर्थः। ततः प्रतिविधेयं[6] दोषेष्वित्यप्युक्तम्। तस्यापूर्वमनित्यत्वेन समाधेयमिति नार्थः किंतु प्रतिविधेय-मित्यस्याग्रे उक्तमिति शेषः। एवं च दोषेषु[7] प्रतिविधेयं यत्तदुक्तमित्यर्थः। एवमेकवाक्यतायां सत्या[8] तु परस्पर भाययोर्विरोधो न न्याय्यः। पूर्वोक्त समाधेरे[9]वानुवादो भाष्ये नत्वपूर्व[10] समाधानमिति बोध्यम्। किञ्च[11] भाष्यात्वनुक्ताया अनित्यतायाः स्वीकारे प्रत्युत[12] विपरीत दोष एव अपि च भाष्ये यद्यपूर्व[13]समाधिरभिप्रेतः स्यात्तदा पूर्वोक्तसमाधि[14]- दूरीकरणाय कंठतस्त[15] वदेत् न च गौरवम्।

---

1. पाठोऽयं प-1, प-2; प्रतिपेधेयम् ज-1; प्रतिषेधेयं ज-2.
2. पाठोऽयं अ-4 आप्ययोगे ज-1; आश्वयोगे अ-2; आच योगे अ-1, अ-3; अद्ययोगे प-1, प-2.
3. बद्धनि ज-2; बहुनी प-1; वहनि अ-4.
4. 'भा' एवोपलभ्यते ज-1.
6. पतिविधियम् ज-2, ततऽपतिविधिर्यदोषं अ-3.
7. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; व दोषे प्रति ज-1.
8. समाधेरेवानुवादो प-2.
10. नत्वपूर्वे ज-2; नत्वपूर्वो अ-1, अ-3.
11. किं च भाष्यानुक्ताया ज-2, प-1ख अ-1, अ-3, अ-4; किन्चानुकताया प-1.
12. प्रत्युत्युत अ-1, अ-3 अ-2; प्रत्युविरोदोष प-1.
13. पूर्व समाधानमिति बोध्यम् इति पाठोपलभ्यते प-1.
14. पाठोऽयं ज-2, प-1, प-2; समाधीतरोकरणप्रर्कटतस्तावतस्तरवद् न व गौरवम् ज-1.
15. कंठत संवेदत् अ-1, अ-3; कंठतस्व वदेत् अ-4.

इन्द्रशब्दः सम्पन्नस्तत्र कः प्रसङ्गो वृद्धेरिति। मरुदादिभिरिन्द्रस्य द्वन्द्व इन्द्रस्यैव पूर्वनिपातोऽत आह-

पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमन्तरङ्गोऽप्येकादेशो न॥53॥

अत्र च 'नेन्द्रस्य' (7.3.22) इति निषेध एव ज्ञापक इति 'अन्तादिवच्च' (5.1.85), 'विप्रतिषेधे परम्' (1.4.2) इति सूत्रयोर्भाष्ये स्पष्टम्॥53॥

नन्वेवमपि प्रधाय प्रस्थायेत्यादावन्तरङ्गत्वादित्वाद्दिषु कृतेषु ल्यप् स्यादत आह-

अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते॥54॥

'अदो जग्धिः' (2.4.36) इति सूत्रे कितीत्येव सिद्धे ल्यब्ग्रहणमस्या ज्ञापकमिति 'अदो जग्धिः' इत्यत्रभाष्ये स्पष्टम्॥54॥

नन्वेवमपीयायेत्यादौ द्वित्वे कृतेऽन्तरङ्गत्वात् सवर्णदीर्घत्वेन तदसिद्धिरत आह-

वार्णादाङ्गम्बलीयो भवति॥55॥

दत्तोत्तरत्वात्[1]। विप्रतिषेधसूत्रस्थ[2] विवरणं तु बृहद्विवरणानुरोधादिति बोध्यम्। एवं चतुर्थ हेतोरथ[4] सिद्धिर्बाध्या एतदनुवादस्तु स्वरूपव्याक्रियेति न्यायेना[5]त्रेति दिक्॥51॥

---

1. दात्तोत्तरत्वात् अ-1, अ-3; दांत्तोत्तधरत्वात् ज-2.
2. सूत्रस्थे अ-4.
3. पाठोऽयं प-1, प-2; वृहद्विवरणानुरोधीरिति ज-1.
4. चतुर्थ हतोरथ ज-2, अ-1, अ-3.
5. न्यायेति नात्रेति प-1; न्यायेनात्रेति पूर्वप्रसक्त गुणस्येत्यर्थ इति पाठोपल्यते ज-2, अ-1, अ-3.

तेनान्तरङ्गमपि सवर्णदीर्घं बाधित्वा वृद्धिरिति तत्सिद्धिः। 'अभ्यासस्या सवर्णे' (6.1.78) इतीयङ्विधायकसूत्रस्थम-सवर्णग्रहणमस्या ज्ञापकम्। तद्धीषतुरित्यादावियङादिव्यावृत्त्यर्थम्। एतत्परिभाषाभावे त्वीषतुरित्यादावन्तरङ्गेण सवर्णदीर्घेण बाधात्तद्वय्र्थम। इयङुवङौ ह्यभ्याससम्बन्धनिमित्त कत्वाद्बहिरङ्गौ। न चेयडदिरपवादो,

---

भिस[1] ऐसापत्तिरिति। तपरकरणं तु विश्वपाभिरित्यत्रचरितार्थमिति भावः[2]। पूर्वप्रवृत्तगुणस्येति। पूर्वप्रसक्तगुणस्येत्यर्थः। रुपाति[1]देशेऽनपहारे इति छेदः[2] द्विर्वचने चीतिरुपात्तिदेशे सति यो[3] परिहारस्तस्मिन्नसतीत्यर्थः। द्विर्वचनेति[4] निषेधे सतीति यावत्। अत एव द्विर्वचने चीति गुणवृद्धयो[5] र्निषेधे इत्युपपादक विवरणशेखरादिग्रन्थाः संगच्छन्ते[6]। किञ्च अतिदेशपक्षे स्थानिवत्पदादेश-पदानुवृत्ति शब्दाधिकार[7] न पदान्त सूत्रोत्तर[8] सूत्राकरणदोष सहनापेक्षया आदेशपद नञ् ग्रहणमात्रमनु[9]वर्त्याऽनिषेधकत्व स्वीकारस्यैव युक्तत्वादिति दिक्॥52॥

---

1. भिरोसापतिरिति प-2.
2. अयं कोष्ठान्तर्गतपाठस्तु ज-2, अ-1, अ-3 मातृकासु नोपलभ्यते।
1. रूपातिदेशर्न पहारिति प-1, प-2; रूपातिदेशो उनपहार अ-4; रूपातिदेशेऽनुपहारिति ई अनपहारे ज-2, अ-1, अ-3.
2. वेदः ज-2.
3. योऽहारः प-1, प-2.
4. द्विवचने अ-4.
5. वृध्येर्निषेध प-1; वृद्धया निषेधे ज-2.
6. पाठोऽयं प-1, प-2, अ-3, अ-4; सुगछते ज-1, अ-1; वृद्धया निषेधे ज-2.
7. पाठोऽयं ज-2, प-1, अ-1, अ-3, अ-4, शब्दाधिकारणोपदान्त ज-1; इष्टधिकारपदान्त प-2.
8. सूत्रोत्तर शब्दो नोपलभ्यते ज-2, प-1, अ-1, अ-3, अ-4.
9. अनुवर्त्यनिषेधकत्व प-1, प-2; अनुवर्त्यानिषेधकत्व ज-2, अ-3.

'येन नाप्राति' न्यायेनेयर्तीत्यादिसकललक्ष्यप्राप्तयणप- वादत्वस्यैव निर्णयादिति प्राञ्चः।

परे त्वेतत्परिभाषाभावे 'अभ्यासस्य' इति सूत्रमेव व्यर्थम्। न च 'इयाय' इयेषेत्यादौ चरितार्थम्, तयोरपि पूर्वप्रवृत्तगुणस्य

कस्य चिन्म[1]त्तेनाह। **समान[2]कार्यित्व एवेति।** यद्वा एवःस्त्वर्थो[3] धर्मिग्राहकमानादि[4]त्यस्याग्रे योज्यः। धर्मिग्राहकमानात्तु[5] समानकार्यित्वे प्रवृत्तिः। (तत्र[6] तत्र) आकार[7] रीत्या तु तदभावेपीत्याशयः। एवं च न समानकार्यित्वे न वा समाननिमित्तकत्वे आग्रहः। किन्तु परिभाषामात्र[8] ज्ञाप्यते। सा चेयमित्याद्युक्तिस्तु समाननिमित्तकत्ववादिनां मते तदलाभबोधनाय। ननु विषय[9]विशेषमनादृत्य परिभाषायाः प्रवृत्तिस्वीकारे स्योनो न सिद्धेदत आह। **स्योनो इत्यत्र त्विति।** समानकार्यित्व एव परिभाषा[10] प्रवृत्तिवादिनोमते विश्च इति लक्षे तुकादेशयोरेकस्थानि[11]कत्वाभावेन परिभाषाया अप्रवृत्तौ

---

1. कस्य चितेनाह अ-4.
2. समानकायित्व ज-2; समान कार्यित्वे प-1; समानाकार्यित्व अ-3.
3. एवः स्वार्थी ज-2; यद्वासवः स्त्वार्थो अ-3
4. मानाहि यस्याग्रे योज्यः ज-2.
5. मानातु समानातु समानकार्यिवे वे अ-4; मानातुसामान ज-2, प-2, अ-1, अ-3.
6. अयं कोष्ठान्तर्गतपाठस्तु प-1, प-2 पाण्डुलिप्यां एव उपलभ्यते.
7. पाठोऽयं प-1, प-2, अ-4, आकर रीत्यातु ज-1, ज-2, अ-1, अ-3.
8. परिभाषात्र ज्ञाप्यते ज-2, अ-1, अ-3.
9. पाठोऽयं प-1, प-2; ननु विशषय विशेषमाना ज-1; ननु विषयविशेषमाना इत्यपरिभाषायाः ज-2, अ-3.
10. परिभाषाया अप्रवृत्तौ तु ग्रहणात्तः इति पाठोपलभ्यते अ-3.
11. पाठोऽयं ज-2, प-1, प-2, अ-3, अ-4 स्थानिभावेन ज-1.

तुग् ग्रहणात्तदनित्यत्वस्य ज्ञापयितुमशक्यत्वेन स्योन इत्यत्र दोषधौव्याद[1] नित्यत्व[2] प्रतिपादनेन पूर्वोक्तलक्ष्ये दोषोद्वारकग्रन्थासंगत्या यथाश्रुतन्तु न साध्विति विभावयामः। एतत्परिभाषा[3] प्रवृत्तिः समानकार्यित्वे एवेति न नियम इति तु वृद्धोक्तेरवसेयम्। किं च पूर्वोक्ताग्रहेतु कुमार्यै[4] इत्यत्रापि आंगवार्णयो समानकार्यित्वाभावे परिभाषायाः अप्राप्त्यैव दोषवारणेऽगसंबंधिन्यांग एवे[5]यमित्यस्य वैय्यर्थ्यं स्यादिति दिक्।

ननु असवर्ण[6]ग्रहणस्यैव ज्ञापकता भाष्याक्षर मर्यादया लभ्यते। न चोपपादन भाष्यविरोधः इयाय इत्यत्र द्वि[7]र्वचनेचीति गुण निषेधेद्वित्वेऽकृतव्यूह[8] परिभाषया दीर्घाप्रवृत्तौ गुणे[9] सूत्र सार्थक्यं मनसि निधाय सिद्धांतिनोक्तं यद[10]यमभ्यासस्यासवर्णे इत्य[11]सवर्णग्रहणं करोती[12]त्युक्तम्। पूर्वोक्तमवकाशम-जानत एकदेशिनः सूत्रमेव ज्ञापकमस्तु इत्यभिप्रायं[13]मनसि कृत्वा सिद्धधांती[14] पृच्छति कथं कृत्वा ज्ञापकमिति। एकदेशि[15] सूत्रस्य ज्ञापकत्वमुपपादयति।

---

1. पाठोऽयं ज-2, प-2, अ-1, अ-3; दोषद्ग्रोग्याद ज-1; दोषव्याद प-2.
2. प्रतिपानेन प-1, प-2.
3. परिभाप्रवृत्ति ज-2, अ-1, अ-3.
4. कुमार्ये प-2, अ-4.
5. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-; एषामित्यस्य वैय्यर्थ्यं ज-1.
6. असवर्णे अ-4.
7. द्विवचनचीति प-1.
8. 'व्यह' नोपलभ्यते प-1.
9. दो प्रवृत्तौ वृद्धौसूत्र प-1, प-2.
10. षदमेपेभ्यासस्या प-1.
11. इत्यसवर्णे अ-4.
12. करोतीत्यंत ज-2, प-1, अ-1, अ-3.
13. इत्याभिप्रायम् अ-4.
14. सिद्धांते ज-2.
15. एकदेशी ज-2, प-2, अ-1, अ-3.

नह्यन्तरेणेत्यादिना। सिद्धधांती स्वाशयं प्रकाशयति। **नैतदस्तीत्यादिना।** अत्य[1]र्थमिति भाष्यमुपलक्षणमियायेत्यादेरिति भाष्यस्य सुयोज[2]त्वात्। न चेदृशी[3]भाष्यकारशैलीति[4] चैन्न। विप्रतिषेधसूत्रे अंतरंगपरिभाषाज्ञापकं यदयं वाह ऊठं शास्तीत्येवोक्तत्वेन तादृश[5] शैलेव्यभिचारात्। किञ्चाग्रे[6] सूत्रोपसंहारेपि असवर्णग्रहणमेव[7] ज्ञापकमित्येवकारस्य भाष्ये दर्शनाच्चेति चेन्न। भाष्ये प्रथमत् इयाय इयपिथेत्यत्रांतरंगत्वादीर्घ स्यादित्याशंक्यवार्णपरिभाषया तं निवार्य ज्ञापकोपपादनेन[8] परिभाषोपसंहारे इयर्तिरुपं नैकमुदाहरणमिति अग्रिमभाष्येण च त्वदुक्त[9]कल्पनाया दत्तजलांजलित्वादित्यवधेयं सुधि[10]भिरिति दिक्॥55॥

अन्तरङ्गत्वाद्दीर्घेकृते इति। पूर्व[11]स्थित निमित्तकत्वरुपमंतरंगत्वम्। कानि[12] संतीत्यादाविव अत्र बोध्यम्। न[13] तु परिभाषयेति भावः। इदमनुपदं

---

1. अत्यर्थमिति प-2, अ-1, अ-3.
2. पाठोऽयं ज-2, प-1, प-2, अ-4, सुयोगत्वात् ज-1; सुयोजत्वात्तु अ-1, अ-3.
3. न चेदशो ज-2, अ-1, अ-4; न च नेदृशो प-2, प-1, अ-3.
4. पाठोऽयं ज-2, अ-1, अ-3, अ-4; रीतीतिवेन्न ज-1; शैलीलतिवाच्यम् प-1, प-2.
5. तादृशैलया प-2 तादृशशैलया प-1; तादशशैलेर्व्यभिचारात् अ-3, अ-4.
6. पाठोऽयं प-1, प-2, किन्चात्र सुत्रापहारेपि ज-1; किंचाग्रे सूत्रोपहारे ज-2, प-1, अ-3, अ-4.
7. पाठोऽयं ज-2, प-1, प-2, अ-3; असवर्णग्रहणमित्येव ज्ञापकं ज-1, अ-4.
8. ज्ञायाकोपपादने ज-2, अ-1, अ-3.
9 पाठोऽयं ज-2, प-1, प-2, अ-3, अ-4 च तदन्तकल्पनाया ज-1.
10. सूरिभिरिति प-1, प-2, अ-3, अ-4.
11. पूर्वोस्थित ज-2; पूर्वोपस्थित अ-1, अ-3.
12. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; कनि संतित्यादाविव अबोध्यम् ज-1.
13. पाठोऽयं ज-2, प-1, प-2, अ-3, अ-4; ननु ज-1.

मूलै एव स्फुटम्। समकाल[1] प्राप्तबहिरङ्गस्येति। सुउत्थित[2] इत्यवस्थायां कृतसंधेरभावात्प्रत्यये प्रत्य[3]भावेन तन्निमित्यकवृद्धेरप्य[4]प्राप्त्यापूर्वस्थित-निमित्तकत्व रुपांतरंगत्वमादाय दीर्घे कर्त्तव्ये समानकाल प्राप्त्यभाव इति भावः। अत एव लौकिक[5]न्यास्याप्यत्रानवसरः पदसंस्कारमभ्यु[6]पेत्येदम्। तदा[7]श्रयणे तु वार्णपरिभाषयावृद्धेः प्राबल्ये तत्प्राप्तौ[8] समर्थग्रहणस्य-सार्थक्ये[9]ज्ञापकत्व[10]मंगापत्तिः। **अंतर्भाव**[11] **इति।** स्पष्टं चेदमचः[12] पर स्मिन्निति सूत्रे शब्द कौस्तुभे। **प्रतिपद विधित्वादिति।** च[13] स्वेकेति सूत्रार्थोपस्थित्यपेक्षयावसोः संप्रेत्यस्यार्थस्य[14] शीघ्रोपस्थिते सर्वानुभव[15] सिद्धत्वादिति भावः। **भाष्यकृताऽनाश्रयणादितीति।** ननु निमित्तापाय[16] परिभाषाया अनाश्रयणे तस्थावित्यादौ धात्वादेरित्यादिना सत्त्वादि प्रवृत्तोष्टुत्वादि

---

1. पाठोऽयं प-2; समानकालप्राश बहिरंगस्येति ज-1; सकालप्राप्त अ-1.
2. स उत्थित अ-4.
3. पाठोऽयं प-1, प-2 वृद्धेरप्यप्राप्त्यां अ-1, अ-3.
4. वृद्धेरप्यप्राप्त्या पूर्वास्यंता ज-2; वृद्धेरप्यप्राप्त्यापूर्वायित ज-1.
5. लौकिकम् ज-2, अ-1, अ-3.
6. संस्कारमनभ्युपेत्येदम् प-1, प-2.
7. मदाश्रयणे तु प-2.
8. प्राबल्येन तत्प्राप्तो प-1.
9. सार्थकोपकत्वमंगापत्ति अ-3.
10. भंगापत्ति ज-2, प-1, प-2, अ-1, अ-3.
11. अन्तर्भाव इति नोपलभ्यते ज-1, प-1.
12. चेदमबः ज-2, प-2, अ-1, अ-2, अ-3.
13. 'च' नाऽस्ति; 'व' ज-2, अ-1, अ-3.
14. संप्रेत्य सार्थस्य अ-4; शिघ्रौपस्थिते अ-3.
15. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; असवर्णानुभवसिद्धत्वादिति ज-1.
16. पाठोऽयं ज-2, प-1, अ-1, अ-4; निमित्ताया परिभाषाया ज-1; निमित्तापाया परिभाषाया प-2; निमित्ताय परिभाषाया अ-3.

निवृत्तिर्नस्यात्। न च तदाश्रयणे लब्धा जोविकाय नेति बहुव्रीहौ गोस्त्रियोरिति ह्रस्वे[1] आयो निवृत्तेः इत्वस्यापि निवृत्या[2] इत्व घटितप्रयोगा[3]संगत्तिरितिवाच्यम्। एनीशब्दात्[4] स्त्रोभ्यो[5] ढकिति ढकि यस्येती[6]कार निवृत्तौ संन्नियोग[7]शिष्टानामिति नकार निवृत्तिमाशंक्याचः परस्मिन्निति सूत्रस्थविधिशब्दस्य भावसाधनतामंगीकृत्य पूर्वस्य विधौ[8] स्थितौ कर्त्तव्यायां स्थानिवदित्यर्थे नकारस्यावस्थितिकरणवत् लब्धा चासौ जीवि[9]काचेति कर्मधारयोत्तरमर्श आद्यचि यस्येति टापो[10] निवृतौ इकारस्य स्थितौ कर्तव्यायां स्थानिवत्वप्रवृत्या[11] तत् स्थिति-करणेना[12]दोषादिति चेन्न। सपाद सप्ताध्यायीस्थकार्यप्रवृत्तियोग्यतायांष्टुत्वाद्य प्रवृत्तेस्तस्थावित्यादीनां निर्वाधत्वात्[13]। एवं च लब्धजीविकेत्यादा[14] वपि न क्लिष्ट कल्पनेत्य पर मनुकूलम्। अकृत[15]व्यूहपरिभाषा स्वीकारेंतरंगानपि विधीन् बहिरंगो लुक्[16] - ल्यप् च बाधते इति ज्ञापक

---

1. ह्रस्वो प-1.
2. निवृत्यतत्त्वघटित ज-2, अ-1, अ-3.
3. प्रयोगसंगवाच्यम् प-1.
4. एनि प-1.
5. स्त्रोभ्यो ढक् 4/1/120.
6. टगिति टकि यस्येति इकार नियोग इति पाठोपलभ्यते प-1, प-2, अ-3.
7. संनियोग अ-1, अ-3 संनियोग अ-4.
8. विधे ज-2.
9. पाठोऽयं ज-2, प-1, अ-1, अ-3, अ-4 विजि का ज-1.
10. टोपो ज-2; टापो प-1.
11. प्रकृया तत् ज-2, अ-1, अ-3.
12. करणेनादिति चेन्न प-1.
13. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; निर्बाधत्वाच्चत्वात् ज-1.
14. जीविकेत्या वपि ज-2, अ-1; जीविकेत्यवपि अ-3.
15. अल्लत्तव्यूह प-1, प-2.
16. लुक् लुप् च बाधत प-1; लुक् ल्यपश्च बाधत अ-3; लुकल्यचबाधते अ-4.

पूर्वप्रवृत्तवृद्धेश्च 'द्विवर्वचनेचि' (1.1.59) इति रूपातिदेशेनापहारे द्वित्व कृते पुनः प्राप्ते गुणवृद्धी बाधित्वान्तरङ्गत्वात्सवर्णदीर्घापत्तेः। न चेयर्तीत्यादौ तच्चरितार्थम्, तावन्मात्रप्रयोजनकत्वे उरित्येव ब्रूयात्।

परभाष्य[1]विरोधवत् निमितेति[2] परिभाषा स्वीकारेपि तस्य जागरुकत्वात्सर्वथा तद्भावो[3]पिकल्पनीय[4] इति दिक्॥56॥

विशेषशास्त्रोद्देश्येति होढः[5] दादेर्धातोर्घः[6] इत्युदाहरणम्। विशेषशास्त्रे[7] दादधार्तातोर्ध[8] इति शास्त्रे उद्देश्यभूतो यो विशेषधर्मः दादित्वे[9] सति हत्वरुपोधर्मस्तदवच्छिन्न निष्टो[10] यः सामान्यधर्मः[11] हत्वरुपोधर्म[12]स्तदवच्छिन्न मुद्देश्यं यत्र एतादृश शास्त्रस्य होढ इत्यस्य विशेषशास्त्रेण दादेर्घातीर्घ इत्यनेन बाध इत्यर्थः। **अनवकाशा आयादयः**[13]। ननु स्याद्य प्राप्ति-योग्येऽचारितार्थ्येनायादीनां बाधकत्वं[14] वक्तव्यम्। तदेव-

---

1. परिभाष्य प-1.
2. विरोधवत् मित्तेति ज-2, अ-1, अ-3.
3. तदभावोपि ज-2, प-2, अ-1, अ-3, अ-3.
4. पाठोऽयं अ-4; कल्पनी इति ज-1 कल्पनीय इति हिक ज-2, अ-1, अ-3.
5. सं. पाठ. 8/2/31.
6. सं. पाठ. 8/2/32 दादोर्धातो च ज-2.
7. विशेषशास्त्रों.
8. दधिर्धातोर्थ ज-2, अ-3.
9. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4; दादिधात्ववयवत्वे सति जस-1.
10. पाठोऽयं ज-2, प-1, अ-1, अ-3, अ-4; निष्टो यम् ज-1.
11. समान्याधर्मः अ-4; सामान्य धर्म प-2.
12. धर्म प्रतिषेधनाधातुके आयादीनां वाध आस्तदवछिन्न मुद्देश्यं यत्र एतादृशशास्त्रस्य इति अ-1, अ-3 पाठोपलभ्यते.
13. आयादयति अ-4.
14. बाधकत्व अ-1, प-2, अ-3, अ-4.

नालिय्याया[1]दीनां स्याद्यप्राप्ति[2] योग्ये चारितार्थ्यादिति चेन्न। तत्रसूत्रे भाष्ये आर्धधातुके इति पर सप्तमीमभ्युपगम्यायादिभ्यो पदार्द्धधातुकं तस्मिन्न वस्थिते विभाषा आयादीनां निवृत्तिर्भवति। आहोस्विदायादिर्यदार्धधातुकं तस्मिन्नवस्थिते विभाषा आयादीना[3]मुत्पत्तिर्भवति इत्याशंकितम्। तत्राद्य पक्षे सामान्य सूत्रेणाय् प्रत्यये तदन्तादामि[4] अ:प्रत्ययादित्यकार प्रत्यये च गोपायांचकार[5] गोपायेत्याय् प्रत्ययानिवृत्तिपक्षे इष्टसिद्धावपि तन्निवृत्ति पक्षे जुगोपगुप्तिरितीष्ट[6] रुपमिष्यते तच्च न प्राप्नोति।

गोपायां चकार[7] गोपेति[8] चानिष्ट[9] प्राप्नोतीति दूषणमुक्तम्[10]। द्विवतीये[11] तु गोपां चकार गोपेत्य निष्ट[12]ऽप्राप्त्यालिटि गुप् धातोराये मध्ये आमि[13] गोपायां चकार गुप्ति[14]र्जुगोपेतीष्ट सिद्धावपि गापायेतीष्टं न दूषणमुक्तम् (योग[15]विभाग सामर्थ्यात् सार्वधातुकेप्यांयागीकारेण गोपाय पतीति तु सिद्धमिति

1. नालिब्द्यायादीनाम् अ-1, अ-3; नलिन्यायादीनाम् अ-4.
2. प्राप्तियोगोपि अ-4.
3. आग्यादीनाम् अ-4.
4. तदंतादिभि अः प-1; तदेतादामि ज-2; तदेतादासि अः अ-1, अ-3
5. गोपयांचकार अ-3.
6. पाठोऽयं ज-2, प-1, प-1, प-2, अ-1, अ-3; जुगोपगुप्तिरिति सिद्धान्ते रूपमिमिष्यते ज-1; जुगुप्तिरिति इत्यारभ्य गोपांचकार इत्यन्तं अ-4 मातृकायां नाऽस्ति।
7. पाठोऽयं ज-2, प-2, अ-1, अ-3, अ-4; गोपां चकार ज-1, प-1.
8. कोपेति अ-4.
9. चानिष्टं ज-2, प-1, प-2, अ-1, अ-3, अ-4 मातृकासु नोपलभ्यते.
10. दूषणमुक्तः प-2.
11. द्वितीये तु ये प-2.
12. निष्टस्या लिटिगुप प-2; निष्टयप्राप्त्या प-1; निष्टाऽप्राप्त्या अ-4.
13. अमि गोपायाचकार प-1; आमिगोपाय अ-4.
14. गोप्तिर्जगोपीतिष्ट अ-2, अ-1, अ-3, अ-4; गुप्तिर्जुगोर्जुपेतीष्ट प-2, अ-1.
15. कोष्ठान्तर्गत पाठस्तु ज-2, प-1, प-2, अ-1, अ-3, अ-4 मातुकासु नाऽवलोक्यते.

य्वोरित्यनुर्वत्तते। 'इणो यण्' (6.4.81) इतिसाहचर्याद्व्याख्यानाच्च ऋधातोरेव ग्रहणम्। अर्त्तेरिवर्णस्येङ्ङित्यर्थः। अभ्यासस्यात्ता-वित्यभ्यासस्यार्तेरिति वा गुरुत्वान्न युक्तम्। न च ए ऐ आ औ-शब्देभ्य आचारक्विबन्तेभ्यो लिटीयङाद्यर्थं तत्सूत्रमावश्यकं तथा ओणधातोर्ण्वुलन्तादिच्छाक्यजन्तात्सन्युवोणकीयिषतीत्याद्यर्थ- मावश्यकमिति वाच्यम्, षाष्ठप्रथमाह्निकान्तस्थ भाष्यप्रामाण्येन तेषामनभिधानात्। अन्त्ये द्वितीयद्विर्वचनस्यैव सत्त्वेन त्वदुक्तप्रयोगास्यैव दुर्लभत्वात्। एवं च सम्पूर्णसूत्रस्यैव ज्ञापकता युक्ता।

यद्यपि भाष्ये 'यदयमभ्यासस्यासवर्ण इत्यसवर्णग्रहणं करोति' इति ग्रन्थेन असवर्णग्रहणस्यैव ज्ञापकता लभ्यते तथापि 'न ह्यन्तरेण' गुणवृद्धी असवर्णपरोभ्यासो भवति इति तदुपपादनग्रन्थेन सम्पूर्ण-सूत्रस्यैव ज्ञापकता लभ्यते। अग्रेऽपि नैतदस्ति ज्ञापकमर्त्यर्थमेतत् सूत्रदित्यनेन सूत्रसार्थक्यमेव दर्शितम्। असवर्णग्रहणस्यैव ज्ञापकत्वे तु तद्व्यावर्त्त्यप्रदर्शनेन तत्सार्थक्यमेव दर्शितं स्यात्।

न चाकृतव्यूहपरिभाषयेयेषेत्यादौ सवर्णदीर्घाप्राप्तिर्यदि दीर्घा न स्यात् तर्हि गुणः स्यादिति सम्भावनायाः सत्त्वेन परिभाषाप्रवृत्तेः सूपपादत्वादिति कथं सम्पूर्णसूत्रस्य ज्ञापकतेति वाच्यम्, तस्या असत्त्वात्। सत्त्वे वैतद्भाष्यप्रामाण्येन यत्रान्तरङ्गकार्य्यप्रवृत्तियोग्य-कालोत्तरमेव तन्निमित्तविनाशकबहिरङ्गविधेः प्राप्तिस्तत्रैव तत्परिभाषा-प्रवृत्तिस्वीकाराच्च।

न चान्तरङ्गत्वाद्दीर्घेऽपीयायेत्यादौ पूर्वान्तवत्त्वेनाभ्यासत्वादि-वर्णत्वाच्च णल्यसवर्ण इयङ्विधानेन सूत्रं चरितार्थम्; न च 'अचिश्नु' (6.4.77) इत्यनेन सिद्धिः, वृद्धिबाधनार्थत्वादिति वाच्यम्, प्रत्यासत्त्या सवर्णपदेनाभ्यासोत्तरखण्डसम्बन्ध्यसवर्णा च एव ग्रहणाच्छास्त्रबाध-कल्पनापेक्षया परिभाषाज्ञापकत्वस्यैवौचित्याच्चेत्याशु॥

सा चेयं धर्मिग्राहकमानादाङ्गवार्णयोः समानकार्य्यित्व एव।

यत्तु समाननिमित्तकत्वरूपसमानाश्रयत्व एवैषेति तन्न। ज्ञापितेऽपीयायेयेषेत्याद्यसिद्धः, सूत्रवैयर्थ्यस्य तदवस्थत्वाच्च। स्योन इत्यत्र तु वक्ष्यमाणरीत्यास्या अनित्यत्वादप्रवृत्तौ गुणादन्तरङ्गरङ्ग-त्वाद्यणादेशः।

च चैवमपीयायेत्यादावियङ्दुर्लभस्तत्र कर्त्तव्ये वृद्धयादेः स्थानिवत्त्वेन असवर्ण इति प्रतिषेधादिति वाच्यम्, सूत्रारम्भसामर्थ्यादेव स्थानिवत्त्वाप्रवृत्तेः। तच्च सामान्यापेक्षमभ्यासकार्ये तदुत्तरखण्डादेशस्य तत्कार्यप्रतिबन्धकी भूतं स्थानिवत्त्वं नेति। अत एवारतीत्यादौ यणादेशस्य स्थानिवत्त्वादभ्यासस्य 'ढ्रलोप' इति दीर्घो दुर्लभ इत्यपास्तम्। दीर्घविधौ तन्निषेधाच्च। अरियियादित्यत्र तु स्थानिवत्त्वेनेयङ् भवत्येव, तस्य स्थानिवत्त्वस्याभ्यासकार्यप्रतिबन्धकत्वाभावात्। इयं चाङ्गसम्बन्धिन्याङ्ग एवेति 'स्वरितो वा' (8.2.6) इति सूत्रे भाष्ये। तत्र हि-कुमार्यै इत्यादौ यणुत्तरमाडुक्तः।

इयं चानित्या 'च्छ्वोः' (1.4.19) इति सतुगतिर्देशात्। अन्यथाङ्गत्वात् पूर्व तुकःशादेशे तुकोऽप्राप्त्या तद्वैयर्थ्यं स्पष्टमेवेत्यन्यत्र विस्तरः॥55॥

नन्वेवं सेदुष इत्यादौ क्वसोरन्तरङ्गत्वादिटि ततः सम्प्रसारणे-ऽपीटः श्रवणापत्तिरिति? चेत् अत्र केचित्-

अकृतव्यूहाः पाणिनीयाः॥56॥

न कृतो विशिष्ट ऊहो निश्चयः शास्त्रप्रवृत्तिविषयो यैरित्यर्थः। भावि निमित्तविनाश इत्यध्याहारः। बहिरङ्गेणान्तरङ्गस्य निमित्तविनाशे पश्चात्सभावितेऽन्तरङ्गं नेति यावत्। अत्र न ज्ञापकं 'समर्थानां प्रथमात्' (4.1.82) इति सूत्रे समर्थानामिति। तद्धि सूत्थिततदिभ्यः कृतदीर्घेभ्यः प्रत्ययोत्पत्त्यर्थम्।

अन्यथान्तरङ्गत्वाद्दीर्घे कृत एव प्रत्ययप्राप्त्या तद्व्यर्थता स्पष्टैव। तत्र हि भाविन्यादिवृद्धया सवर्णाचत्वविनाशः स्पष्ट एव। न

चात्रैकादेशप्रवृत्तिसमये वृद्ध्यप्राप्त्यैकादेशे कृत आदेशे वृद्धेः प्राप्तावपि तन्निमित्तविनाशाभाव इति वाच्यम्। तद्द्वारैव तन्निमित्तविनाशसत्त्वे-नाक्षतेः। स च सौत्थितौ बहिरङ्गतया वृद्धेरसिद्धत्वान्न तन्निमित्तविनाश इति वाच्यम्। समर्थग्रहणेनैतद्विषये तस्या अप्रवृत्तेरपि ज्ञापनात्।

नतदनिष्पादनं क्रन्ते) तत सामान्यतः आयादयो वा सार्वधातुके नित्यमिति न्यासभेदेन समाधाय स्यादिवबलीयस्त्वन्तु विप्रतिषेधेनेति। विप्रतिषेधेन सार्वधातुके आयादीनाम्बाध[1] आशङ्कितः पश्चादनवका[2]शैरायादिभिरायादि-विधानानवकाशत्वादितिवार्त्तिक बलात्स्या[3]दीनां बाधमुक्त्वा गोपायिष्यतीत्य-स्यासित्द्यावग्रे यथा न्यासे एवादृर्धधातुके इति विषय सप्तमीमंगीकृत्य तत्सिद्धिरित्युक्तम्। एवञ्च[4] सार्वधातुके नित्यमित्यस्य लिद्य[5] प्राप्त्या आयादेस्तत्र चारितार्थ्यस्य वक्तुमशक्यत्वादिति बोध्यम्। क्वचिन्मूलपुस्तकेषु तद्दानोत्तर[6]मित्यस्याग्रेऽत[7] एवेत्यस्मात्प्राक्[8] आयादय इति पाठो दृश्यते। तत्प्रवृत्युत्तरं चारितार्थ्येऽपीति। न च रामादित्यत्र जश्त्वं वावसाने इति कौमुदी दर्शितक्रमविरोधः। जश्त्वे[9] तस्यासिद्धत्वात्। न च वचनप्रामाण्यम्[10] मथे[11] विलोडने इत्यस्मात्।

---

1. आयादीनां वावाध ज-2, प-2, अ-1, अ-3.
2. अनवकाशेरायादिनिरायदि प-2, प-1
3. बलात् यादीनां वाधमुक्ता ज-2; बलाहयादीनां प-2) वलालस्यादीनानां बाल अ-1, अ-3.
4. एव च प-1, प-2.
5. लिद्य नोपलभ्यते अ-4, प्राप्त्यादेस्तत्र प-1, प-2.
6. तदानोत्तरं ज-2, अ-1, अ-3, तदानात्तरमित्यस्या प-1
7. अत्र प-2.
8. एवेत्यस्मत् ज-2, अ-1.
9. जरत्वेनतस्या प-1, अ-4; जत्येवतस्या अ-1, अ-3.
10. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3; न च न प्रामाण्यम् ज-1; न च क्व न प्रामाण्यम् अ-4.
11. मिथे विलोडने ज-2, अ-1.

यत्तु समर्थग्रहणेनान्तरङ्गपरिभाषाया अनित्यत्वमेव ज्ञाप्यत इति तन्न। असिद्धपरिभाषया समकालप्राप्तबहिरङ्गस्य पूर्वजातबहिरङ्गस्य चान्तरङ्गे कर्त्तव्येऽसिद्धत्वं बोध्यते न तु जातेऽन्तरङ्गे तस्य तत्त्वं बोध्यते, मानाभावात् फलाभावाच्च। एवं च सूत्थितादावेकादेशस्य परिभाषासाध्यत्वाभावेन तदनित्यत्व ज्ञापनासम्भवात्। 'अन्तरङ्गनपि विधीन्' इत्यादेरप्यस्यामेवान्तर्भावः-

एतत्प्रवृत्तौ च निमित्तविनाशसम्भावनापि निमित्तम्। अत एव गोमद्दण्डीत्यादौ हलङ्यादिलोपो न। अन्यथा हल्ङ्यादिलोपकाले सामासिकलुकोऽप्राप्त्या तदुत्तरं चापहार्याभावादप्राप्त्या लोपस्यैवापत्तेः। अस्ति चात्रापि यदि लोपो न स्यात्तर्हि लुक् स्यादिति सम्भावना।

क्विपि[1] बुध अवगमने इत्यस्मात्क्विपि चाग्रिमत्[2] भुत् इत्यादौ स्वप्रवृत्तिप्रदर्शक लक्ष्ये[3] स्वप्रवृत्यवरोधकपूर्वशास्त्र प्रापक स्वोपस्थित पूर्वत्रासिद्धमित्यस्य वचन प्रामाण्यात् बाधेपि[4] स्वप्रवृत्तिप्रदर्शकरत्नमुट्[5] रामात् इत्यादि लक्ष्ये पूर्वशास्त्र प्रवर्तक स्वोपस्थित पूर्वत्रेत्यासौदा[6]सोन्येन बाधकत्वस्यापरिकल्पनेनादोष इत्याशयात्। अत एवाष्ट[7]णांता षट् इत्यादिना निर्देशा[8] तु[9] संगच्छते। एतेन[10] न च रामादित्यत्र-

---

1. क्रिपिवुध प-1.
2. चानीमत् भु प-2; वाग्रिमत् भ्रत्यादो ज-2; वाग्निमत् तुतयादौ अ-3.
3. लक्ष्येस्येरत्वप्रवृत्य ज-2, अ-3; लक्ष्ये स्ववस्व प्रवृत्य अ-4.
4. बाधपिस्या प्रवृत्ति ज-2, अ-3.
5. रलामुट् रमात् इत्वादि लक्षीपूर्व प-2.
6. पूर्वत्रेत्यसौदासोन्यन ज-2, अ-3.
7. एवाष्टगांता षट् ज-2; एवष्ट गांता षट् अ-1, अ-3; एवष्टगांताषट् प-2.
8. निद्र्देशा अ-1, अ-3.
9. तु संगछदे प-2; संगछंदे प-1.
10. 'न' नोपलभ्यते प-1, प-2.

जश्त्वं वावसाने इति कौमुद्युपदर्शित क्रमविरोधः। (तस्यासंभव एव बाध्यबाधक भाव इति वार्त्तिकमतानुसारित्वा दित्यादित्यानुपूर्वापर ग्रन्थ विरोध[1]) इति कैय्यटानुयायिनः परास्ताः। न च जश्त्वं बाधित्वेति शेखर विरोधः तस्य भास्करमतानुसारित्वात्। अत एव ऋधेर्धस्येति[2] प्रतीकस्य शब्दारत्नः[3] संगच्छते[4]। एतेन[5] जश्त्वमिति प्रतीकमुपादायापोद्येति शेष इत्युक्तात्र[6] अत एव पूर्वं[7] चर्त्वं घटितमुदाहरणम् प्रथममुक्तमंते[8] च द्वितीयमिति तदुक्तं स्वारस्य[9] च परास्तम्। रत्न मुडादौ चर्त्वेन षस्यैव च प्राप्त्यारत्नमुट्रत्नमुदितिमूलोक्तटकारघटित[10] प्रयोगे यत्नान्तरस्यास्थे[11] यत्वाच्च अदादेशस्तांत[12] इति तु अथ–

---

1. कोष्ठान्तर्गत पाठस्तु ज-2, अ-1, अ-3 मातृकासु नोपलभ्यते.
2. ऋद्वेर्ध स्येति ज-2; ऋधेस्येधातिप्रतीकस्य अ-1, अ-3; ज्ञधेर्यस्लेति यतीकस्य अ-4.
3. शब्दरः रलः प-2.
4. संशोधित पाठः, संगछते ज-1, ज-2, प-1, प-2, अ-1, अ-3, अ-4.
5. पाठोऽयं ज-2, प-1, प-1, अ-1,अ-3, अ-4; अत एव जश्त्वमिति ज-1.
6. इत्युक्ता प-2; इत्युक्त्वा अ-1, अ-3.
7. पूर्वघटितमुदाहरणम् प-1; पूर्वेचर्त्वघटितम् अ-4.
8. प्रथमुक्ते मंते अ-4; प्रथममुक्तमंते च द्वितीयामिति प-2; प्रथममुक्तमंतवद्वितीयमिति ज-2, अ-1, अ-3.
9. स्वरस्य च ज-2, अ-1, अ-3.
10. पाठोऽयं ज-2, प-1, प-2, अ-1, अ-3, अ-4, पठित ज-1.
11. यत्नात्तरस्य स्थे व्यत्वाच्च ज-2; यत्नातुरस्य स्थेव्यत्वा च अ-3, अ-4.
12. आदादेश ज-2, प-2, अ-1, अ-3, अ-4.

अल्लोपोऽनः (6.4.134) इति सूत्रस्थ तपरकरणं तु परिभाषाऽनित्यत्व-ज्ञापनेन चरितार्थम्। तद्ध्यान इत्यादौ लोपवारणाय। अन्यथा दीर्घाभावे लोपसम्भावनयैतत्परिभाषा बलाद्दीर्घाप्राप्तौ तद्वैयर्थ्यं स्पष्टमेवेत्याहुः।

'समर्थानाम्' इति सूत्र कैयटस्तु समर्थवचनेनेयं परिभाषा ज्ञाप्यते 'अकृतव्यूहाः पाणिनीयाः' इति, तेन पपुष इत्यादावन्तरङ्गत्वात्पूर्व कृतोऽपीडागमो निवर्त्तत इति वदन् न कृतो व्यूहो विशिष्टस्तर्को निमित्तकारणविनाशेऽपि कार्य स्थितिरूपो यैरित्यर्थमभिप्रैति। 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति यावत्। सूत्थितादिञि वृद्धौ दीर्घनिवृत्तौ सावुत्थितिर्माभूदिति समर्थानामिति। लोकन्याय-सिद्धश्चायमर्थः। तथा हि लोके निमित्तं द्विविधं दृष्टम् कार्यस्थितौ

किमर्थमाहुच्यते न अदेवाचेत[1] कारुप सिद्धिः वृक्षात्। ल्यपात्[2] सवर्ण[3] दीर्घत्वेन न सिद्धं न सिध्यति अतो गुण इति पररुपं प्राप्नोति अकारोच्चारणसामर्थ्यान्नभविष्यतीति भाष्यस्थाकारोच्चारणसामर्थ्यादिति प्रतीकमुपादाय अन्यथा[4] तकार एव विधीयते[5] आदेः[6] परस्येत्यादेः तकारेघटिते[7] संयोगान्तलोपे च वृक्षादिति सिध्यतीति कैय्यटोक्तेऽवसेयः[8]। किंचदांते फलाभावेन सूत्रे[9] प्रक्रिया गौरवस्यानादेयत्वाच्चेति दिक्॥57॥

---

1. अनंदेवोच्येत्तकारूप सिखिः ज-2, अ-1, अ-3, न देवोच्येतकाररूप प-1.
2. वृक्षात् त्युक्षात् सवर्ण ज-2, अ-1, अ-3; वृक्षात् प्लाक्षात् प-1, प-2.
3. वृक्षात् प्लाक्षात् अ-4; सवर्णे अ-3.
4. अन्यथाकार अ-4.
5. विधियेत् प-1.
6. अदेः परस्येत्यादे प-1.
7. विहिते ज-2, प-1, अ-1, अ-4.
8. कैयटोक्तेरवसेयः ज-2, प-1, प-2, अ-3.
9. सूत्र अ-4.

शैषिकोऽण् बोध्यः इति। तस्य विधायकत्वस्यापि स्वीकारादिति भावः। यद्पि मनोरमायां चाक्षुषादीनां तस्येद[1]मित्यणादार्षदादीनां तु संस्कृतं भक्षा इत्यणासिद्धिरिति शेष इति सूत्रस्य[2] लक्षणत्वं व्यर्थम्। आर्द्रकाशालेत्[3]यादयो वृद्धास्तेषां वृद्धाच्छ इत्येव छे सिद्धे चातुरर्थ्यधिकार पठितोत्करादिभ्यश्छः[4] इति उत्कारादिषु तेषां पाठो ज्ञापयति[5] नेति नेतः प्रागर्थेषु द्यादयस्युरिति अनेक ज्ञापकेनापत्यादि[6] चतुर्थीपर्यन्तातिरिक्ते एव द्यादयो भविष्यतीति[7] अधिकारत्वमप्यस्य नोपयुज्यत इत्युक्त[8] तथापि तत्रैव शैषिकान्मतु[9]वर्थीयादित्यस्य विषयविभागलाभार्थं शैषिकत्वप्रयुक्तं कार्यं ध्वनयितुं[11] क्रियमाणशैषाधिकारेण श्लोकस्य ज्ञापनार्थं च अधिकारत्व-स्यावश्यकत्वे विधायकत्वमपि (बोधनात्[12])। तस्य[13] सुवचमिति[14] न तत्र सूत्रे निर्भरः कार्यः इत्युपसंहारेण[15] विधायकत्वस्यापि बोधनात्। अत एव

---

1. अस्येदम् ज-2.
2. सूत्रलक्षणत्वम् अ-4.
3. पाठोऽयं प-1, प-2, अ-1, अ-3, अ-4; व्यर्थं अह आह श्रशालेत्यादि ज-1; आर्छकाशालेत्यादयो ज-2.
4. सं. पाठः (4.2.90).
5. ज्ञापयतिः नेतः प्रागर्थेषु प-1; नत प्रागर्थेषु प-2; ज्ञापयति नेतः प्रागित्यर्थेषु अ-4.
6. ज्ञापकेनाद्यत्यादि ज-2, अ-3.
7. भविष्यन्तीति प-1.
8. इतयुक्तं तथापि षधिकारेप्यश्लोकस्य ज्ञापनार्थं तत्रेव इति पाठोपलभ्यते अ-4.
9. मतुवार्थीयादित्यस्य अ-3.
10. धनयितुं ज-2.
11. शेषाधिकारण ज-2, अ-3; शेषाधिकारे अ-4.
12. पाठोऽयं प-2 मातृकायामेवावलोक्यते.
13. 'तस्य' नाऽस्ति प-2.
14. पाठोऽयं प-1, प-2; सुपंचमिति तत्र अ-1, अ-3; सुयंवमिति ज-2; सुवचत्वमिति न तत्र अ-4.
15. इत्युपसंहारेण विषय लाभार्थं तस्येदमित्यार्थस्या इति अ-4 मातृकायां पाठोपलभ्यते.

नियामकं तदनियामकं च। आद्यं यथा न्यायनयेऽपेक्षाबुद्धिः, तन्नाशे द्वित्वनाशाभ्युपगमात्। वेदान्तिनये प्रारब्धस्य विक्षेपस्थिति नियामकत्वं च प्रसिद्धमेव। द्वितीयं यथा दण्डादि, तन्नाशेऽपि घटनाशादर्शनात्। शास्त्रे लक्ष्यानुरोधाद्व्यवस्था। भाविनिमित्तविनाशे पूर्वमनुत्पत्तौ तु न कश्चिन्नयायो नापि सप्रतिपन्नो दृष्टान्तः। समर्थानामित्यस्यापि लोकसिद्धार्थज्ञापनेन चारितार्थ्य सम्भवे लोकसिद्धापूर्वतादृशार्थज्ञापकत्वे मानाभाव इति तदाशय इति बोध्यम्॥

शेखरेपि[1] पूर्वोक्तानेक ज्ञापकाश्रयणभियैव शेषिकान्मतुवर्थीया[2] दित्यस्य विषयलाभार्थ तस्येदमित्यादावपत्याद्यर्थस्याग्रहणार्थं च लक्षणत्वमधिकारत्वं चावश्यमाश्रयणीयमित्येवोक्त-अत एव वृत्थैर्वृत्थाच्छ[3] इति तु न जाताद्यर्थेष्वेव[4] विशेषरुपेणतत्तत्सूत्रेण विधाना[5]त्तदन्यसंग्रहार्थमेव तस्याविधायकत्वांगी-कारादित्युक्तम्। विचारांतरमपि[6] वृद्धोक्तेरेवावसेयम्। शेष इति सूत्रे भाष्ये तु शेष इति उच्यते। कः शेषो नाम इत्येकदेशिनापृष्टे अपत्यादि चतुर्थी[7] पर्यन्तेभ्यो येऽन्येऽर्थाः सशेष इति सिद्धांतिनोक्ते ततः शेषग्रहणप्रयोजनप्रश्ने राष्ट्रावारपाराद्ध[8]खौ इत्याद्यर्था निर्देशसूत्रविहितप्रत्ययानां स्वार्थिकत्व[9] भियाशेषाधिकार इत्युत्तरिते सिद्धांतिना तत एकदेशिराष्ट्रेत्यादिसूत्रसंघातस्य तत्र जात इत्यत्रानुवृत्तिं स्वीकृत्य सूत्रं प्रत्याख्यातवान्। ततः सिद्धांती

---

1 एव खरेऽपि प-1, प-2.
2. मतवर्थो ज-2, अ-3.
3. पाठोऽयं प-2; वृखैर्वृस्वाच्छ अ-1; वृखैर्वृछाछ ज-2, प-1.
4. जाताद्यर्थोप्येव प-2.
5. विधातात्तदन्य प-1; विधानातदन्यम् अ-4.
6. पाठोऽयं प-1, प-2, अ-4; विचारांतमपि अ-1, ज-2, अ-3.
7. चरतुर्थपर्यन्तेभ्यो ज-2, अ-3, अ-4.
8. सं. पाठः (4.2.93 अष्टा).
9. स्वाप्यकत्व ज-2.

परे तु सेदुष इत्यादौ पदावधिकेऽन्वाख्याने सेद् वस् अस् इति स्थिते इट्सम्प्रसारणयोः प्राप्तयोः प्रतिपदविधित्वात्पूर्वं सप्रंसारणे वलादित्वाभावादिटः प्राप्तिरेव नेति तत्सिद्धिरिति 'समर्थानाम्' इति सूत्रे कैयटे 'असिद्धवत्' सूत्रे च कैयटे स्पष्टमेतत्। यद्यपि प्रतिपदविधित्वमनवकाशत्वे सत्येव बाधकत्वे बीजम्; तथापि पूर्वप्रवृत्तौ

यद्यनुवर्तिष्यन्ते[1] तर्हि राष्ट्रेति[2] सूत्रस्योत्तरत्रग्रामाद्यखञावित्यादावनुवृत्तौ ग्रामशब्दादिभ्योऽपि पूर्वं[3] प्रत्यय प्राप्तौधिकार[4] इत्याह तत एकदेशी राष्ट्रावाराद्व तत्र जात इत्यादेः प्रत्ययापेक्षाया[5] अनंतर विभाषा पूर्वाह्ला[6]पराह्लार्द्रामूल इत्यस्यैव संबंधप्राप्तौ च शेषधिकार इत्याह। तत एकदेशी राष्ट्रावार पाराद्धरवौ ग्रामाद्यखञौ[7] राष्ट्रावारपाराद्धरवाविति संबंधानुवृत्ति[8] स्वीकृत्य प्रत्याचष्टे[9] सूत्रम्। एवन्च संबन्धानुवृत्यासूत्रप्रत्याख्यान[10] क्लिष्टमित्येक-देश्युक्तित्वं स्पष्टमेव किं चाधिकारार्थकत्वाभावे[11] तत्र जात इति भाष्य[12] विरोधाच्चैकद्देश्युक्तित्वमस्य तच्च[13] भाष्यमनुपदमेवस्फुटो भविष्यति। ततः

---

1. यद्यनुवर्तिष्यते अ-3, अ-4.
2. राष्ट्रेति प-2.
3. पूर्वपूर्व अ-4.
4. अधिकार इत्यारभ्य राष्ट्रावाराद्व इत्यन्तं प-1, अ-4, प-2 मातृकासु नोपलभ्यते; प्रत्ययप्राप्तौधिका तत्र जात इति पाठोपलभ्यते ज-2.
5. प्रत्यापेक्षाया अ-4.
6. संशो पाठः पूर्वाह्ला पराह्लाद्रामूलप्रदोषावस्कराद्वुन् 4/3/28.
7. राष्ट्रावारपाराद्धरवौ 4/2/93, 15-4/2/94 अष्टा.
8. संवंधानुवृक्षेत् अ-4.
9. प्रयोजष्टे अ-4; मत्याचष्टे ज-2.
10. प्रत्याख्यानुक्लिष्ट ज-2, अ-3; प्रत्यानक्लिष्ट अ-4.
11. कत्वा भवितव्यजात प-1, प-2; कृत्वाभावेने अ-3.
12. भाष्याविरोधात् ज-2.
13. तच्चाभाव्यम् ज-2, अ-3.

राष्ट्रा[1]वारपारेत्यादीनामनुवृत्तौ द्यादीनां विधानेन तेषां स्वार्थिकत्व परिहारेपि[2] अपत्यं समूह इत्याद्यर्थानामिदं तत्वव्याप्यत्वेन तस्येदमिति[3] सूत्रेणापत्यादय:[4] स्युस्तेमाभूवंन्नित्यधिकार इत्यर्थकं अत उत्तरं पठति[5] शेष वचनं द्यादिनाम-पत्यादिष्व प्रसङ्गार्थमिति उपक्रम्याग्रे ज्ञापकेन अधिकारार्थकत्वाभवासाधकं भाष्यं तु एकदेशिनोरुक्ति[6] प्रत्युक्ति परं बोध्यम्। एतत्पूर्वोतर[7] भाष्य[8] पर्यालोचनेऽधिकारार्थकत्वाभव: सूत्रस्येति गम्यते न विधायकत्वाभाव: विधायकत्वं अस्ति वा[9]नवेत्यंशे भाष्ये विचारस्यैव वा[10] भावात्। सर्वथा सूत्र प्रत्याख्यान[11] मनसि निधाय यदि तर्हि शेषग्रहण[12] प्रत्याख्यायते तदा तस्य लक्षणतया[13] यानि शब्दरूपाणि चाक्षुषं रूपं दार्षदा:[14] सक्तव इत्यादीनि तेषां सिद्धि: कथमित्याशंक्य क्वचित्तस्येद[15]मित्यणा क्वचित्संस्कृतं भक्षाइत्यणा[16]

---

1. राष्टावारयोरेत्यादिनाम प-2; राष्ट्रचारपरित्यादीनाम् ज-2.
2. परिपि अपत्य अ-3 परिहारिपि ज-2.
3. तस्येदामेति प-1, प-2, अ-3.
4. सूत्रेणा त्याद्यर्थे द्यादय: स्युस्ते मा भुवम् प-1, अ-4; सूत्रेणापत्याद्यर्थोद्यादय प-2.
5. पटविशेष ज-2, अ-3.
6. पाठोऽयं प-1, प-2, अ-4; एकेशिनारूक्ति अ-1, ज-2, अ-3.
7. 'त' नोपलभ्यते अ-3.
8. भाष्यापर्यालोचने प-1.
9. विधायकत्वमस्त्विनानवेत्यंशे प-2.
10. पाठोऽयं प-1, प-2, अ-4; भाष्ये वध्विावारस्यैवा भावात् अ-1.; विद्यावारस्यैवा भावात् ज-2; भाष्ये विऽवावारस्येवा भावात् अ-3.
11. प्रत्याख्यान ज-2, प-2.
12. णम् नाऽस्ति अ-4.
13. पाठोऽयं प-1, प-2; निशब्दरूपाणि अ-1, ज-2, अ-3, अ-4.
14. रूपे दार्पदा: ज-2, अ-3.
15. क्वचितस्येदौमित्यणा ज-2; क्वचितस्येदम् प-2.
16. इत्यणावसिद्धिं ज-2, अ-3.

सावकाशत्वेऽपि नियामकं भवत्येवेति तदाशयः। निरूपितं चैतद्

च सिद्धिमाह कैय्यट– सोपि प्रमादिक[1] एव अत एव सूत्रशेषे तत्र जात इत्यत्र तु सूत्रस्य लक्षणत्वमाश्रित्य एतेषां सिद्धिमभि[2]धास्यति नागनाथ[3] इति कैय्यटः संगच्छते। तत्र जात इति सूत्रे भाष्ये तु शेष इत्यनु[4]वृत्त्यैव द्यादीनां स्वार्थिकत्वासिद्धे र्जातादयर्थे[5] निर्देशो व्यर्थ इत्यर्थे[6] कं किमर्थं जाताद्योर्था निर्दिश्यंते इत्युक्तास्त्रघ्न[7] आस्ते इत्यादावपि शेष इत्यस्य लक्षण[8]त्वात् प्रत्ययप्रसङ्ग इति कैयटोक्तार्थक तत्रास्ते तत्र[9] शेते इत्यत्रापि प्रत्ययप्रसंगभियानियमार्थं[10] जाताद्यर्थे निर्देशेति[11] उत्तरं पठति। तत्र जातादिषु वचनं[12] नियमार्थम्। एष्वर्थेषु द्यादयस्युरिहमा[13]भुवन्। तत्रास्ते[14] तत्र शेते इत्युक्तम्। ततः जाताद्यर्थ निर्देशस्य नियामकत्वे निर्दिष्टार्थेषु[15] पिष्ट क्षुण्णाद्यर्था[16]

---

1. पाठोऽयं प–1, प–2; सोपिमादिक एवा आत एव अ–1; सोपियामादिक एवा आत ज–2; सोपिमाद दिक एवा अ–3; सोपिप्रामादिक अ–4.
2. सिद्धिमतिधास्यति अ–3.
3. नागथ इति प–2; नागनाऽस्ति अ–4.
4. इत्यनुत्येव ज–2, अ–3.
5. जान्नद्यर्थ प–1, प–2.
6. इत्यकं किमर्थं प–1, प–2.
7. सुप्त आस्ते ज–2; इत्युक्त्वा सुघ्र आस्ते, अ–4, प–2.
8. लक्षणात्प्रयप्रसंग प–1 लक्षणात्प्रय प–2.
9. तत्र शेते इत्यत्रापि प्रसंगाभियानियमार्थ इति अ–4 पाठोपलभ्यतेः तत्र शेमे प–2; सत्र शेमे प–1.
10. पाठोऽयं प–1, प–2, अ–4; नियामार्थं अ–1, अ–2, अ–3.
11. निद्र्देशोत्तर अ–4.
12. वचन निमार्थम् प–1.
13. इहमाभूवत् प–2.
14. तत्रास्ते त्रसेते प–1.
15. निदिष्टार्थेषु अ–3.
16. पाठोऽयं प–1, प–2; पिष्टक्षस्माद्यथा निर्देशेन अ–1, अ–4; पिष्टस्तस्माद्य अ–3; पिष्टत्तस्माद्य ज–2.

बहुशः शब्देन्दुशेखरे। 'समर्थानाम्' इति सूत्रस्थसमथग्रहणं तु विषुण इत्यादावकृतसन्धेः प्रत्ययदर्शनेन सर्वत्र तथा भ्रमवारणाय न्याय-सिद्धार्थानुवाद एव। ध्वनितं चेदं 'विप्रतिषेध सूत्रे' भाष्ये। तत्र हि-

---

निर्देशेन – दार्षदादीना[1] असिद्धि[2]शंकायां संस्कृतमित्यनेन सिद्धिमभिधाय[3] भवेत् सिद्धं दार्षदाः सक्तव इति इद[4] तु न सिध्यति औलूखलो पावक इति। नामतद्[5]भवति यत्त्त् एवापकृष्याभ्यवह्रीयते न च पावक उलूख[6]लादेवाप[7]कृष्याभ्यवह्रीयतै। अवश्यंरधनादीनि प्रतीक्षते[8]-

तस्मान्नार्थो[9] नियमेन कस्मान्न भवति[10]। तत्राते तत्र शेते[11] इति। अनभिधाना[12]दित्याह भगवान्। अग्रेचार्थ निर्देशाभावे समर्थ विभक्ती-नामप्याक्षेपात्[13] लाभे तत्र जातस्तत्र भवेत्यादि[14]सूत्राणां वैय्यर्थेन[15] सिद्धांते प्रावृषष्ठा[16] वितिष्ट[17] यो जातार्थो इष्टस्य प्रावृष एण्य इति एण्यस्य भवार्थे

---

1. दार्ष नाऽस्ति प-2.
2. पाठोऽयं प-2; असिद्धिशंकायो अ-1, अ-3, भवोसिद्ध प-2.
3. इति दं तु न ज-2.
4. तामतांद्भतति पततिरावापनूथाम्यवह्रीयते ज-2;.
5. उलूंखलो प-1.
6. देवाकृष्याव्यवह्यते अ-4.
7. प्रतीक्षंर्ते प-2; प्रतीक्षंते प-1, अ-4.
8. तस्मान्नर्थे नियमेन कस्मत्र प-2.
9. पाठोऽयं प-1, प-2, अ-4; भवते अ-1, ज-2, अ-3.
10. तत्र शेशेते इति प-2.
11. अनभिधानादेत्याह प-2. अनभिहानादेत्याह प-1; अनभधानादित्याह अ-4.
12. क्षेपालाभे प-2.
13. भवेत्यादि दि ज-2; भावेत्यादि दि अ-3.
14. संत्राणायेय्यर्थेन ज-2, अ-3.
15. प्रावृषष्ठप् 4/3/26 अष्टा.
16. जातार्थे प-1, प-2.
17. 4/3/17 अष्टा..

वैक्षमाणिरित्यन्तरङ्गपरिभाषोदाहरणमुक्तम्। किञ्च विभज्यान्वाख्याने सु उत्थित अस् इ इति स्थिते 'वार्णादाङ्गं वलीय' इति प्राप्तवृद्धिवारणाय समर्थग्रहणमित्यत्रैव सूत्रे कैयटे स्पष्टम्। अत एव असिद्धवत्सूत्रे-वसोः सम्प्रसारणमज्विधौ सिद्धं वक्तव्यं पपुष इत्यादौवसोः सम्प्रसारणे कृते आतो लोपो यथा स्यात् इति भाष्य उक्तम्। पदस्य विभज्यान्वाख्याने पूर्वोक्तकैयटरीत्या पूर्व संप्रसारणे इटोऽप्राप्तावुसनिमित्तक एवातो लोप इति तदाशयः। अन्यथाऽन्तरङ्गत्वादिटि तन्निमित्तक एवातो लोप इति तदसङ्गतिः। अत एव चौ प्रत्यङ्गस्य प्रतिषेध इति वचनं

इष्टस्य वैपरीत्यापत्तेरसंकरेण प्रत्ययविधानार्थं तावदर्थ निर्देश इति सिद्धांतितं यान्यसंकराणिकृतलब्धक्रीतकुशला इत्यादीनि तानि न कर्त्तव्यानि इति उपसंहृतं च। अस्माद्[1]भाष्या तु उभयार्थकत्वमपि सूत्रस्य प्रतीयते[2] किं चाधिकारार्थकत्वाभावे ज्ञापक[3] साध्ये क्रीताद्यर्थ[4] निर्देशानामनेकेषां कर्त्तव्यत्वापत्या विपरीत[5] गौरवं तत्र जात इति सूत्रे मनोरमायामपि[6] उभयार्थकत्वमुक्तम्। अत्रत्य भाष्यविरोधात्पूर्वापरस्व[7] ग्रंथविरोधाच्च शेष इति सूत्रस्थ मनोरमातु चिंत्यैव। इदं मदुक्तं सर्वं मनसि[8] निधायैवोभयार्थकत्वं सूत्रस्योक्तं स चोपदर्शित[9] प्राक्। शेषे इति सूत्रप्रत्याख्यानपरग्रन्थास्तु लाघवपक्षपाति एतत्सूत्रस्थ[10] भाष्यविरोधादुपेक्ष्या[11] एवेति दिक्।

---

1. अस्माद्भाष्यात् प-1, प-2.
2. प्रतीयाते ज-2, अ-3.
3. ज्ञापक सध्ये प-2; ज्ञापकसंछेह्लीतद्यर्थ प-1.
4. क्रोत्ताद्यर्थ ज-2.
5. विपरीतोतगौरवम् ज-2, अ-3.
6. मनोरममामपि प-2.
7. पूर्वापरस्य ज-2, अ-3, अ-4.
8. मतरिधायैवोभयार्थकत्वम् प-2.
9. सवोपदर्शितं ज-2, अ-3; सचोपदर्शितप्राक् प-2.
10. सूत्रस्य भाष्य प-2; सूत्रस्थभाष्ये प-1.
11. विरोधाह् प्रेक्ष्या एवेति ज-2.

वार्त्तिक कृतारब्धं भाष्यकृता च न प्रत्याख्यानम्। प्रत्यङ्गमन्तरङ्गम्। अस्यां परिभाषायां सत्यां तु तद्वैयर्थ्यं स्पष्टमेव। अत एव 'च्छ्वोः'

एतेन अत्र नव्यतराः काञ्चनेन[1] निर्मितेत्यर्थे शैषिकेऽणि[2] न कुत्रापि दोष इति तत्रेदं वक्तव्यम्। किं शेषिकोऽण्[3] तस्येदमित्यनेन विवक्षितो[4] निर्माणस्येदमर्थव्याप्यत्वादुत्तशेष[5] इत्यस्य स्वतन्त्रविधायकत्वेनाप्यंगी-कारात्तेनेति[6]। नाद्यः वृद्धाच्छ इत्यनेन वाधादिति[7] भास्करेणैवदूषिततत्वात्[8]। अत एव न द्वितीयः शेष इत्यस्य प्रत्याख्यानाच्च। अधिकारत्वे प्रयोजनानां[9] (ज्ञापकै[10]रन्यथासिद्धे र्भाष्ये प्रदर्शिततत्वात्। स्वतन्त्रविधायकत्वे प्रयोजनानां तु चाक्षुषं रूपमित्यादीनां) तस्येद[11]मित्यनेन सिद्धेः कैयटोपाध्यायैरुक्तत्वात्। अत एव ज्ञापकादानु[12]मानिक वचनकल्पनेन[13] स्थितस्य वचनस्य[14] प्रत्याख्यानं

---

1. सं. पाठः कांचने निर्मिते अ-1, अ-2, अ-3, अ-4; निर्मित प-2; कांचनेनिमित्ते प-1.
2. शैधिके आणि न अ-4.
3. शेषिकौण् अ-3.
4. विवक्षितौ अ-3.
5. पाठोऽयं प-1, प-2, अ-4; व्याप्यत्वादुतशेपदस्य प-2 अ-1, अ-3; व्याप्यत्वाद्दुदशेपदस्य ज-2.
6. ते नति ज-2, अ-3.
7. वाबाधादिति प-2.
8. पाठोऽयं ज-2, प-1, अ-3, अ-4; भास्कोरणैव अ-1; भास्कारेणैव प-2.
9. प्रयोजनाम् प-2.
10. कोष्ठान्तर्गत पाठस्तु प-1, प-2 पुस्तकयोः एव समुपलभ्यते.
11. तस्योदम् अ-3; तस्योहम् ज-2.
12. ज्ञापकादामुमानिक ज-2, अ-3.
13. कल्पनेनास्थ ज-2, अ-3.
14. सं. पाठः, कल्पनेनास्थ तस्ये वचनस्य प-2; कल्पनेनास्थ तस्ये च चनस्य ज-2, अ-3; कल्पनेनास्थितरस्य वचनस्य अ-1; कल्पने नास्थ तस्ये च चनस्य ज-2, अ-3; कल्पनेनास्थितरस्य वचनस्य प-2; प-1.

(6.4.19) इति सूत्रेऽवश्यमत्र तुगभावार्थो यत्रः कार्योऽन्तरङ्गत्वाद्धि तुक् प्राप्नोतीति भाष्य उक्तम्। एतत्सत्त्वे तु तुकोऽप्राप्त्या यत्नावश्यकत्व कथनमसङ्गतमिति स्पष्टमेव। न चैतदनित्यत्वज्ञापनार्थमेव तदिति तदाशयः अवश्यमत्रेत्यक्षरस्वारस्य भङ्गापत्तेः।

किञ्चानयैव 'प्रत्ययोत्तरपदयोश्च' (7.2.98) अदो जग्धिर्ल्यप्ति किति (3.4.36) इत्यनयोश्चारितार्थ्येन तज्ज्ञापकवशाल्लुग्ल्यपोरन्तरङ्गबाधकता भाष्योक्ता भज्येत।

किच्चैषा भाष्ये न दृश्यते। तदुक्तमसिद्धवत्सूत्रे कैयटेन-

न सुष्ट्विति[1] अभि[2]संधायाधिकारत्वमस्तु लक्षणत्वं[3] तु नातीवोपयुज्यते इति मिश्रैरुक्तं दीक्षितैरपि शेषिकान्[4] मतुवर्थीयाच्छैषिको[5] मतुवर्थीक इत्यस्य विषयविभागार्थत्वमधिकारस्य व्यवस्थाप्यैवं स्थिते[6] विधायकत्व मपि तस्य सुचमिति[7] नातीव[8] तत्र निर्भरः कार्य इत्युक्तम्। न च काञ्चनीत्यादि सिद्ध्यर्थं विधाय[9]कत्वस्यावश्यकतया तद्वैयर्थ्योक्ति-

---

1. न न सुष्ट्विति प-1; न सुष्ट्ति प-2.
2. अत्रिसंधाया प-1.
3. लक्ष्यणत्वम् ज-2, अ-3, अ-4.
4. 'शे' नाऽस्ति प-1, प-2.
5. पाठोऽयं प-1, अ-4; मतुवर्थीपृच्छैषिकोमतुवर्थिक अ-1, अ-3; अतुवर्थी ज-2.
6. छित ज-2; स्छित अ-3.
7. पाठोऽयं प-2, अ-4; सुवर्कमतिनातीव अ-1, अ-3; सुवणीमतिनातीव ज-2; सुक्वमितिनातीव प-1.
8. नतिव प-2.
9. विधायत्वस्यावश्यतया प-1, प-2, विधायकत्वस्या अ-4; विधायकुत्वस्यावश्यकतया ज-2, अ-3.

'निमित्तापाये नैमित्तिकस्याप्यपाय' इति परिभाषाया भाष्यकृताना-श्रयणादिति पदसंस्कारपक्षे हरित्यादौ विसर्गे कृते ततो गच्छतीत्यादि-सम्बन्धे हरिःगच्छतीत्याद्येव साधु। तद्विषये पदसंस्कारपक्षानाश्रयणं वेति दिक्॥56॥

अन्तरङ्गादप्यपवादो बलीयान्॥

तत्रापवादपदार्थमाह-

येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति॥57॥

प्राप्त इति भावे क्तः। येन नाप्राप्त इत्यस्य यत्कर्तृकावश्यप्राप्ता-वित्यर्थः नञ्द्वयस्य प्रकृतार्थदाढ्र्यबोधकत्वात्। एवं च विशेष-शास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिसामान्यधमावच्छिन्नोद्देश्यक-शास्त्रस्य विशेषशास्त्रेण बाधः। तदप्राप्तियोग्येऽचारितार्थ्यं ह्येतस्य बाधकत्वे बीजम्। अत एव 'आयादयः' (3.1.31) इति सूत्रे गोपायिष्य तीत्यादावायादीन् बाधित्वा पर त्वात् स्यादयः प्राप्नुवन्तीत्या-शङ्क्यानवकाशा आयादयः गोपायती त्यादावपि शप्स्यादिः प्राप्नोति। न च सति शय्यसति वा न विशेषः, अन्यदिदानीमिदमुच्यते नास्ति विशेष इति। यदुक्तमायादीनां स्यादिभिरव्याप्तोऽवकाश इति स नास्त्यवकाश इति भाष्य उक्तम्। एवमत्र तत्प्रवृत्त्युत्तरं चारितार्थ्येऽपि तदव्याप्तोऽवकाशो नास्तीति सममेव।

किञ्चानेन न्यायेन तत्प्रवृत्त्युत्तरमपि चारितार्थ्येऽपि तद्बाध-बोधनम् अन्यथानवकाशत्वेनैव बाधे सिद्ध एतत्कथनस्यैव वैयर्थ्या-पत्तेस्तक्रकौण्डिन्य न्यायप्रदर्शनस्यापि वैयर्थ्यापत्तेश्च। यथा प्रथम-द्विर्वचनस्य तदुत्तरं सावकाशेनापि द्वितीयद्विवचनेन बाधः, यथा चादेरपि प्रवृत्त्या चरितार्थेन 'आदेः परस्य' (1.1.54) इत्यनेन 'अलोऽन्त्यस्य' (1.1.52) इत्यस्य बाधः। तदुक्तं 'मिदचोऽत्यात्' (1.1.47) इति सूत्रे भाष्येसत्यपि सम्भवे बाधनं भवतीति। अन्यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यत्र तक्रदानेन दधिदानस्य

बाधो न स्यात् तद्दानोत्तरं तत्पूर्वं वा तद्दानस्य चारितार्थ्यसम्भवात्।

अत एव विषयभेदेऽप्यपवादत्वम्। अत एवाचि रादेशेन नुटोऽप्यपवादत्वाद्बाधमाशङ्क्य 'न तिसृ' (6.4.4) इति ज्ञापकेन समाहितं तृज्वत्सूत्रे भाष्ये। तेन विषयभेदेऽपवादत्वाभाव एव बोध्यत इति कश्चित् तन्न। विन्मतोर्लुका टिलोपमात्रस्य बाधानापत्तेः।

यत्तु 'दयतेर्दिगि' (7.4.9) इति सूत्रे द्वित्वोत्तरं दिग्यादेशस्य चारितार्थ्यं कैयटेनोक्तं तत् प्रौढ्या। ध्वनितं च तैनापि तस्य तथात्वं तदुत्तरग्रन्थेन। 'असम्भव एव बाधकत्वं' विरोधस्य तद्बीजत्वात् इति वार्त्तिकमतं तु भाष्यकृता दूषितत्वान्न लक्ष्यसिद्ध्युपयोगि॥

तक्रकौण्डिन्यन्यायोऽपि तदप्राप्तियोग्येऽचरितार्थविषय विधेयविषय एव चेति 'तद्धितेष्वचामादेः' (7.2.117) 'धातोरेकाचः' (3.1.22) इत्यादि सूत्रेषु भाष्ये स्पष्टम्। क्वचित्तु सर्वथानवकाशत्वादेव बाधकत्वम्, यथा- ङे रामो याडादिबाधकत्वम्। न हि याडादिषु कृतेषु ङेराम प्राप्नोति, निदिश्यमानस्य व्यवधानात्। तत्र स्वस्य पूर्वं प्रवृत्तिरित्येव तेषां बाधः। तत्र बाधके प्रवृत्ते यद्युत्सर्गप्राप्तिर्भवति तदा भवत्येव। यथा तत्रैव याडादयः। अप्राप्तौ तु न यथा पचेयुरित्यादौ दीर्घबाधके निरवकाश इयादेशे दीर्घाभावः॥57॥

तदेत्पठ्यते-

क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिवशत इति॥॥58

अपवादशब्दोऽत्र बाधकपरः। तदुक्तं 'गुणो यङ् लुकोः' (7. 4.82) इत्यत्र भाष्ये- अभ्यासविकारेषु अपवादा उत्सर्गान्न बाधन्ते। अजीगणत्। अत्र गणेरीत्वमपबादत्वाद्धलादिः शेषं न बाधते। न गणेनित्वमपवादत्वाद्भलादिशेषं बाधते। किं तर्हि?अनवकाशत्वादिति ग्रन्थेन। गण्रूपाभ्यासान्त्यणस्येत्वमित्यर्थे हलादिशेषेण तन्निवृत्तौ तदनवकाशमीत्वे तु कृते न तस्य प्राप्तिरन्त्यहलोऽभावात्। अभ्यासविकारेषु बाध्यबाधकभावाभावेन च साधितम्। तस्मिंश्च सति

रप्रमाणिकी[1] अत एव भाष्येऽधिकारत्वस्यैव ज्ञापकाश्रयणादाक्षेपः कृत इति वाच्यम्। भानुः पिताऽस्येत्यर्थे[2] भानव इत्यस्य शेष इत्यणैव[3] सिद्धे तस्येदमित्य[4]पत्येपि बाधनार्थं कृतं भवेत्। उत्सर्गः[5] शेष एवासौ वृद्धान्यस्य प्रयोजनमिति वार्त्तिककृदुक्तस्य तस्यापत्यमिति योग[6] विभाग प्रयोजनस्यासंगति प्रसङ्गादिति[7] मूलमनेक प्रकारैरपोद्[8]यात्रोच्यते। मयड्वैतयो-रित्येव सिद्धे नित्यं वृद्धशरादिभ्य[9] इत्यत्रारंभ सामर्थ्यान्नित्यत्वलाभान्नित्यग्रहणस्य शरादिभ्य[10] इत्यनेनान्व[11]यांगीकारात्क्वचित् वृद्येभ्यो मयड्[12] प्रवृत्या[13] कांचनीत्यस्य साधनीयत्वादिति समापि[14] वदंतः कैय्यटानुयायिनः स्वस्य[15] शेषे इति सूत्रांत मनोरमा मात्राध्ययनमाविष्कुर्वतः परास्ता[16]। किञ्च[17] भानुः

---

1. अप्रमाणकी अ–3, अ–2; अप्रामाणिका अ–4.
2. ऽस्येत्यर्थ भानव ज–2, अ–3.
3. इयणैव प–1.
4. तस्यैदम् अ–3.
5. उछर्णशेषम् प–1.
6. पाठोऽयं प–1, प–2, अ–4; योगे अ–1, ज–2, अ–3.
7. असंगात् प–1; संगात् प–1, अ–3.
8. पाठोऽयं प–1, प–2, अ–4 प्रकारैरपोद्योत्रोच्यते अ–1, अ–3; प्रकारेरेरयो वात्राच्यते ज–2.
9. पाठोऽयं प–1, प–2, अ–4; वृद्ध शादिभ्य अ–1, अ–3, अ–2.
10. शारादिभ्य अ–3.
11. इत्यने नाचयंकारात् प–1, प–2; इत्यनेनान्ययांगीकारात् क्व अ–4.
12. पाठोऽयं प–1, प–2; ष्टद्वेभ्योमयड अ–1, अ–2, अ–4; ष्टद्वोभ्योमपह अ–3.
13. प्रवृत्वात्या ज–2, अ–3.
14. सामाधिम् अ–3.
15. स्वस्व प–1, प–2.
16. परस्ताः ज–2, अ–3, अ–4.
17. किं च न भानु अ–4.

लोपे कृते सामर्थ्याच्छिष्टस्यान्त्यस्येत्वमिति न दोषः। न च येन नाप्राप्तिन्यायेनापवादत्वमप्यस्य सुवचम्, तस्य चरितार्थ विषयताया उक्तत्वात्। 'इको झल्' (1.2.3) इत्यत्र भाष्येऽपि ध्वनितमेतत्। तत्र हि 'अज्झन' (6.4.16) इति दीर्घेण गुणोत्तरं फलाभावेनानवकाशत्वाद् गुणे बाधिते दीर्घोत्तरं गुणः स्याद् दीर्घविधानं तु मिनोतेर्दीर्घे कृते 'सनि भीमा' (7.4.54) इत्यत्र मीग्रहणेन ग्रहणेऽर्थवत्तत्र पश्चात्प्राप्त-गुणबाधनार्थम् 'इको झल्' इति कित्त्वमित्युक्तम्। अन्यथापवादत्वेन बाधे तद्विषये उत्सर्गाप्रवत्तेर्भाष्यस्य सूत्रस्य चासङ्गतिरिति स्पष्टमेव।

यत्तु काञ्चनीत्यादावपवादमयङ्विषयेऽप्यण् भवति क्वचिद-पवादविषयेऽपीति न्यायादिति तन्न। 'अण् कर्मणि च' (6.3.12) इति सूत्रस्थ भाष्यविरोधात्। तत्र ह्यणः पुनर्वचनमपवादविषयेऽनि-वृत्त्यर्थं गोदायो व्रजतीत्याद्युक्तम्। काञ्चनीत्यादौ काञ्चनेन निर्मितेत्यर्थे शेषिकोऽण् बोध्यः। अत्रेदं बोध्यम्-

---

पिताऽस्येत्यर्थे - भानव इत्यस्य[1] शेष इत्यणासिद्धा[2]वपि भानो[3]रपत्यमित्यर्थे तदसिद्धयायोग[4] विभागसार्थव्ये वार्त्तिकविरोधोद्भावनमपि वार्त्तिकाशयाज्ञान विलसितम्[5]। नित्यग्रहणस्यैकाचो नित्यमिति[6] संग्राहकस्य कथं भवदुक्तार्थ-साधकत्वं स्यादिति समाधानमपि शेखरादिग्रन्थापर्यालोचन मूलकम्। नित्य-ग्रहणस्यैकाचोनित्यमिति संग्राह[7]कत्वे शरादिषु[8]-

---

1. त्य नाऽस्ति प-1.
2. इत्यरंगासिद्धावपि ज-2.
3. मानोरत्यप्यिर्थे अ-3; भानोरपत्यमित्र्थे अ-4.
4. तदसिध्या अ-3; तदसिद्या ज-2.
5. विलासितम् ज-2, अ-4.
6. नित्यमित्यमिति संग्राहकस्य कथं स्यादिति समाधानमपि इति अ-4 मातृकायां पाठोपलभ्यते.
7. पाठोऽयं प-1, प-2, अ-4 संग्राहत्वम् अ-1, ज-2, ज-4.
8. शरदिषु ज-2, अ-4.

'येन नाप्राप्त' इत्यत्र येनेत्यस्य यदि स्वेतरेणेत्यर्थः-तदा स्वविषये स्वेतरयद्यत् प्राप्नोति तद्बाध्यम्, विध्यन्तराप्राप्तविषया भावात्। इयमेव बाध्यसामान्यचिन्तेति व्यवह्रियते। अनवकाशत्वेन बाधेऽप्येषा वक्तुं शक्या यद्युदाहरणमस्ति विनिगमनाविरहात्।

यदि तु येनेत्यस्य येन लक्षणेनेत्यर्थो येन कार्येणेत्यर्थो वा तदा बाध्यविशेषचिन्ता। अनवकाशत्वेन बाधेऽप्येतद्बाधेन सार्थक्यमुत तद्बाधेनेत्येवं विशेष चिन्ता सम्भवति यद्युदाहरणमस्तीति॥58॥

तत्र कार्येणेत्यर्थे पररूपत्वावच्छिन्ने कार्य आरभ्यमाणाया वृद्धे स्तद्बाधकत्वे निर्णीते किंशास्त्रविहितस्येत्येवं तद्विशेषचिन्तायामाह-

पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्॥59॥

मृच्छब्दपाठस्य[1] वैय्यर्थप्रसङ्गादिति भवदुक्तमनोरमोक्तदूषणानु[2]वादोपि मृच्छब्दपाठस्तु एकाचो[3] नित्यमित्यस्य नित्यत्वबोधनार्थ इति शेखरेणैव दत्तजलांजलिः[4] तदनित्यत्वे फले तु त्वाचोरोग इत्यादीवौत्[5] सर्गिकोण बोध्यः। एवं च मूलदूषणं तु दूषकत्व[6]स्वभावेनैव न युक्तेति[7] मदुक्ति संक्षेप मात्रांशे मान्या[8] मात्सर्य विचारयं त्विति दिक्॥58॥

---

1. पाटस्य प-2.
2. दृषणानुचादोपि अ-3; दृषणनुक्यदोपिमृछब्द ज-2.
3. ऐकाचो प-1.
4. जलंजलि प-1.
5. इत्यादीत्तौत्सर्गिकोण अ-3; इत्यादावोत्सर्गिकोप्यबोध्यः प-2.
6. दुयकत्व अ-3; द्रयत्व ज-2.
7. न युक्त्येति अ-3; न युक्तो ति ज-2; न युतयेति प-2; न युक्येति अ-4.
8. मात्रांशेमातसार्यविचारयम् प-1; मात्रांशेमात्सर्य मुत्सार्यविचारयं प-2; मात्राशेमान्यामात्सर्यविचारयम् अ-3, ज-2, अ-4.

अवश्यं स्वपरस्मिन् बाधनीये प्रथमोपस्थितानन्तरबाधेन चारितार्थ्ये पश्चादुपस्थितस्य ततः परस्य बाधे मानाभावः। आकाङ्क्षाया निवृत्तेर्विप्रतिषेधशास्त्रबाधे मानाभावाच्चेत्येतस्य बीजम्।।59।।

'नासिकोदरौष्ठजङ्घादन्त' (4.1.55) इत्यस्यौष्ठाद्यंशे ङीष्निषेधत्वावच्छिन्नबाधकत्वे निर्णीतेकिंविहितस्येत्याकाङ्क्षायामाह-

मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्।।60।।

तेनौष्ठादिषु पञ्चसु 'असंयोगोपधात्' इति प्रतिषेध एव बाध्यते, न तु 'सहनञ्विद्यमान' (4.1.57) इति 'नासिकोदर' (4.1.55) इत्यत्र भाष्ये स्पष्टम्। पूर्वोपस्थितबाधेन नैराकाङ्क्षयमस्या बीजम्।।60।।

प्रतिपदोक्त[1]त्वमपि निरवकाशत्वे सत्येवेति। यथा ऋग्[2] भिन्नस्त्र्यर्थे चरितार्थस्य पादो[3]न्यतरस्यामित्यस्य ऋचिवाच्ये[4] प्राप्तस्य प्रतिपदविधि[5]त्वेनापवादत्वात् टा[6]बृचीत्यनेन बाधः एवं च सूत्रकारमते[7] ऋग् भिन्नेस्त्र्यर्थे द्विपदी द्विपादिति[8] रूपद्वय[9] ऋचि तु द्विपदेति तृतीयं रूपम्[10]। अत एव टाबृचीत्यस्यापवादोक्तिः-

---

1. प्रतिपदोक्तमपि अ-1, ज-2, प-1, प-2, अ-3, अ-4.
2. ऋण्भिन्ने अ-3; ऋणाभिन्नेस्राप्र्येचरितार्थस्य ज-2.
3. 'पा' नाऽस्ति प-2.
4. ऋचिप्राप्तस्य अ-3; ऋचिवाचेप्राप्त्स्य अ-4.
5. विषिवे ज-2.
6. टाकृचि 4/1/9; यवृचीत्यनेन अ-3; आबृचीत्यनेन अ-4; ट्टावृचीत्यनेन प-1.
7. ऋग्यमित्रेस्प्रर्थे ज-2; सूत्रकारमतैत्रऽणभिन्नोस्त्र्यर्थे प-2.
8. पाठोऽयं प-2; द्विपद्विपात् अ-1, ज-2, अ-3, अ-4, प-1.
9. पाठोऽयं प-1, प-2; रूपद्वयाम् अ-1, ज-2, अ-3, अ-4.
10. रूप ज-2, अ-3, अ-4.

ननु 'वा छन्दसि' (3.4.88) इत्यनेन 'सेर्ह्यपिच्च' (3.4.87) इत्यनन्तरस्यापित्त्वस्येव हेरपि विकल्पः स्यात्। तथा 'नेटि' (7.2.4) इति निषेधोऽनन्तरहलन्तलक्षणाया इव सिचिवृद्धि-मृजिवृद्ध्योरपि स्यात्। अत उक्तन्यायमूलकमेवाह-

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति॥61॥

अत एव 'संख्याव्ययादेः' (4.1.26) इति ङीब्ग्रहणं चरितार्थम्। तद्ध्यनन्तरस्य ङीषो विध्यभावाय। 'न क्तिचि' (6.4.39) इति सूत्रे दीर्घग्रहणञ्च चरितार्थम्। तद्ध्यनन्तरस्य 'अनुदात्तोपदेश' (6.4.37) इत्यस्यैव निषेधाभावाय। मध्येऽपवादन्यायाद्यपेक्षयानन्तरस्येति न्यायः प्रबल इति अष्टाभ्य (7.1.21) इति सूत्रे कैयटः॥

प्रत्यासत्तिमूलकोऽयम्। लक्ष्यानुरोधाच्च व्यवस्थेत्यपि पक्षान्तरम्। तत्र तत्र क्वचित् स्वरितत्वप्रतिज्ञासामर्थ्येन बाध्यतेऽयं न्यायः। 'टिड्ढ' (4.1.15) इति सूत्रेण डापा व्यवहितस्यापि ङीपो विधिः। 'न षट्' (4.1.10) इत्यादिना द्वयोरपि टाब्ङीपोः प्रतिषेधः। हयञ्च 'शिसर्वनामस्थानम्' (1.1.42) इत्यादौ भाष्ये स्पष्टेत्यन्यत्र विस्तरः॥61॥

ननु दधतीत्यादावन्तरङ्गत्वादन्तादेशेऽल्विधौ स्थानिवत्त्वाभावाद-दादेशो न स्यादिति तद्वैयर्थ्यापत्तिरत आह-

पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः॥62॥

लक्षणैकचक्षुष्को ह्यपवादविषयं पर्यालोच्य तद्विषयत्वाभाव-निश्चय उतसर्गेण तत्तल्लक्ष्यं संस्कारोति। अन्यथा विकल्पापत्तिरित्यर्थः। अभिनिविशन्त इत्यस्य बुद्धयारूढा भवन्तीत्यर्थः। 'अपवादो यद्यन्यत्र चरितार्थः' (प. 65) इति न्यायस्य तु नात्र प्राप्तिरन्तादेशाप्राप्तिविषये चारितार्थ्याभावात्॥62॥

लक्ष्यैकचक्षुष्कस्तु तच्छास्त्रपर्यालोचनं विनाप्यपवादविषयं परित्यज्योत्सर्गेण लक्ष्यं संस्करोति, तस्यापि शास्त्रप्रक्रियास्मरण-पूर्वकप्रयोग एव धर्मोत्पत्तेः। तदाह-

मनोर[1]मोक्तात्तत्सत्रसंगच्छते। भाष्यकारेण[2] तु ङ्याप्प्रातिपदिकादिति सूत्रेऽथ ङ्याव्ग्रहण[3] किमर्थं इत्युपक्रम्य कुंचे[4]त्यादावेकादेशाभावेना-प्रातिपदिकत्वात्। स्वाद्य[5]नुत्पत्तिशंकायामकारांत[6] क्रुंचे त्यगिकृत्य[7] तत्खंडने कृते इदं तर्हि प्रयोजनं पादोन्यतरस्या[8] आबृचीत्युक्ता[9] तत्रापि पादशब्दसमानार्थ[10] कारांत पद शब्दात् टापि एकादेशास्य पूर्वांतत्त्वेन ग्रहणा[11]त्प्रातिपदिकत्वे स्वाद्युत्पत्तौ[12] सिद्धायां टाबृची न कर्त्तव्यमिति सूचितम्[13]। एवं च तन्मते सूत्रसत्ते ऋचि ङीपो वारणेपि तत्प्रत्याख्याने क्रच्य[14]भिधेयायां ङीपो ङीपोऽवारणात्। तत्रत्यपि[15] द्विपदीति प्राप्तरूपं फलभेदे[16] प्रत्याख्यानासंभवेना नभिधानाद्वारणीयम्[17]। न च भाष्यानुरोधात् सूत्रकारमतेपि पूर्वसूत्रादन्यतरस्यां ग्रहणमनुवर्त्य[18] ऋच्यविधेयाया[19] ङीविष्ट इत्येव कुतो न कल्प[20]नेति

1. उक्त्या तत् सूत्रे ज-2, अ-4; मनोरमौक्ता तत् अ-3.
2. भाष्यकारणतु ज-2, अ-3, अ-4.
3. ग्रहण ज-2, अ-3.
4. कुकत्यादावेका अ-3, कुच पादावेका ज-2.
5. वाधनुत्पत्ति प-2.
6. शंकायामरांतम् प-1, शंकयामकारांत अ-3.
7. पाठोऽयं प-2, ज-2; कुंचेत्यंगि प-1; क्रंचेत्यंगि अ-1, अ-3, अ-4.
8. व्यतरस्याम् प-1.
9. उक्त्वा अ-3.
10. समानार्थककारांत प-1, प-2.
11. पाठोऽयं प-1, प-2; पर्वातत्वन ग्रहणास्तातिप्रदिकत्वे ज-2, अ-3, अ-4.
12. स्वादुत्पत्तौ ज-2.
13. संसचितम् प-2.
14. ऋव्यभिधेयायाम् ज-2, प-1.
15. ऋव्यपिद्विपदोति प-1, प-2 तत्रत्यपि द्विपदोतिशवं रूपं ज-2.
16. पाठोऽयं ज-2, प-1, प-2; भेदि अ-1, अ-3; भेद अ-4.
17. वारणोयम् प-1.
18. अनवर्त्य ज-2, अ-3.
19. भिधेयाडीष्टि अ-3.
20. 'क' नाऽस्ति प-1.

प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते॥63॥

तत इत्यस्यापवादशास्त्रपर्यालोचनात् प्रागपीत्यर्थः। परित्यज्येत्यर्थः।

अत एव प्रातिपदिकार्थसूत्रे भाष्यं इदं द्वयमप्युक्त्वा न

वाच्यम्। स्वमते ङीविष्ट इति सूत्रकारेण स्वप्ने[1]ऽनुपदेशात्। किंच भाष्यानुरोधादन्यतरस्यां ग्रहणानुवृत्यासूत्रकारमते ऋचि ङीप्यपि[2] द्विपादित्यस्यापि[3] तन्मतेऽनिष्टस्य तदर्थं[4] आपत्तेश्च त[5]स्यापि तन्मते कल्पनं तु सूत्रकारोपदेशैकगम्यम्[6]। अनभिधानेन दत्तोत्तरत्वात्। पूर्वसूत्रापवादकत्वे[7] ऋच्य[8]भिधेयायां प्राप्त[9]ङीप्बाधनार्थत्वरूप प्रयोजनस्योत्तरसूत्रांशे सत्वेन[10] ङ्याप् सूत्रे टाबृचीत्येतत्[11] प्रत्याख्यानमसंगतमित्युक्तिरपि निरस्ता। अंतादिवत्सूत्रेऽथादिवत्वे कानि प्रयोजनानि इत्युपक्रमोत्तरं आप्श्वद्वा[12]मालो अवभावोरेकादेश आदिवद्भवति यथाशक्येत कर्तुं आंबत्तात् सोर्लोपो भवति

---

1. स्वप्नलुपदेशात् प–1; अनुपदेशात्तु अ–3.
2. देशेकगम्यंअनिभिधानेन दत्तौत्तरत्वात् इति प–2 मातृकायां पाठः1
3. द्वित्यस्यापि अ–3.
4. तदर्थे प–1, अ–4.
5. आपत्तेश्चातस्यापि प–1, प–2.
6. उपेदेशेकांगम्यम् प–1.
7. अपवादकत्वो ज–2, अ–3; अपवादकत्वा अ–4.
8. क्रच्यभिधेयायां ज–2, अ–3.
9. पाठोऽयं प–1, प–2, अ–4; प्राप्तगे एवाधनार्थत्वप अ–1, अ–3 प्राप्तने एवाधनार्थस्वरूप ज–2.
10. सत्वेव ज–2, अ–3.
11. इत्येतत् प्राप्ताख्यानम् प–1.
12. पाठोऽयं प–1, आपरवद्वामाला आवनावोरेकादेशेत्यादिवादवति यथाशक्येत् अ–1; आश्रवद्वामाला आवना षोरेकादेशेत्यादि ज–2; आपस्वद्वामाला-आवभावोरेका देश आदिवद् भवति प–2; आपरवद्वामाला अ–3; आप्श्वद्वामाला आवनाचोरेकादेश अ–4.

कदाचित्तावदुत्सर्गो भवत्यपवादं तावत् प्रतीक्षत इत्यर्थकमुक्तम्।।63।। एतन्मूलकमेव नवीनाः पठन्ति-

उपसंजनिष्यमाणनिमित्तोऽप्यपवाद उपसंजातनिमित्तमप्युत्सर्गं-बाधत इति।।64।।

यत्तु अभ्यस्तसंज्ञासूत्रे कैयटेन प्रकल्प्य चेति प्रतीकमुपादाय यथा 'न सम्प्रसारण' (6.1.37) इतिपरस्य यणः पूर्वसम्प्रसारणं पूर्वस्य तु तन्निमित्तः प्रतिषेध इत्युक्तं तत्तु तत उत्सर्ग इत्याद्य-क्षरार्थाननुगुणम्।

यत्तु अपवादवाक्यार्थं विना नोत्सर्गवाक्यार्थइति तदर्थ इति तन्न। अभिनिविशतेऽपवादविषयमित्यादिपदस्वारस्यभङ्गापत्तेः। पदजन्य-पदार्थोपस्थितो वाक्यार्थबोधाभावे कारणाभावाच्च।

यत्र त्वपवादो निधिद्धस्तत्रापवादविषयेऽप्युत्सर्गः प्रवर्त्तत एव। यथा वृक्षावित्यत्र 'नादिचि' (6.1.104) इति पूर्वसवर्णदीर्घनिषेधाद-प्रवर्तमानस्य वृद्धिबाधकत्वाभावाद्वृद्धिः प्रवर्त्तते। अतएव 'तो सत्' (3.2.127) इत्यादि सङ्गच्छते। अत एव निर्देशाद् भ्रष्टावसरन्यायस्यात्र

क्व[1] तर्हि स्यात्। यत्रैकादेशो[2] नास्ति क्रुंचा[3] उष्टिणहादेव विशेति भाष्योक्तया[4] हलंत क्रुंचशब्दप्रसिद्धेस्तस्मादपि[5] ततः सुबुत्प[6]त्यर्थं आबधिकारस्यावश्य-कत्वेऽकारांतं क्रुंचशब्दमंगीकृत्यावग्रहण[7] प्रयोजन खंडनोत्तर[8] अकारांतपद-

---

1. कतर्हि प-2.
2. यत्रैकादिशो नास्ति प-1, प-2.
3. क्रुंचा उष्टिगाहादेव अ-3; श्रुत्वा उष्टिगहादेव ज-2; क्रुंचाल्यिहादेव अ-4.
4. भाष्योक्ता हालांच प-1; भाष्योक्ता हलंत अ-4; भाष्यो तथा हलंत ज-2.
5. तस्मादापि प-1, प-2; तस्मार्दपि अ-3.
6. सुवुत्यतयर्थं ज-2; सुवुत्पत्यर्थं आत् यत्रैकादंवधिकारस्या इति पाठः अ-4.
7. गुण अ-3.
8. खंडनात्तरम् अ-4; खंडानोत्तरम् ज-2.

शास्त्रेऽनाश्रयणम्। ध्वनितं चेदम् 'इको गुण' (1.1.3) इति सूत्रे भाष्य इति भाष्यप्रदीपोद्योते निरूपितम्। अत्र देवदत्तस्य हन्तरि हते देवदत्तस्योन्मज्जनं नेति न्यायस्य विषय एव नास्ति। हते देवदत्त उन्मज्जनं न। देवदत्तहननोद्यतस्य तु हनने भवत्येवोन्मज्जनम्। प्रकृतेऽपि न पूर्वं सवर्णदीर्घेण वृद्धेर्हननं किन्तु हननोद्यमसजातीयं प्रसक्तिमात्रम् प्रसक्तस्यैव निषेधात्। प्रतिपदोक्तत्वमपि निरवकाशत्वे सत्येव बाधप्रयोजकम् स्पष्टं चेदं 'शेषाद्विभाषा' (5.4.154) इति सूत्रे भाष्ये तत्र हि-शेषग्रहणमनर्थकं ये प्रतिपदं विधीयन्ते ते बाधका भविष्यन्तीत्याशङ्क्यानवकाशा हि विधयो बाधका भवन्ति, समासान्ताश्च कबभावे सावकाशा इत्युक्तम्। क्वचिदनवकाशत्वाभावेऽपि परनित्यादिसमवधाने शीघ्रोपस्थितिकत्वेन पूर्वप्रवृत्ति प्रयोजकं बलवत्त्वं प्रतिपदविधित्वेनापि। परनित्यान्तरङ्गप्रतिपदविषयो विरोधि सन्निपाते तेषां मिथः प्रसङ्ग परबलीयस्त्वमिति 'प्रत्ययोत्तरपदयोश्च' (7.2.68) इति सूत्रे कैयटेन पाठात्। अत एव रमे इत्यादौ

शब्दमंगीकृत्य टाबृची[1]त्यस्यापि खंडनेन[2] डाबुभाभ्या[3]मित्यंशे आव्[4] ग्रहणप्रयोजनस्थापनपरभाष्यस्यैकदेश्युक्ति[5]त्वावश्यकत्वेतन्मध्य[6] पतितैतत्प्रत्याख्यानस्य नांतरीयकतया तत्त्व[7]लाभात्। औव्[8] ग्रहण किमर्थमिति प्रश्ने[9] क्रंचेति प्रयोजन कथ[10]कोंत्तादिवत्सूत्रानुरोधो[11]सिद्धांत ग्रन्थस्त-

---

1. ठाबृचो प-1; दाक्षयोत्यस्यापि अ-4.
2. अकारांतपद इत्यारभ्य खंडनैन इत्यन्तं अ-3 मातृकायां नाऽस्ति.
3. डोवुभाभ्यामित्यंशे अ-3, ज-2; डीवुभाभ्याम् अ-4.
4. अव् प-1, आत्र अ-3; आप् अ-4.
5. देश्यक्तित्वाचश्यकत्वे ज-2, अ-3.
6. तन्मप्य पचितैतत् ज-2; ततध्यपतितैतत् प-2; तत्रध्यपतितैतत् प-1.
7. तत्वालाभात् अ-3.
8. आवंग्रहणम् प-2; अब् प-1.
9. प्रश्टौ अ-3; प्रष्टये अ-4; प्रश्न प-1; प्रछे ज-2.
10. कथकथकोतादिवत् ज-2.
11. सूत्रानुरोधोसित्यधीत अ-3, ज-2.

प्रतिपदोक्तत्वात् पूर्वमेत्व आकारप्रश्लेषाद्धल्ङ्यादिलोपो न प्राप्नोतीत्याशङ्क्य 'एङ्ह्रस्वात्' (6.1.69) इति लोपेन

दुत्तर[1]मकारांतमंगीकृत्य प्रवृत्तग्रंथस्तु एकदेशिनो डाबंशे[2] प्रयोजन प्रतिपादनांतः। न च क्रुंचाना लभेतेति अकारान्तः कंठत उच्चारित[3] ङ्याप् सूत्रस्थ[4] प्रयोगानुपपत्तिः तदंशे आबधिकारस्याप्रयोजकत्वेपि अंतादिवत्सूत्रस्थ[5] प्रयोगांशे[6] प्रयोजकत्वात्। अत्राप्यग्रे लिंग[7]विशिष्ट परिभाषयाऽवधिकार प्रयोजनानामन्यथासाधनस्य तौल्यालिंग विशिष्टपरिभाषया[8] गतार्थत्वात् सूत्रस्थं भाष्येमेकदेश्युक्तमिति तु न शंका कलंकलेशोऽपि इति दिक्॥

एतेन[9] वष्टीतिप्रतीकमुपादायेदं भाष्येन दृश्यते[10] निशदिशोरिगुपध[11] लक्षणे किमिदं तत्वादेवटारा क्विपि दिगित्यपि[12] अत एव ङ्याप् सूत्रे आप्[13] ग्रहणं न कार्यं अकारांतादाप्[14] तत्रांत[15]वद्भावात्प्रातिपदिकत्वेनैव

1. तदुक्तमकारांतरमंगोकृत्य प-1.
2. डाबंशेक्षयोजन ज-2; डाबंशेषयोज प्रतिपादनांतः अ-3.
3. उच्चरित प-1, प-2.
4. सूस्थ ज-2, अ-3; ङ्याप् सूत्रस्य प्रयोगांशे प्रयोजकत्वात् इति प-1 पुस्तके पाठोपलभ्यते
5. स. पाठः.
6. पाठोऽयं प-2; प्रयोगांशे योनकत्वात् अ-1, अ-3; प्रयोगांशे याजकत्वात् अ-4; प्रयोद्यांशे योनकत्वात् ज-2.
7. अत्राव्यग्रे विशिष्टपरिभाषयात्वधि प-1, प-2; परिभाषयावधिकार अ-3; परिभाषयाऽवाधिकार अ-4.
8. परिभाषयो ज-2, अ-3.
9. एतेनष्टिति अ-4, प-2.
10. दशाये ज-2; दृश्यये अ-3.
11. दिशोगुपलक्षणे अ-3, ज-2.
12. किपिदिगित्यापि ज-2, अ-3.
13. अप् प-1.
14. आकारांतादाप् प-1; अकारांतादाश्च ज-2.
15. तत्रांवतद्भवात् प-2.

सिद्धेः[1] यस्तत्य[2] नकारांतात् क्रुंचा उष्ठिर्यहादेव[3] विशेत्यत्रापि अकारांतादेव क्रुंचानालभेत उष्टिण्हक[4] कुभौदेव विशमिति अंतेक[5] प्रत्यय इति एवं विषय इत्युक्त्वा[6] बहुराजेति डाबंतार्थ[7]माप् ग्रहणमिति भाष्ये उक्तं संगच्छते[8] तस्मात् वाचेत्य साध्वेवेति शिवमिति[9] प्राचीनानुसारी[10] अव्ययांत[11] शेखरः परास्तः। न च पादोन्यतरस्यामित्यस्य (वैत्यस्य[12]) वैकल्पिकतया तदभाव[13]चारितार्थ्येपि ऋच्यभिधे[14]यायां प्रतिपद विधित्वेनोत्तर[15] सूत्रस्यापवादकत्वमंगीकारे शेषाद्विभाषा[16] उगबादिभ्यो[17] य[18]दिति सूत्रस्थ भाष्यविरोधः तत्रांते[19] उगवादिभ्यो यत् ऋषभोपायानहो[20] होर्ज्यः इत्युभौ

---

1. नैवासक्ये ज–2, अ–3.
2. यस्तत्द्र्यनकारांतात् प–1, प–2.
3. उष्टिय्यहादेव प–1; उष्टिग्हादेव प–2.
4. उष्यिहक अ–3; कुंवानाभेत्तदुष्टियहक ज–2.
5. अनेक ज–2; अतेक अ–3.
6. इत्युक्ता ज–2.
7. डाबांतार्थम् ज–2, अ–3.
8. सुंगते अ–4.
9. शिविमिति प–1, प–2.
10. प्राचीनांनुसरीं ज–2, अ–3; प्राचीनानुसारि प–1.
11. आव्यां न अ–3.
12. कोष्ठान्तर्गत पाठस्तु ज–2, प–2, अ–4 नाऽस्ति.
13. तदभावे प–1, प–2.
14. पाठोऽयं प–1, प–2, अ–4; क्तव्यभिधेयायाम् अ–1, अ–3; क्तव्यभिधेषायाम् ज–2.
15. पाठोऽयं प–1; विधित्वे नोत्तरस्य अ–1, ज–2, अ–3, प–2; सूत्रस्यापादवांगोकरे अ–4.
16. 5/4/154 अष्टा.
17. उगवादिभ्यो यत् 5/1/2.
18. यदिति नाऽस्ति ज–2, प–1, प–2, अ–3.
19. पाठोऽयं अ–4; तत्रत्येठगवादिभ्यो यतु अ–1, अ–3, प–1, प–2.
20. ऋत्यभोपायान होज्यः ज–2; ऋषभोपायान हाऽर्य प–2.

चर्मणोऽञ्[1] इत्यऽञ् अपेक्षयापूर्व विप्रतिषेधेनेति वार्त्तिकं तत्र शंकव्य[2] वाध्रचर्मेत्यादौ क्रमेण चरितार्थयोर्यदजो: संनंगु[3]नामचर्मविकारस्तस्मादुभय[4] प्रसङ्गे सनं गव्यमिति यत् भवति पूर्व विप्रतिषेधेन एवमौपानह्येठञ् चेत्युक्तछदिरूप धिवलेर्ठञ्नितिठञानापि अञोबाधेछादिषेपचर्मेत्युक्तम्। एवं चटावृचीत्येत्तद्रोत्यांशकव्यं दारु औपनत्द्यं दारु छादिष्वेयं यंतृणमित्यादौ चारितार्थेपि प्रतिपदविधित्वे नञ्यठञ्भ्यां बाधे[5] सिद्धे पूर्वविप्रतिषेधारंभोऽनर्थक: स्यादिति वाच्यम्। सति शेष[6] ग्रहणे व्याख्यानादनंतरबहुव्रीहौ सक्थ्यक्ष्णो-रित्यधि[7]कारापिक्षयैव शेषस्य ग्रहणा तत्र चांगुलेर्दारुणीत्यादि प्रतिपदशास्त्राणां पपाठेन[8] तेषां स्वविषये प्राप्त[9]कयो बाधकत्वेन तत्प्रवृत्तिप्रतिबंधकत्व-स्यानेकवक्ष्यमाणभाष्यैर्वक्ष्यमाण[10] सूत्रस्थ[11] कैय्यटरीत्या चावश्यकत्वे निरवकाश[12]स्याक्षतैस्तद्भाष्यस्यैकदेश्युक्तित्वात्। एवं च शेषग्रहणं स्पष्टार्थम्। न च समासांतरे[13] चरितार्थाना[14] ऋक् पूरित्य[15]वादिनां

---

1. च मगोज् अ-3, ज-2.
2. तत्रत्राकव्यंदारू अ-3; तंत्रात्रांकव्यंदानूवाधं ज-2; तत्र शकच्यद्वारुवाघ्रं प-1.
3. सनंगुनामिचर्त्य प-1.
4. उ भयमप्रत्यंगे संत गव्यमिति ज-2.
5. बाधे सिद्धे प-1, प-2.
6. शेषे अ-3.
7. पाठोऽयं प-1, प-2; अधिकारा पेक्षयौव शेषस्य अ-1, ज-2, अ-3, अ-4.
8. पाठेन प-1; शास्त्राणामपपाठेन अ-4.
9. पाठोऽयं प-1, प-2; प्राप्तकरये अ-1, ज-2, अ-3, अ-4.
10. वक्षमान प-1.
11. सूत्रस्य प-1.
12. चावश्यकत्वेन रवकाश अ-3. चावश्यकत्वेनवकाशत्वस्या प-1, प-2.
13. पाठोऽयं प-1, प-2, अ-4; न च समातरे अ-1, ज-2, अ-3.
14. 'नाम्' नाऽस्ति प-2.
15. पृतापूरित्यषादीनाम् ज-2, अ-3; ऋक्यूरित्वादिनाम् अ-4.

बाधनाय[1] तद्ग्रहणमन्यथापरत्वात्वित्प्रियपथिक[2] इत्यव् विषये कपूस्यादिति वाच्यम्। तत्र कप्रत्ययस्येष्टत्वेन[3] शेष ग्रहणेपि भगवन्मते तद[4]वारणात्। एवं च ये प्रतिपदं विधीयंते ते बाधका[5] भविष्यंतीति[6] सिद्धांत्युक्तिः नैतदस्तीत्[7]यादि शंका समाधानादिकं त्वेकदेशिन इति दिक्।

द्वितीयस्याप्यत्र आहुः[8] छदिरुपानत्द्र्योः[9] प्रतिपद[10] प्रत्ययविधानाद्युक्तो[11] विप्रतिषेधः। तथा चोक्तम् परनित्यान्तरङ्गप्रतिपद विधयो[12] विरोधि[13] सन्निपाते[14] तेषां मिथः प्रसङ्गे परबलीयस्त्वमितिनार्थः। पूर्वविपतिषेधेनेति चिंत्य[15]मेतदिति कैय्यटे नैव चिंत्यतोक्तेः[16] अत्राहुरिति प्रतीकमुपादायप्रतिपदविधीनाम[17]

---

1. सं. पाठः, वाधानाय अ-1, अ-3; वाधानां एतदग्रहणम् ज-2; बाधनामत इहणमन्यथा प-1, प-2.
2. परत्वात्प्रीपपथिक इत्यत्कषयेकपूस्यादिति प-1; तदग्रहण मयान्यथापरत्वात्प्रिय-प्रियपथिक इत्यव् अ-4.
3. तत्र कस्तत्त्ययस्पेष्टतवेन प-1.
4. तदेवारणात् प-1.
5. बाधका नाऽस्ति प-1.
6. पाठोऽयं अ-4 भविष्यतेति अ-1; भविष्यतोति ज-2, अ-3; भविष्यति प-1, प-2.
7. नेतदस्ति दिंशका प-1; नैतदस्तोत्यादि ज-2.
8. आहः अ-3; अहूः प-1.
9. छदिरूपानत्योः ज-2; छदिरूपानत्द्र्याः अ-4.
10. प्रतिपद प-1.
11. अयुक्ता अ-3; विधानाहत्यक्ता ज-2.
12. विद्र्ययो विद्र्ययो अ-3; विशेये ज-2.
13. सं पाठः, विरोध अ-1, ज-2, प-1, प-2, अ-3, अ-4.
14. सत्तियातेषां अ-3.
15. चिमेत्यतविति अ-3; विमंन्युतविति ज-2.
16. पाठोऽयं ज-2, प-1, प-2, अ-3, अ-4; चिंत्युतोक्तैः अ-1.
17. विधानाम् प-1.

नवकाशतवे सत्येव[1] बाधकत्वं[2] नत्वन्यथेति अत्रारुचिरिति विवरणं तु चिंत्यमेवेति बोध्यम्। यत्तु स्वांपीत्यत्र[3] निरवकाशत्वमिति प्रतीकमुपादायेद[4] छदिरूपाधिबलेर्ठञ्[5] इति सूत्रे शेषाद्विभाषेतिसूत्रे च भाष्ये स्पष्टमित्युक्तं नपुंसकशेस्वरो[6] ते तत्र छदिरूपधीति सूत्रे भाष्ये किमपिनोक्तं तथापि इति सूत्रं यच्चयादे इति बहुब्रीहिणातत्पादे उगवादिभ्यो यदिति सूत्रे इत्यर्थो[7] बोध्यः। अत एव कथोवैकल्पि[8]तकत्वेन तदभावेऽव्यय सर्वनाम्नाम[9] कजित्यकचश्चारितार्थ्येपि सर्वनाम्नो[10]ऽकजिति प्रति[11]पदमकचो विधानात्। स्वविषये प्राप्तकयोबाधकत्वं भाष्योक्तं कैय्यटादि नवीनांतोक्तं[12] च संगच्छते। अन्यथा समासांतविषये शेष ग्रहणाभावे परत्वादत्रापि[13] कवापादनवत्[14] परत्वादत्रार्तपि कपितदभावेऽकचि[15] च सर्वनाम्नः काक[16]चोर्विभाषाप्रवृत्ति

---

1. संत्येव प-1.
2. बाधकत्वेन क्यथेति अ-3; लाधवत्वं नत्वन्यथेति ज-2.
3. यत्तु स्वंपीनिरवकाशत्वम् अ-3; स्वीर्यात्यत्र; निरवसाम्पनुज्ञान मन्यतरस्या अ-4.
4. पाठोऽयं प-1, प-2; प्रतितोकम् अ-1; प्रतितीकसपादायेदम् ज-2; प्रतितीकमुपादादायेदम् अ-3.
5. 5/1/13 अष्टा.
6. शेखराते तत्र प-2; शेखसरांते तत्र प-1.
7. पाठोऽयं प-1, प-2; इत्यर्थे अ-1, ज-2, अ-3.
8. कयो वैकल्पिकत्वेन प-, प-2.
9. अव्ययसर्वना साकच् प्राकूटेः 5/3/71 अष्टा.
10. ऽकतिति अ-3.
11. प्रति नाऽस्ति अ-3.
12. नावीनातोक्तं च ज-2; न विनोक्तोक्तं च प-1; नवीनाक्तं च अ-3.
13. पाठोऽयं प-1, प-2; अत्रापि नोपलभ्यते अ-1, ज-2, अ-3, अ-4; परस्तात् अ-3.
14. कपादनवत् अ-3,
15. 'ऽ' नाऽस्ति अ-3.
16. काकचोविर्भाष्यप्रवृत्ति अ-3.

प्रसङ्गः। न धातु लोप इति सूत्रे भाष्येपितत्सूत्रप्रत्याख्यानावसरे पूर्व मकार लोपे पश्चाल्लुकि अल्लोपस्य[1] स्थानिवद्भावाल्लोलुवादौ गुण वृध्यभाव[2]मुक्त्वा तदनंतर मुक्तं लुकि कृते न प्राप्नोति। इदमिह संप्रधार्य्यम्[3]। लुक् क्रियातामल्लोप इति किमत्रन्याय्यपरत्वात्[4] अल्लोपः नित्योलुक् शब्दांतरस्येति[5] न्यायेन लुगप्यनित्यः[6] द्वयोरनित्ययोः[7] परत्वात् व्यवस्था अनवकाशस्तर्हिलुक् सावकाशो लुक् कोऽवकाशः[8] अवशिष्टः अथापि[9] कथंचिदनवकाशो लुक् अथापि न दोषः। अल्लोपे[10] योग विभागः करिष्यते अत इति किमर्थं[11]मिदं लुक् बाधनार्थमित्युक्तम्। तत्र यद्यपि सावकाश इति प्रतीकमुपादायभिन्नविषयौ लुक[12] लोपौ यकारस्य लुक्[13]। अकार[14]स्यलोपः ततश्चनास्ति येन ना प्राप्ति न्याय इत्युक्तं कैयटेन तथापि लुकि[15] कृते न प्राप्नोतीति[16] प्रतीकमुपादाय अनवकाशत्वादंतरंगानपि इति न्यायाच्च[17] लुकि –

---

1. अल्लोपस्य तिचद्भाल्वाल्लोलुवादौ अ–3; अल्लोपस्य विवद्भावाल्लोलुवादो ज–2.
2. वृध्यभावमुक्त्वातनंतरमुक्तं अ–3; वृद्यैभावमुस्वातदनंतर मुक्तलुकि अ–4.
3. पाठोऽयं प–1, प–2, अ–4; सप्तधार्यम् अ–1, अ–3; अप्रधार्या ज–2.
4. व्याप्यं परत्वाद अ–4.
5. 'त' नाऽस्ति प–1.
6. लुप्पनित्यः अ74.
7. द्वयोरनित्ययोऽपरत्वाद् अ–4.
8. कोवऽकाशः ज–2; किऽवकाशः प–1.
9. आधापि प–1, अ–3.
10. अल्लोधयोग प–2.
11. किमर्थं मिदम् अ–3; किमर्थमिति प–1.
12. लुकलौपौ अ–3, ज–2.
13. 'तु' न्राऽस्ति प–1.
14. अकारस्य अ–4; अकारस्यलोपस्तातश्च नाऽस्ति प–2.
15. लुकित्यनेन प–2.
16. प्राप्नोतोनिप्रतीकमुदाय अ–3.
17. इति न्योयाच्च प–2.

कृते[1] लोपो न प्राप्नोतीत्यर्थः। उत्तर[2] आशया[3]नभिज्ञ आह। परत्वादिति किं च भिन्न विषयेपि बाध्यबाधकभावोदृष्टः[4] यथाव्यथो[5] लिटीति सम्प्रसारणस्य वकारे चारिता[6]र्थ्येपि हलादिःशेष बाधकताभाष्यकारोपि मिदचोऽन्तयादि[7]त्यस्य विषयभेदेपि प्रत्ययपरत्वबाधकता[8] वक्ष्यति। तस्मात्कृते[9] चारितार्थ्येपि तत्प्राप्तिकालेऽवश्यं प्राप्त्यापवादत्वं[10] भवत्येवे[11]त्याशयः। असंभव एव बाधकत्वमिति वार्त्तिकानुयायिना सावकाशो लुगित्युक्ते स एवाथापी[12]त्याहेति तदुक्तिः कथंचिदिति विवरणे उक्तम्। किं च पारेमध्ये षष्ठ्या[13] वा द्वितीय[14] तृतीय चतुर्थ तुर्याण्यतरस्यामित्यादिसूत्रस्थं भाष्य मध्यतराव-संगच्छते[15]। तत्राद्ये हि महाविभाषया[16] परं गंगाया इति वाक्यस्यापि सिद्धतया[17] सूत्रे वा[18] ग्रहणवैय्यर्थ्यशंकायां पक्षे षष्ठी[19] समासार्थं तर्हि

1. पाठोऽयं प-1, अ-4; कृत अ-1, अ-3, ज-2, प-2.
2. इतर प-1, प-2.
3. अशनानभिज्ञ अ-4.
4. माथो दृष्टः अ-3; मांधौ दृष्टः ज-2.
5. पाठोऽयं प-1, प-2; यथाव्यप्तो लिटोति अ-1, अ-3; यथायथो लिटोति अ-4; यध्यविप्पोतिदोति ज-2.
6. चरितार्थ्योपि प-1.
7. मिदचोऽन्त्यात् परः 1/1/47; मिदिचोत्यादि त्यस्य ज-2, अ-3.
8. वाधकतांवक्ष्यतो अ-4.
9. पाठोऽयं प-2, अ-4 स्यात् कृते अ-1, ज-2, अ-3; तत्स्मा कृत प-1.
10. ऽपवाद्दत्वम् अ-4.
11. भवत्ये चेत्याशयः ज-2.
12. एवाथपित्याहेति प-1; एवाद्यापोत्याहति अ-4.
13. 2/1/18 अष्टा.
14. 2/2/3 अष्टा.
15. सं. पाठः संगछते अ-1, ज-2, प-1, प-2, अ-3, अ-4 तत्राद्यो हि प-1.
16. विभाषयारंगगाया अ-3, ज-2.
17. सिधतया अ-3, ज-2; सिध्यतया प-1.
18. सूत्रे चा ग्रहण प-1; सूत्रे वा गुण अ-3.
19. पक्ष्ये षष्टी अ-3; षष्ठि प-1.

वाग्रहणमित्युक्ते सोपि[1] महाविभाषाधिकार पठित इति तावु[2]भौ वचनाद्-भविष्यत इत्युक्त्वाऽपवादेन मुक्तेपूर्व पूर्वकायादा[3] एकदेशि समासाभा[4]ववत्। पक्षे[5] षष्ठि समासा[6] प्राप्तौ तदभ्यनुज्ञानं वा ग्रहणप्रयोजनमुक्तम्। द्वितीयमिति[7] पूर्वोक्तरीत्या एवैकदेशि समासे न मुक्ते भिक्षाद्वितीयमिति[8] षष्ठी समासाभ्यनु-ज्ञानमन्यतरस्यां ग्रहण[9] फलमुक्तं स्पष्ट[10] चेदं विवरणेपि भवदुक्त रीत्योत्सर्ग[11] शास्त्रस्य वैकल्पिकतयाऽव्ययीभावैकदेशिसमासयो[12]- श्चरितार्थ्येनानप-बादत्वात् षष्ठी समासस्याप्रतिरुत्थत[13]यातत्प्रवृत्तौ[14] चानयोरिति वाग्रहणं विनापिलक्ष्य सिद्धौ तदर्थत्वोक्तिस्तयोर्भाष्योक्तासंगतिः स्यात्। किं चानयोर-पवादत्वाभावे अपवादेन मुक्ते इति न्याय[15]संचारस्यासंगत्यापत्तेश्च। ननु महाविभाषया[16] न प्रत्यय समासयो[17] र्विकल्पः क्रियते[18] किंतु एकोपस्थिति

---

1. 'पि' नाऽस्ति प-.
2. तावुभौवनाचाद्भविष्यत प-1; तावुभौवनाचाद्भविष्यत प-2.
3. पूर्वकायादौ प-1, प-2; कायादा एव देशि अ-3, ज-2.
4. समासवत् अ-4; समापाववत् प-2; समानावत्तपक्षे इति पाठः प-1.
5. पक्षषष्ठी अ-3.
6. पाठोऽयं प-1, प-2, अ-4 समा प्राप्तौ अ-1, अ-3; समाप्तात्यौ ज-2.
7. द्वितीये हि अ-3, ज-2.
8. द्वितीयमीति प-2.
9. ग्राहणफल प-2.
10. स्पष्टं वेद अ-3, ज-2.
12. समासामासयोश्चरीतार्थ्येनानयचादत्वात् अ-3, ज-2.
13. प्रतिरुत्वतया अ-3, ज-2.
14. प्रावृत्तौ अ-4.
15. न्यायासे चारस्याऽसगत्या अ-4.
16. विभाषायान प-1, प-2.
17. पाठोऽयं अ-4 प्रत्ययसमयो विकल्पः अ-1; प्रत्ययसमसयो ज-; प्रत्ययसमासयोर्विकल्पः प-2 प्रत्ययत्यप्राप्तव्योर्विकल्पः प-1
18. गीयते ज-2; क्रियते अ-4.

जनकत्व[1]रूपैकार्थी भावेप्रत्ययादिस्तदभावे व्यपेक्षाया[2] न प्रत्ययादिकमित्येव। एवं सर्वकः पारे[3] गंगादित्यादौ व्यपेक्षायामकजादीना[4] प्राप्ते[5]रेवाभावाद-चारितार्थ्येनावश्य प्राप्त[6]कादेर्वाधनमुचितम्। प्रकृते[7] तु नैवमिति चेन्न। यद्युत्सर्गापवादकतैकार्थीभाव एकस्तदानीमिदं संभवेत् तदेव न। यदा न षष्ठी समासस्तदोपपद[8] समास इत्यु[9]क्त्वा तदोपपदसमास[10]कृतैकार्थाभाव इत्युपपदमतिङिति[11] सूत्रस्थ भाष्येणाथवा विभाषा षष्टीसमासः यदा न षष्ठी समासस्तदोपपदसमास[12] इति तत्सूत्रस्थाग्रिमभाष्येण च दाक्षिरित्यत्रेञा-मुक्तेण्[13] माभूदिति यत्रोत्सर्गापवाद[14] महाविभाषा[15] तत्रोत् सर्गो न प्रवर्तते[16] इति द्वितीयतृतीयेति[17] सूत्रस्थान्यतरस्यां ग्रहणेन ज्ञापयित्वा तत्प्रयोजनकथन-

---

1. 'क' नास्ति अ-4.
2. व्यपेक्षयां अ-3
3. पारम् अ-4; परे अ-3.
4. व्यापक्षायां अ-4.
5. प्राप्तरेवाभावाद् ज-2.
6. प्राप्तकालेर्वार्धनन मुष्टं चितम् अ-4.
7. प्रकृते तु प-1; प्रदनते र्तु प-2.
8. तदोपदसमास ज-2, अ-3.
9. इत्यनुक्ता ज-2, अ-3.
10. उपपदसकृतैकार्थी भाव अ-4; कायीभाव अ-3; काथीभाव ज-2.
11. उपपदगितिङिति प-1.
12. समासाति अ-3, -2; समा इति अ-4.
13. दाधिरित्यत्रेनामुक्तण् प-1; तामुक्तेण प-2; जामुक्तेऽण् अ-4.
14. यत्रोत्सोर्गापवाद म् अ-4.
15. विभाषतत्रौत्सर्गा अ-3; विभाषा प-2.
16. प्रवर्तत इति अ-4.
17. द्वितीयतृतीयचतुर्थतुर्याग्यन्यतरस्याम् 2/2/3 अष्टा; तृत्तीयेति प-1.

परत्सूत्रस्थ भाष्येण च तत्तत्कार्यकृतैर्कार्थी[1]भाव व्यपेक्षयो[2] र्भेदस्यावश्यकत्वात्। अन्यथा षष्ठी समासाद्य[3] भावेव्यपेक्षायां एव सत्वेन तत्रोपपदसमासा[4]दिरिति भाष्यासंगत्यापत्ते:[5]। ततश्च[6] क प्रत्ययकृतैकार्थीभावे[7]ऽकच् कृततत्त्वेऽक-चश्चारिता[8]र्थ्येपि उत्सर्गाप्राप्तियोग्येऽचारितार्थ्येरूपबाधकत्वाहानेरक[9]चाको बाध्य:। एवं प्रकृतेऽपि ङीष् भावे टापश्चारितार्थ्येपि तदप्राप्तियोग्येऽचारितार्थ्य-रुपबाधकत्वाहानेष्टषाङीपो बाधएवोचित: ङीपोवैकल्पिकतयाऽप्रवृत्तावपि[10] तत्प्राप्तियोग्यताया: सत्वात्। वस्तु- तस्त्वनयारीत्या[11]छादिषेयाणि[12] तृणानि

---

1. कृतैकर्थो प-2.
2. व्यपेक्षयोर्मेवृस्यावश्यकत्वात् अ-3; व्यपेक्षायो र्भेदस्या ज-2; भावव्ययोभेदेस्या अ-4.
3. समासार्धाभावे प-2.
4. समासादितिरिति अ-4.
5. भाष्यासंगत्यपत्ते: प-2; भाष्यासंगत्यपत्ति: ज-2.
6. ततश्च कृतैकार्थो भावे इति पाठ: ()
7. भावभावेऽकचकृतमत्वेकचश् अ-3; कृतैकीर्थोभावाभावेऽकच् अ-4; भावेऽकचद्यत्ततत्त्वेऽकच प-1; कार्थो भावेऽकच् प-2.
8. चोतार्थ्ये अ-3, ज-2.
9. पाठोऽयं प-2, अ-4; बाधकवाह निरकचाको बाध्य: प-1; बाधकत्वार्थ निरकवाकोवाध्य: ज-2; बाधकत्वाहाने रवोकेकोवोध्य: प-1 बाध कत्वाहानेष्टाषार्ड्यो बाध अ-3; अकचाको बाध्य: ङीपो वैकल्पिकतया इति अ-4 मातृकायां पाठोपलभ्यते.
10. अप्रवृतापि प-2, प्रवृतावपि अ-4.
11. वस्तुतस्तु न परीत्वा अ-3, अ-2.
12. छादियेयाणि अ-4.

इत्यादौ उत्सर्गाप्राप्ति विषये छदिरूपधीति[1] सूत्रस्य चारितार्थ्ये न कैय्यटोक्तं प्रतिपद[2] विधित्वं चिंत्यमेव। इदमेव भाष्यं मूलोक्त निरवकाशत्वे[3] सत्येव वाध[4] इति प्रयोजकमित्यस्य प्रत्युदाहरणं बोध्यम्। ननु येनेति न्यायेन बाध स्तु चारिता[5]र्थ्येपि भवत्ये[6]वेति न्याय[7]मादाय पूर्वोक्त भाष्याणा[8] प्रवृत्तिरिति नत्व[9]नवकाशत्वेन बाधमादायेति चेन्न। पूर्वसूत्रापवादोऽयमिति मनोरमायामपि तुल्यत्वात्[10]। इदं पूर्वोक्तं सर्वं[11] तस्मात् शेषग्रहणं कर्त्तव्यमिति भाष्योक्त-मुपसंहारम[12]कृत्वासमासांताश्चकव[13] भावे सावकाशा[14] इत्युक्तमित्युपसंहारिण[15] मूलकृतैवबोधितम्[16]। कब भावे चारितार्थ्येपि तदप्राप्ति योग्येऽचारितार्थ्येन[17] बाध उचित इति तस्याशय:[18]। अग्रिम भाष्यंत्वेकदेश्युक्तमित्युक्तमेवेति

1. छदिरूपधिबलेर्ढन् 5/1/13 अष्टा. छपेछादि रूपधोति अ–1; षयेणदिरूपधीति ज–2; प्राप्तिविषान्येछदि प–1, प–2; प्राप्तिषयेछदिरूपधीति अ–3. विषयेछदिरूपतो अ–4.
2. प्रतियद्वविधित्वम् प–2.
3. निरवकषत्वे प–2; निरवकशत्वे अ–3.
4. बाध इति नाऽति प–2.
5. चारिताथ्योपि प–1; चारितार्थ्यपि अ–3.
6. भवरोचेति प–1; भवत्यवेति अ–4.
7. न्ययमादाय प–2.
8. भाष्यणाप्रवृत्तिरिति प–2; पूर्वोक्तमाभाष्यणाम् अ–4.
9. नत्वमनवकाशत्वेन प–1; अनवकाशेत्वेन प–2.
10. 'त्' नाऽस्ति प–2.
11. सर्वमस्यात् प–2; सर्वतस्मात् ज–2; सर्वं मस्यात् प–1.
12. उपसहारम कृतासमाप्तां ताश्चकव ज–2; समाप्ताताश्चकभावे प–1.
13. 'व' नाऽस्ति प–1, अ–3.
14. सावकशा प–2.
15. इत्युक्तमित्युपरिणमूल अ–3; इत्युपसंहारेण प–2; इत्युपसंसारेणमूल प–1 इत्युक्तसंहारेण अ–4.
16. बोधिताम् ज–2.
17. उचारितार्थेन ज–2.
18. उचित इत्याशय: अ–4; उचित इति तस्यशय: ज–2.

समाहितम्॥65॥

नन्वयजे इन्द्रमित्यादावन्तरङ्गस्यापि गुणस्यापवादेन सवर्णदीर्घेण बाधः स्यादत आह-

अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते॥65॥

निरवकाशत्वरूपस्य बाधकत्वबीजस्याभावात्। एवं च प्रकृतऽन्तरङ्गेणगुणेन सवर्णदीर्घः समानाश्रये चरितार्थो यणगुणयोरपवादोऽपि बाध्यते। पूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वविषय इदम्।

यत्तु आगमादेशयोर्न बाध्यबाधकभावः, भिन्नफलत्वात्; अत एव ब्राह्मणेभ्यो दधि दीयतां कम्बलः कौण्डिन्यायेत्यादौ कम्बलेन न दधिदानबाध इति 'च्छ्वोः' (6.4.19) इति सूत्रे कैयटस्तत्र। अपवादो नुग्दीर्घत्वस्येति 'दीर्घोऽकितः' (7.4.83) इति सूत्रस्थभाष्यविरोधात्॥65॥

दिक्। क्वचिदनवकाशत्वाभावेऽपीति। यथा स्वापीत्यत्र इत्यत्र चारितार्थ्येनापि।[1] जतन्नित्यनेन[2] झलंतलक्षणनुमोबाधात् पूर्वदोर्धः न तु पदः[3] नित्यश्च पूर्वंनुम्। एवं[4] चोक्तमेवरूपं न तु स्वं पीतिबोध्यम्। एवं सेदुषीत्यादिन्यप्यु[5] ह्यायानि॥64॥

'अत एक' इति[6] सूत्रे कैय्यट इति। तत्र भाष्ये लिठा[7] आदेश[8]

---

1. स्वापीत्यर्थत्राप इत्यय ज-2.
2. जतनित्यनेन ज-2; अत्पृन्निनेन प-1, प-2; अत्यन्नित्यनेन अ-4.
3. परः प-1, प-2, अ-4.
4. स्वपीति ज-2, अ-3.
5. पाठोऽयं प-1; सदुषीत्या प-2: सेदुषीत्यादोन्यप्युवानि अ-1; सेदुषोत्याद्दोन्यध्युशुरवाति ज-2, अ-3, अ-4.
6. इति नाऽस्ति प-2.
7. लिटा प-1.
8. आदेदशविशेषणा प-1.

विशेषणाभावेनेमतुः सहेत्यादावनादेशादेरिति[1] निषेधशंकायां तस्य[2]तद्विशेषणत्वेन पूर्वोक्तदोष परिहारे अस्त्वन्यत् लिट्ग्रहणस्यप्रयोजनं इहमाभूत्। पक्ता[3]पक्तुं नैतदस्ति क्ङितीत्यनुवर्तते[4] एवमपि पक्वः[5] पक्ववान् इति अत्र[6] प्राप्नोति। अभ्यासलोप संनियोगेन[7] एत्वमुच्यते। न चात्राऽभ्यासलोपं पश्यामः। एवमपि पापच्यते[8] अत्र प्राप्नोति[9]दीर्घत्वमत्रबाधकं भविष्य[10]तीत्युक्तम्। दीर्घत्वमत्रेति[11] भाष्यमुपादायाभ्यासविकारेषु[10] बाधका न बाधंत[11] इत्येतत्तु यत्र सर्वेषां प्रवृत्तिस्तत्राश्रीयते। यद्यपि दीर्घे कृते एत्वाभ्या[12]सलोपप्रसङ्गस्तथापि एत्वाभ्यासलोपयोः कृतयो[13] दीर्घत्वाप्रसंग इति विरुद्धत्वादबाधकत्वाभाव[14]

---

1. नादेशारिति प-2; नादेशारिहेति प-1; सहत्त्यादावनाहेश्यदेरिति अ-3.; सेहेहत्याचनादेरिति अ-4.
2. तस्यद्विशेषणत्वेन अ-3.
3. पक्तापलुं प-1, प-2.
4. कुतोत्यनुवर्तते ज-2; कृतीत्यनुवर्तते प-2; डीतोत्यनुवर्तते अ-4, प-1.
5. पक्ववावान् इति प-2; पक्वः पक्वः वान् इति प-1; पक्वः पक्ववा इति अ-4.
6. आत्र प्राप्तोति प-2.
7. संनियोगेनत्वमुच्यते अ-3; संनियोगेन एवत्वमुच्यते ज-2.
8. यापच्यते प-2, अ-4; यापाच्यते अ-3.
9. प्राप्नोति दीर्घत्वमत्रबाधके अ-3; प्राप्नोति दीर्घत्वमत्रबाधको ज-2; प्राप्नोतिदीदीर्घत्वसुत्रबाधत्वं अ-4.
10. भातीत्युक्तम् प-1.
11. दीर्घत्वमत्रेति अ-4.
10. विकरेषु अ-4.
11. वाबाधाकानाबाधंतु प-1.
12. एत्वभ्यास प-2.
13. कृमयोर्दीघत्वा प-2 क्रमयादो त्विप्रसंग प-1; दीर्घत्वाप्रसंगा इति अ-3.
14. भावा इति प-2; भाव इति नोक्तम् अ-3; अभात इति तु नोक्तम् अ-4.

ननु अजीगणदित्यादौ गुगेरीत्वं निरवकाशत्वाद्धलादिः शेषं बाधेत तत्राह अभ्यासविकारेषु बाध्यबाधकभावो नास्ति॥66॥

'दीर्घोऽकितः (7.4.83)' इत्यकिद्ग्रहणमस्या ज्ञापकम्। अन्यथा यंयम्यत इत्यत्र नुकि कृतेऽनजन्तत्वाद्दीर्घाप्राप्तौ तद्वैयर्थ्यं स्पष्टमेव।

इयं परान्तरङ्गादिबोधकानामप्यबाधकत्वबोधिका। तेन अचीकरत्, मीमांसत इत्यादि सिद्धम्। आद्ये सन्वद्भावस्य परत्वाद्दीर्घेण बाध: प्राप्नोति। अन्त्ये 'मान्बध' (3.1.67) इति दीर्घेणान्तरङ्गत्वादत्त्वस्य बाधः प्राप्तः।

यत्तु यत्रैकैकप्रवृत्त्युत्तरमपि सर्वेषां प्रवृत्तिस्तत्रैवैतत्प्रवृत्तिरिति 'अत एक' (6.4.120) इति सूत्रे कैयटस्तन्न। नुकि कृते दीर्घाप्राप्त्या धर्मिग्राहकमानविरोधान्मान्बधादीनां दीर्घे कृत इत्त्वाप्राप्त्या 'गुणो यङ्लुकोः' (7.4.82) इति सूत्रस्थभाष्योक्ततदुदाहरणासङ्गतेश्चेत्यन्यत्र विस्तरः॥66॥

ननु तच्छीलादितृन्विषये ण्वुलपि स्यात्? न च तृन्नपवादोऽसरूपापादस्य विकल्पेन बाधकत्वात्। अत आह-

---

इति। तेनोक्तम्। तदुदाहरणं[1] तु नर्नर्तीत्या[2]दावुरदत्वे रुगादयो बोध्याः। ज्ञापकसिद्धस्यासार्वत्रिकत्वेन नित्य[3]त्वात्तस्यात्राना[4]श्रयणे परत्वात् बाध इति तु भाष्यं सुयोजमितीदं स्पष्टं सर्वं विवरणे॥66॥

1. मदुदाहरणं प-1.
2. नर्नतीतयादारदत्वे प-1, प-2.
3. निसत्वात्तस्या अ-3, ज-2.
4. अनाश्रयणो ज-2, अ-3.

ताच्छीलिकेषु वासरुपविधिर्नास्ति॥67॥

ण्वुलि सिद्ध 'निन्दहिस' (3.2.146) इति सूत्रेणैकाज्भ्यो वुञ्विधानमत्र ज्ञापकम्, तत्र तत्रण्वुल्वुञः स्वरे विशेषाभावात्। ताच्छीलिकेष्विति विषय सप्तमी। तेनताच्छीलिकैरताच्छीलिकैश्च वासरूपविधिर्नेति बोध्यम्॥

नन्वेवं कम्रा कमनेत्याद्यसिद्धिः, 'नमिकम्पि' (3.2.167) इति रेण 'अनुदात्तेतश्च हलादेः' (3.2.149) इति युचो बाधादिति चेत्? न। 'सूददीपदीक्षश्च' (6.2.153) इत्यनेन दीपेर्युज्निषेधेनोक्तार्थस्यानित्यत्वात्॥67॥

नन्वेवं हसितं छात्रस्य हसनमित्यादौ घञ्, इच्छति भोक्तुमित्यत्र लिङ्लोटौ, ईषत्पानः सोमो भवतेत्यत्र खल् प्राप्नोतीत्यत आह-

क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति॥68॥

इदं च वासरूपविधेरनित्यत्वात् सिद्धम्। तदनित्यत्वे ज्ञापकं च 'अर्हे कृत्यतृचश्च' (3.3.169) इति। तत्र हि चकारसमुच्चितलिङ् कृत्यतृचोर्बाधा मा भूदिति कृत्यतृज्ग्रहणं क्रियत इत्यन्यत्र विस्तरः। वासरूपसूत्रे भाष्ये स्पष्टैष॥68॥

ननु श्वः पक्तेत्यत्र वासरूपविधिना लृडपि प्राप्नोति, कृत आदेशे वैरूप्यादत आह-

लादेशेषु वासरूपविधिर्नास्ति॥69॥

आदेशकृतवैरुप्यवत्सु लकारेषु स नास्तीत्यर्थः। अत्र च 'हशश्वतोर्लङ् च' (3.2.116) इति लङ्विधानं ज्ञापकम्। अन्यथा 'परोक्षे लिट्' (3.2.115) इति लिटा लङः समावेशोऽसारुप्यात्सिद्ध इति किं लङ्विधानेन? शत्रादिभिस्तिङां समावेशार्थं शतृविधायके विभाषाग्रहणानुवृत्तिः 'लिटः कानज्वा' (3.2.106) इति वाग्रहणं च कृतम्। तज् ज्ञापयति वासरूपसूत्रेऽपवाद आदेश त्वानाक्रान्तः

प्रत्यय एव गृह्यत इति कैयटादौ ध्वनितम्। तत्फलं तु सदादिभ्यो भूतसामान्ये लिटः क्वसुरेव न तु पक्षे तिङ् इति बोध्यम्॥69॥

ननु 'ङमो ह्रस्वात्' (8.3.32) इत्यादौ ङमः परस्याचोऽचि परतोङम इति वेति सन्देहः स्यादत आह-

उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्॥70॥

अचीति सप्तमीनिर्देशस्य 'मय उञः' (8.3.33) इत्युत्तरत्र चारितार्थ्यात् पञ्चमीनिर्देशोऽनवकाश इति 'तस्मादित्युत्तरस्य' (1. 1.67) इत्यस्यैव प्रवृत्तिः।

यत्र तु 'डः सिधुट्' (8.3.29) इत्यादावुभयोरप्यचारितार्थ्यं तत्र 'तस्मिन्' (1.1.66) सूत्रापेक्षय। 'तस्मादित्युत्तरस्य' (1.1.67) इत्यपस्य परत्वात्तेनैव व्यवस्था। एवमुभयोश्चारितार्थ्येऽपि। यथा 'आमि सर्वनाम्नः' (7.1.52) इत्यादौ। तत्रामीति सप्तमी 'त्रेस्त्रयः' (7.1. 53) इत्यत्र चरितार्था। आदिति पञ्चमी 'आज्जसेरसुक्' (7.1.50) इत्यत्र चरितार्थेति स्पष्टं 'तस्मिन्' इति सूत्रे भाष्ये कैयटे च॥70॥

॥इति बाधबीजनामकं द्वितीयं प्रकरणम्॥

।।अथशास्त्रशेषनामकं तृतीयं प्रकरणम्।।

ननु अतः कृकमि (8.3.46) इति सत्वमयस्कुम्भीत्यत्र न स्यात् कुम्भशब्दस्यैवोपादानादत आह-

---

द्वि[1]षत्परयोरिति। द्विषंतप[2] इत्यत्र खच् द्विषती[3]ताप इत्यत्र नेत्युदाहरणम्। **समासान्तविधा[4]विति।** तदुदाहरणं[5] तु राजाहः सखि[6]भ्यष्टच् इति च यथा मद्रराज[7] इत्यत्र भवति एव मद्र[8]राज्ञीत्यत्रनेति बोध्यम्। **महदात्त्वे इति।** आन्महतः समानाधि[9]करणजातीययो[10]रित्यात्वं[11] महाब्राह्मणे भवति न महती ब्राह्मणीत्यादौ[12] परत्वा[13]त्पूर्वत्वंबाधित्वाआत्वमिति ध्येयम्। **ञ्नित्स्वरविधाविति[14]।** दाक्षिरित्यादाविव दाक्षीत्यत्र न ञ्नित्यादिर्नित्यमित्यस्य प्रवृत्तिः[15]। **राजस्वरे इति।** आर्यो[16] ब्राह्मणकुमारयोरित्यनुवर्तमानेतयोः परतो

---

1. 'प' नाऽस्ति अ-3.
2. द्विषत्परयोस्तापेः (3.2.39) अष्टा. द्विशती ज-2.
4. समासांत ज-2, अ-3.
5. 'तु' नोपलभ्यते अ-4.
6. सं. पाठः 5.4.91 अष्टा.
7. 'भ' नाऽस्ति प-2.
8. मद्रराज्ञोत्य मेति प-2; मद्रराज्ञोपत्यम् प-1.
9. 6/3/43 अष्टा; समाजाधि ज-2, अ-3; समनाधिकरण प-2; सनाधिकरण प-1.
10. रित्यातम् अ-3.
11. महाब्राह्मणो अ-4.
12. भवति प्र महंती ब्राह्ममणोत्यादौ अ-3; प-1, प-2.
13. परत्वात्नत्वं बाधिक आत्वमृ ज-2; परत्वा प्रवत्वां बाधित्वा प-2; पयरत्वात्युनत्वं वाधित्वा अ-4; अ-3
14. सं. पाठः, नित्स्वर विधास्वेति अ-1, अ-3.
15. पाठोऽयं प-1, प-2, अ-4; प्रष्ठतिः अ-1; प्रप्पतेः ज-2; प्रष्टति अ-3.
16. आद्र्यो अ-3, ज-2.

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्॥71॥

सामान्यरूपेण विशेषरूपेण वा प्रातिपदिकबोधकशब्दग्रहणे सति लिङ्गबोधकप्रत्ययविशिष्टस्यापि तेन ग्रहणं बोध्यम्। अपि ना केवलस्यापीत्यर्थः।

अस्याश्च ज्ञापकं समानाधिकरणाधिकारस्थे कुमारः श्रमणादिभिः (2.1.70) इति सूत्रे स्त्रीलिङ्गश्रमणादिशब्दपाठः। स्त्रीप्रत्ययविशिष्ट-श्रमणादिभिश्च कुमारीशब्दस्यैव सामानाधिकरण्यं न तु कुमारशब्दस्येति तदेतज्ज्ञापकम्॥

इयं च 'द्विषत्परयोः' (3.2.39) इत्याद्युपपदविधौः, समासान्त विधौ, महदात्त्वे, ञ्नित्स्वरविधौ, राजस्वरे ब्राह्मणकुमारयोः 'बहोर्नञ्वदुत्तरपदभूम्नि' (6.2.175) इत्यादौ समाससङ्घातग्रहणेषु च न प्रवर्त्तत इति ङ्याप्सूत्रे भाष्ये स्पष्टम्। विभक्तिनिमित्तकार्ये च नेत्यपि तत्रैव। तत्र समासान्तविधाववयवग्रहणे तत्र दोषोक्तेः। 'बहुब्रीहेरुधसः' (4.1.25) इति सूत्रभाष्याच्च। एतावत्सु एवानित्यत्वाद-

---

राजन् शब्दः कर्मधारये वा[1] प्रवृत्येति प्रकृतिस्वर[2]विधायकराजाचेतिसूत्रेण यथा राजा ब्राह्मण[3] इत्यादौ प्रकृति[4] स्वरस्तथा राज ब्राह्मणीत्यत्रापि प्राप्नोति[5]। बहोर्नञ्वदुत्त[6]रेति। उत्तरपदबहुत्वेवर्तमानाद्बहुशब्दा[7] त्परं पदंतस्य समासस्य नञ् इव स्वरो[8] भवतीत्यति देशार्थः। एवं च बहवो गोमन्तोऽस्य-

---

1. कर्मधारयेवामकृत्येति ज-2, अ-3.
2. 'स्वर' नाऽस्ति, अ-4.
3. ब्राह्मणा अ-3.
4. प्रकति अ-3, ज-2; प्रतिकूस्वरः प-1.
5. पाठोऽयं प-1, अ-4 प्राप्तीति प-2; प्रीति अ-1, ज-2, अ-3.
6. बहोर्नन्वदुत्तर पदभूम्नि 6/2/175
7. वह शब्दात् प-2; वुहु प-1 वर्तमाद्वकु अ-4.
8. 'स्वरो' नाऽस्ति प-1

प्रवृत्तिः, दोषाः खल्वपि साकल्येन परिगणिता इति भाष्योक्तेः।

बहुगोमानित्यत्र यथाऽतिदिष्ट[1]स्स्वरोनञ् सुभ्यामिति समासस्यांतोदात्तत्वं[2] भवति[3] तथा बहु[4]गोमतीत्यत्रापि प्राप्नोति[5]। इदं च समाससङ्धात[6]ग्रहणे चेत्यनेन[7] सा[8]मानाधिकरणमेकवचनांतपाठश्च। **समास**[9]सङ्धातग्रहणे चेति पूर्वोक्त-मेवोदाहरणं[10] प्रत्युदाहरणं तु कुसूल[11]कूपकुंभशालं विले[12] इति परतः कुसूलादीनामंतोदात्तत्वं कुसूलीबिले[13] भवतीति सर्वं विभक्ति[14] कार्य इति। उगिदचामिति नुम् गोमानित्यत्र[15] भवति न भवति च गोमतीत्यत्रेति[16] बोध्यम्। अवयवग्रहण एवेति[17]। उदाहरणन्तु पूर्वोक्तं राजाहसखिभ्य

---

1. 'स्वनन्' प-1
2. पाठोऽयं प-1, प-2; स्यमासुसादात्तत्वं ज-2.
3. न भवति, प-1
4. बहणोमती प-1.
5. आप्नोति ज-2; इत्यत्रोपित्राप्रीति प-2.
6. ग्रहैचेत्यनेन प-1; गहदाहरणेचेत्यनेन इति पाठः अ-3.
7. नैन अ-4; 'न' नाऽस्ति प-2.
8. पाठोऽयं प-1, प-2; सरमानाधिकरणम् अ-1, अ-3, ज-2; समानाधि करणम् अ-4.
9. 'स' नाऽस्ति प-2.
10. उदाहरणाम् अ-3, ज-2.
11. सुकुसूलकूप प-1; सकुस् कुप् प-2
12. कुंभशालि इति अ-3.
13. बिले च प-1; विलो भवतीति प-2.
14. सर्व विआलकार्य प-1.
15. गोर्मानित्यन्नेति बोध्यम् इति पाठः प-1.
16. गो गोमानित्यत्र ज-2, अ-3.
17. 'ति' नाऽस्ति अ-3.; ग्रहण एवेति नाऽस्ति अ-4.

नन्वेवं, बहुव्रीहेरुधसो ङीष् (4.1.25) इति सूत्रस्थभाष्यासङ्गतिः। तत्र हि- कुण्डोध्नीत्यत्र 'तद्यृतश्च' (5.4.153) इति कबापादितो नद्यन्तबहुव्रीहेरित्यर्थात्। नद्यन्तस्य बहुव्रीहित्वाभावात्तदसङ्गतिः।

इति[1] बोध्यम्। समास[2] संधातग्रहणेत्विति[3]। शेषाद्विभाषेति महायशस्कादाविव[4] बहुमालके प्रवर्त्तत इत्याशयः स्वर**विधा**वेवेति[5]। प्रत्युदाहरण[6]माह। बहुव्रीहेरिति[7]। इदं सर्वं तत्र सूत्रे विशिष्यत्तत्सूत्राणा[8] भाष्ये उपादानादनुमीयत[9] इति ध्येयम्। यत्तु एकादेशस्य[10] पूर्वान्तवत्वेन ग्रहणादामि[11] सर्व नाम्नः सुडिति कौमुदी प्रतीकमुपादाय न चैवमत्वाबंतत्वाभाव इति शेखरे शंकितं तत्राबंतत्त्वस्यानुपादानात् चिंत्यमित्याहु[12]: कैय्यटानुयायिनस्तदेव[13]चिन्त्यं ग्रन्थाशयानवबोधात्। तथाहि[14] न चैवमित्येवादि शब्दस्य पूर्वांतवद्भावेन सर्वनामत्वेपीत्यर्थः। आबंतत्वाभाव इत्यस्य सिंहावलोकन्यायेन सर्वनाम्न -

---

1. बाध्यम् प-1, अ-4.
2. समासंमाप्त प-1, प-2.
3. ग्रहणीत्वेति अ-4.
4. महायशस्वादाविव ज-2, अ-3.
5. स्वरविधावोचेति अ-3.
6. प्रत्युदाहरण इमाह प-1.
7. वहुब्रिहेरिति प-1.
8. विशिष्यतसूत्राणाम् प-2.
9. उपादानादनुमते इति अ-4.
10. एकोदेशस्य अ-3.
11. ग्रहणा ज-2
12. चिंतामित्याहु: ज-2.
13. तदेवचिन्त्याम् ज-2, प-1, अ-3; तदेवचिन्त्यम् अ-4.
14. न चेवमित्येवादि इत्यारभ्य विषये इत्यर्थः इत्यन्तं प-1 मातृकायां नाऽस्ति.

नद्यन्तानां यः समास इत्यर्थेन परिहृतम्। नद्यन्तप्रकृतिकसुबन्तोत्तर-पदकः समास इतीति चेत्? न। अनया परिभाषया स्त्रीप्रत्ययसमभिव्याहारे तद्रहिते दृष्टानां प्रातिपदिकत्वतद्व्याप्यधर्माणां विशिष्टेऽपि पर्याप्तत्व-मतिदिश्यत इत्याशयात्॥71॥

नन्वेवं यूनः पश्येत्यत्रेव युवतीः पश्येत्यत्रापि 'श्वयुव' (6.4. 133) इति सम्प्रसारणं स्यादत आह-

विभक्तौ लिङ्गविशिष्टाग्रहणम्॥72॥

स्पष्टा चेयं 'युवोरनाकौ' (7.1.1) इत्यत्र भाष्ये। घटघटी ग्रहणेन लिङ्गविशिष्टपरिभाषाया अनित्यत्वात्तन्मूलैवेत्यन्ये॥72॥

ननु 'तस्यापत्यम्' (4.1.92) इत्येकवचननपुंसकाभ्यां निर्देशाद्-गार्ग्यो गार्ग्यावित्याद्ययुक्तमत आह-

सूत्रे लिङ्गवचनमतन्त्रम्॥73॥

इति स्याद्[1] विषये इत्यर्थः। न च तत्सूत्र[2]व्याख्यावसरे शंकोचितेति वाच्यम्। तत्रा[3]बांतत्त्वांशे समाधानेपि सर्वनामत्वांशेपि समाधानं कर्त्तव्यं स्यात्। मूलकृतैव एकांशे[4] समाधानस्य कृत्त[5]त्वादपरांशेस्वेन[6] समाधानकरणात्॥71॥

---

1. स्यादूविषये अ-3; स्याद्विषये ज-2.
2. सूत्रा अ-4.
3. तत्रावतत्वांश समाधाने अ-4; तत्रवांतत्वांशे ज-2; तत्रावंतत्वांशे प-1, प-2; तत्रावांतत्वां शेष अ-3.
4. एकाशे अ-4; एकांशे प-1.
5. समाधानस्य कृत्वा तत् अपरांशे प-1.
6. पाठोऽयं प-1, प-2; अपरांशेखेन समाधान अ-1, ज-2, अ-3 अपरांशे स्विन समाधान अ-4.

युवती: **पश्येत्यत्रापीति।** ननु[1] **श्वयुवेति** सूत्रे युवती: पश्येत्यत्र लिंगविशिष्ट[2]परिभाषयामघवतेत्यत्र च[3] सम्प्रसारणमाशंक्यश्वादीनां[4] सम्प्रसारणे नाकारांत ग्रहणं अनकारांत[5] प्रतिषेधार्थमिति समाधायो[6]क्तमेतत्। अर्वण[7]-स्तृमधोनश्च न शिष्य[8] छांदसं हि तत्[9] विभक्तौ लिंगविशिष्टाग्रहणेन चोभयत्र[10] समाधायोक्तम्। अथवोत्तर[11]सूत्रेऽल्लोपो[12]ऽन इत्यत्रान इति योग विभागं कृत्वोभयशेष विज्ञानेनादोषेश[13]चादीनामिति पूर्वोक्तं वार्तिकं न कर्त्तव्यम्[14]। एवं च[15] युवती: पश्येत्यत्र[16] अन्नंतत्वाभावेन प्राप्तिरेव[17] नेति चेन्न। एवमती[18]

---

1. न चनुश्च युवेति प-2; ननुश्चेति युवेति प-1.
2. परिभाषाया अ-3.
3. 'च' नाऽस्ति अ-4
4. समाशंक्यश्वादीना प-2; सम्प्रसाणमांशंक्यश्चादिना प-1.
5. अनकारात प-2; संप्रसारणेनाकारांतर प्रतिषेधार्थम् अ-4.
6. पाठोऽयं प-1, अ-3; समाधायोक्तमुक्तमेतत् अ-1, ज-2, प-2; समाधाक्तंमुक्तधर्मेतत् अ-4.
7. अवर्णस्तु ज-2.
8. शेव्यंछादा सहितत् प-2; प-2; शिष्यां छांदसं अ-4.
9. हित्तत् ज-2, अ-3; हितम् अ-4.
10. चाभयेत्र अ-4.
11. पाठोऽयं प-1, प-2, अ-4; अथावोत्तर अ-1, ज-2, अ-3.
12. सं. पाठ: अल्लोपोऽन: 6/4/137.
13. दोषश्चा प-2:, दीघेश्वादीनामिति अ-3, अ-4.
14. लकर्त्तव्यम् अ-3; न कर्त्तव्ये ज-2.
15. पाठोऽयं प-1, अ-4; ए च युवती: अ-1 एवं च युवतो ज-2.
16. पश्योतयत्र ज-2, अ-3.
17. प्राप्तिरेवेनेति अ-4.
18. युवमता गोमती अ-4; एवमतिगोमति प-1.

गोमती पथीत्यादौ[1] लिंगविशिष्ट परिभाषा प्राप्तोगि[2]दचामितिनुम्[3]। पथीत्यात्वादीनां[4] वारणायावश्य कर्त्तव्या परिभाषयैव[5] गतार्थत्वादित्याशयात्। मघवदादीनां छांदसत्वेन तत्र सर्व विधीनां[6] व्यवस्थिततत्वात्। सिद्धिः[7] नकारांतग्रहणं कर्त्तव्यमिति भाष्यं योगविभागपरं च पूर्वोक्तसूत्रस्थं भाष्यमेकदेश्युक्तम्। एकमेकदेशविकृतमनन्य[8]वदितिन्यायमुपन्यस्य[9] ऋत्लृक् सूत्रे राज्ञः कचेति का[10]देशे राजकीय[11]मित्यत्राल्लोपो न इति लोपं पूर्वोक्तन्यायेनाशंक्य[12] पूर्वसूत्रोपसंख्यात नकारांतग्रहणानुवृत्या न दोष इति दोषोद्धारपरं भाष्य[13]मप्येकदेश्युक्तमेव। विकृता[14]वयवनिबंधनकार्याभावस्यान्यत्र स्पष्टत्वेनादोषाच्च। यत्तु[15]श्च युवेत्यत्र शेखरे उत्तर[16]सूत्रादनइत्यपकृष्यते[17]

---

1. यथोत्यादौ ज-2, अ-3.
2. पाठोऽयं प-1, प-2, अ-4; प्रार्प्तेगिदचामिति अ-1, ज-2, अ-3.
3. नुत् अ-4.
4. पयि इत्यावादीनां अ-4.
5. पारिभाषयैव प-2.
6. विधीनो अ-3.
7. सिद्धः अ-3.
8. विकृतमृनन्यतयानकासंवग्रहणानुवृत्यात्रदोष इति प-1 पुस्तके पाठोपलभ्यते.
9. उनन्यस्य हैऋ लृक् अ-4.
10. कादेशो अ-3.
11. राजकीयत्यत्राल्लोपेश्च न इति लोपं अ-4.
12. पाठोऽयं प-2; न्यायेना शंवचपूर्व अ-1, ज-2, अ-3; न्यायेनाशंवचपूर्व अ-4.
13. परभाष्यमप्यके अ-3; परभाष्यप्रत्यके ज-2; परभाष्येक अ-4.
14. विकृतावयानिबंधन ज-2, विकृतास्यववंघ्न अ-4.
15. यतुश्च प्रत्वेत्यत्र प-2, अ-1; एतुश्वयुवेत्यत्र अ-3; यतुश्च श्वयुवेत्यत्र अ-4.
16. 'र' नाऽस्ति अ-4.
17. इत्ययकृश्यते ज-2; इयकृष्यते प-2.

तेन मघवतेत्यत्र न दोष इत्युक्तम्। तच्च प्राचामनु[1]रोधेन अत्रैव सूत्रे[2] मघवच्छब्दस्य[3] छांदसत्वं शब्दरत्नादौ[4]स्पष्टम्। युवती: पश्येत्यत्र[5] प्रकृत[6] परिभाषया[7] सम्प्रसारण[8]वारक युवोरनाकाविति सूत्रस्थ भाष्येणेदं सर्वं[9] सूचितम्। एतद्भाष्यप्रामाण्यादेव परम्परया विभक्तिनिमित्तकत्वेपि परिभाषा[10] प्रवृत्तिरिति। एवं शुनेत्यत्र[11] सावेका[12]चस्तृतीयादिर्विभक्तिरिति विभक्त्यु[13]दात्तत्वं यथा न गोश्चन्नि[14]त्यनेन प्रतिषिध्यते[15] तथाशुन्या[16] इत्यत्रोदात्त[17] यणो हल् पूर्वादिति विभक्ति स्वरस्यापि न गोश्वन्निति[18] निषेध: स्यादिति परिभाषाप्रयोजनावसरे[19] भाष्यकृदुदाहरणाद् विभक्तिस्थानिकेपि[20]

---

1. प्राचानुरोधेन प-1.
2. सूत्रे नाऽस्ति अ-4.
3. 'च' नाऽस्ति प-1.
4. रत्नादौ बोध्यं प-1.
5. पश्ये तत्र अ-4.
6. प्रवृत्त अ-3.
7. परिभाषायाम् अ-3.
8. 'प्र' नाऽस्ति प-2, सम्प्रसारणं इत्यारभ्य परमराया इत्यन्तं नाऽस्ति अ-4.
9. सर्व अ-3; सर्व ज-2.
10. परिभाष्या प-2.
11. अनेत्यत्र ज-2 एवं शुन्ने त्यत्र प-1.
12. सावेकाचतृतीयादि प-1, सावेक्य चस्तृतीयादि अ-4 सावेकावस्तृतीयादि ज-2.
13. विभक्त्यु प-1.
14. यथाननोश्वत्नित्यनेन अ-4.
15. प्रतिषिध्य प-1.
16. तथाषुन्यादातयगो प-2; तथाषुन्या इत्यत्रोदतयणो प-1; तथाशुन्या इत्यत्रोदात् अ-3; उदात्तयणाहल् अ-4.
17. 6/1/174 अष्टा.
18. सं. पाठ: गोश्वन्सावर्ण 6/1/182 अष्टा.
19. प्रयोजनवासरे अ-3.
20. स्थानिकेपि प-2; स्थानिकत्वपि अ-4.; स्थानिकेषि ज-2.

कार्ये[1]परिभाषाप्रवृत्तिः सुवचा तत्रापि विभक्तेर्यत्र प्राधान्यं[2] तत्रैव कार्यप्रवृत्ति[3]रित्यप्यस्माद्भाष्यात्। एतेन पूर्वोक्तं भाष्य[4] विभक्तिस्थानि[5]ककार्ये परिभाषा प्रवर्त्तकमुपन्यस्यैतेनैक[6] शेषप्रकरणे प्रदीपे[7] स्त्रीगवीनामितिप्रयोगे हलंत्य[8] सूत्रे मनोरमायां चित्रगवीनामिति प्रयोगे च[9]व्रुःमति चेति णत्वाभावोव्याख्यातः कवर्गवदुत्तरपदसमासत्वस्य ङीबंते[10] लिंगविशिष्ट[11] परिभाषा[12]लभ्यस्य विभक्ते[13]र्णत्वे णत्वेकर्त्तव्येऽनया[14] निषेधान्तव्य[15]तराणां तत्र सणत्वं[16] पाठमंगीकृत्य[17] प्रकृतपरिभाषाया अप्रवृत्ति[18] कल्पनान–

---

1. कार्यो अ–4.
2. प्रधान्यम् प–2; प्राधान्यं इत्यारभ्य परिभाषा प्रवर्तकम् इत्यन्तं प–1 मातृकायां नाऽस्ति.
3. प्रकृति प–2; 'अपि' नाऽस्ति अ–4.
4. भाष्याम् अ–3.
5. विक्तिस्थानेक अ–3; स्थानिकेपि ज–2, अ–3, प–2.
6. कृशेषपकरणो अ–4.
7. 'प्रदीपे' नोपलभ्यते प–1; प्रदीप ज–2, अ–3, प–2.
8. इल्यंत्य अ–3.
9. पाठोऽयं अ–4; चकुमति अ–1, अ–3; चकुमुति ज–2; प्रयोगे चक्रमति नोपलभ्यते प–1, प–2.
10. ङीत्बंतो प–1; ङीवतो प–2.
11. वशिष्ट अ–3.
12. परिभाषाया ज–2.
13. परिभाषा अप्रवृत्ति कल्पनान चिक्रीयास सा लभ्यस इति पाठाधिक्यं ज–2 मातृकायाम्.
14. अनय प–2.
15. निषेधान्निव्यतराणाम् प–1; निषेधाश्चव्यतराणां अ–4.
16. सनत्वः प–1, प–2; सवर्ण अ–4.
17. अंगीकृत्यत परिभाषा अप्रवृत्तिः अ–4.
18. अप्रकृति प–1, प–2.

'अर्द्धं नपुंसकम्' (2.2.2) इति नपुंसकग्रहणमस्यां ज्ञापकम्। नित्यनपुंसकत्वार्थं तु न तदित्यन्यत्र निरूपितम्। धान्यपलालन्यायेन नान्तरीयकतया तयोरूपादानमिति 'तस्यापत्यम्' इत्यत्र भाष्ये स्पष्टम्। अत एव 'आकडार' सूत्रे एकेति चरितार्थमित्यन्यत्र विस्तरः॥73॥

चित्रीया[1]मुत्पादयितुमर्हतिकृतबुद्धिति[2] कैय्यटानुयायिनोक्तमपास्तमिति दिक्॥72॥

ननु **व्याघ्रीकच्छपीत्यादाविति।** ननु स्वाङ्[3]गाच्चेत इति सूत्रस्थ कुक्कुट[4]यादीनामण्डादिषु इति वार्त्तिकप्रत्याख्यानपरभाष्य[5]रीत्याव्या[6]घ्रीत्यादीनां सिद्धौ[7] नैतदुदाहरणमेतस्याः परिभाषायाः। तत्र हि जात्यंतर निवृत्ति परताया[8] स्त्रोत्व[9]मनुपकारित्वादविवक्षितमित्यर्थकनवाऽस्त्री[10]पूर्वपद विवक्षित्त्वादिति भाष्येण कुक्कु[11]टांडमृगक्षीरादीनां सिद्धिमभिधाय वार्त्तिकं प्रत्याख्यात[12]

---

1. पाठोऽयं प-1, प-2, चिक्रीयामु सादयितुम् अ-1; चिक्रीयासु सादयितुम् ज-2; चित्रायामुत्पादायितुम् अ-4.
2. पाठोऽयं प-1, प-2, अ-4; वुद्धिष्विति अ-1, ज-2; बुद्धिष्टिति अ-3.
3. स्वाङ्गाच्चेतः 6/3/40.
4. सं. पाठः अष्टा. 1206 (वा.) अष्टा. कुकुद्यादीनामंडादिष्वति अ-1, अ-3; ककुत्यादीनां ज-2; कुल्क्वुप्यादीनां मां डादिष्विति प-1; कुप्कुप्यादीनां प-2.
5. परिभाष्या ज-2.
6. रित्या प-1; रीत्यापीत्यादीनाम् अ-4.
7. सित्धी अ-3.
8. परितायां ज-2.
9. पाठोऽयं प-1, प-2; स्त्रीत्वाननुपकारित्वाद अ-1, ज-2, अ-3; स्त्रीत्वामनुप अ-4.
10. 'ऽ' नाऽस्ति अ-3.
11. कुकुटांड प-2.
12. प्रत्याख्यानम् प-1.

तद्रीत्या प्रकृतेपि[1] घः शब्दात्सुपि तदंते न समासे पश्चात्स्त्रीत्वविवक्षाया[2] ङीषसुलभः कुक्कुटादीनां[3] जाति व्यंजकत्वं केवलघ्न[4] इत्येतस्य न तद्व्यंजकत्वति[5]त्वन्यदेतत्। स्त्रीत्वविवक्षायाः[6] प्राक् सुपि समासस्तु उभयत्र समानः[7] पूर्वोक्तभाष्यानुवाद[8] शेखरेऽजाद्यतष्टाविति[9]। एवं च कौंभकारेयसां कुटीनादीनामसिद्धया परिभाषावतारणीयात्तत्रहि[10] पूर्वं ङीपि[11] ततः सुपि च कारिशब्देन[12] कुंभस्य समासे विशिष्टात् स्त्रीप्रत्ययानुत्पत्याऽवयावादेव[13] ठकि[14] उकारस्य वृध्यनापत्ते[15] न चानुपसर्जनस्त्रीप्रत्यये तदादि नियमा[16]भावेन विशिष्टादेव ठगु[17]त्पत्स्यते। समुदायठगंबाधित्वाव्ध[18] च इति परत्वादंतरंगत्वा-

---

1. प्रकृतेप ध्रशब्दासुपि प-2; प्रकृत्यातेपि प-1; प्रकृपि ध अ-4.
2. विवक्षायाङीष अ-4.
3. कुकुटादीनां ज-2, प-2.
4. केवल ध प-1.
5. व्यन्जकत्वविचित्वंन्यदेतत् प-2; व्यन्ज त्वचित्वन्यदेतत् प-1.
6. विवक्षाया ज-2.
7. सामान, अ-3, ज-2.
8. भाष्यानुनवाद अ-3.
9. अजाद्यतष्टाप् 4/1/4 अष्टा.
10. अवतारणीया तत्र ज-2, प-2, अ-2, अ-4.
11. ङीपो प-1; ङोषि प-2.
12. शब्द न प-2.
13. अवपवादेव प-2; स्त्रीप्रत्ययासंभुष्वात्याऽवयवादवटकिटकारस्य इति पाठः अ-4.
14. ढकि डाकगुरस्य अ-3.
15. वृद्ध्यनापत्तेः अ-4.
16. 'नि' नाऽस्ति अ-3; स्त्रीप्रतेतदादिनियमां अ-4.
17. ठगुत्पत्स्यते ज-2; ठगुत्यलयते प-2; ठागुरुपत्स्य ते अ-3; टगुत्प्रत्स्यते अ-4.
18. बाधित्वाव्यच प-2, अ-4; वाधित्वाब्दच ज-2.

द्राऽवयवात् ढक्[1] प्रस[2]ज्येत्। अत एव पुंयोदाख्यायामितिसूत्रे एतत्परिभाषाफल कथनावसरे[3] एतदभावे कौंभकारे[4] यो न सिद्धयेदित्युक्तम्। सांकुटीने[5] तु अभिविधौ[6] भाव इनुणितीनुण्[7] प्रत्ययः तत्र कुटिन्नित्ये तस्माच्छब्दात् समासार्थाद्[8]विभक्तिश्च प्राप्नोति[9] अणिनुण[10] इत्यण् प्रत्ययश्च। तत्र[11] स्वार्थिकत्वांतरंगत्वादण्[12] प्रत्यय स्यात्[13] ततः कुटिन्नित्येतस्यैवांगत्वादा[14]दिवृद्धिः स्यात्। प्राक् सुबुत्पत्तेः[15] समासेऽतरंगत्वात्पूर्वं समासः। अणप्रत्ययो हि प्रातिपदिकविशेषापेक्षत्वाद्वहिरंगः संकुटि[16]न्नित्यस्मात् समास[17] प्रातिपदिकादण सतीष्टं[18] सिध्यति। स्पष्टं चैतत्ङ्याप्प्रातिपदिकादितिसूत्रे शेखरे पीति चेन्न। अनयैव दिशा[19]साहितस्यधनक्रीतेत्यादावपि ङीषा[20]पत्यादोधात्। व्याघ्रीत्यादीनां

---

1. ठक् अ–3.
2. प्रसजेत् प–1 प्रसज्यते अ–4.
3. कथनावासरे अ–3; कथानावसरे अ–4.
4. कौंभकारियो प–1.
5. सांकुठोने ज–2, अ–3, साकुटोनेत प–2.
6. अलिविधौ प–1.
7. अभिविधौ भाव इनुण् 3.3.44 अष्टा; इनुणितीनुगा प्रत्ययः ज–2; इनुगितीनुप् प–2.
8. समासाद्विभक्तिश्च अ–4.
9. प्राप्नौति अ–3.
10. अग्नियुगः– 5.4.15 अष्टा; अग्निुगित्मणत्यप्रत्ययः अ–4.
11. तत प–1, प–2.
12. अन्तरंगात्वादण् प–1.
13. स्यतु ज–2.
14. 'ग' नाऽस्ति 'म' अस्ति, अ–3.
15. सुत्पतेः अ–3; सुपुत्पतेः ज–2.
16. संकटिटिन्नित्यस्मात् ज–2.
17. समासः प–1.
18. सतिष्टम् प–1.
19. साहिततस्य अ–3; सहितस्य अ–4.
20. ङीषायसादोषात् ज–2, प–2, अ–3; ङीषादोषात् अ–4.

ननु 'भृशादिभ्यो भुव्यच्वेः' (3.1.12) इति विधीयमानः क्यङ्, क्व दिवा भृशा भवन्तीत्यत्रापि स्यादत आह-

नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः॥74॥

नञ्युक्तमिवयुक्तं वा यत्किन्चिद्दृश्यते तत्र तस्माद्भिन्ने तत्सदृशेऽधिकरणे द्रव्ये कार्यं विज्ञायते, हि यतस्तथार्थगतिरस्ति।

परिभाषोदाहरणवादि[1]मत इवाजादिगणे पाठे तु व्याध्म्रादीना[2]मेतत् परिभाषोदाहरणत्वमेकदेश्युक्त[3]मेवेति ध्येयम्। अत एव मूलकृतावतरणे[4] आदि पदं दत्तम्। न च पूर्वोक्तभाष्य प्रामाण्यात्पूर्वपदे विवक्षा[5]स्वीकारेपि[6] उत्तरपदेतत्स्वीकारेमानाभाव इति वाच्यम्। शूद्राचामह[7]त्पूर्वाजातिरित्यजादिगणसूत्रस्थ जातिग्रहण विरोधात्। तथाहि, तत्र जातिग्रहणस्य न तावत् महा[8]शूद्राशब्देटाप्[9] व्यावर्त्यः महती[10] शूद्रेतिसमासे तस्येष्टत्वात्। विशिष्ट महाशूद्रशब्दस्य जात्यंतरवाचक[11]त्वे तु अवयवार्थसमवेत[12]स्त्रीत्वा भावादेवावयवात् टाबप्राप्तौ

---

1. पाठोऽयं प-1, प-2, अ-4; मतरवाजादिगण अ-1, ज-1, अ-3.
2. व्याघ्रादीनाम् अ-3; व्याघ्म्रादीनामेतत् इत्यारभ्य मूलकृतावतरणे इत्यन्तं नाऽस्ति अ-4.
3. उदाहरणत्वमेदेश्यक्तमेवेति ज-2; एकदैश्युमेवेति अ-3.
4. पाठोऽयं प-1, प-2; कृतावतणी अ-1,ज-2, अ-3.
5. पाठोऽयं प-1, अ-4, प-2; अविवक्षा अ-1, ज-2, प-2, अ-3.
6. स्वीकारेपि उत्तर अ-4.
7. शूद्रा चामहत्पूर्वाजातिः 617 सि. कौ.; 'ह' नाऽस्ति प-1.
8. महशूद्रा ज-2, अ-3, अ-4.
9. ठाप् अ-3; ठाश् ज-2.
10. महति प-1; महतेष्टरद्रेति प-2; व्यावर्तः महती अ-4.
11. 'क' नाऽस्ति प-1; वाचकत्वे न अ-4.
12. सामवेत प-2.

न हि अब्राह्मणमानयेत्युक्ते लोष्ठमानीय कृती भवति। अतश्च्व्यन्त-सदृशेऽभूततद्भावविषये क्यङ्ङिति नोक्तदोषः। ओषधेश्च

तद्वारक तद्ग्रहणं - व्यर्थमेव[1] स्यात्। एवं च यदा शूद्रशब्दे जातिमात्र[2]विवक्षा न[3] स्त्रीत्वविवक्षात्तदातस्मात्सुपिमहच्छब्दे[4] न समासे पश्चात्स्त्रीत्वविवक्षायां महाशूद्रेति इष्यते तच्च तदग्रह[5] विना न सिध्यति[6] तत्सत्वे[7] तु अमहत्पूर्वे[8]त्यत्रापि तत्सम्बन्धे विशिष्टस्य जातिवाचकत्वाभावान्न[9] निषेधः। एतत्सर्वं भाष्यप्रदोपोद्योते च स्पष्टम्। अत्राविवक्षाया[10] च स्वाङ्गाच्चेत[11] इति सूत्रस्थं भाष्यमेवगमक[12]- त्वेनोपन्यस्तम्।

एवं चोत्तरपदेऽविवक्षां[13] विना जातिग्रहणसार्थक्य[14]स्योपपादयितुम-शक्यत्वेन त्वदुक्तकल्पनायाः कुकल्पनात्वमिति दिक्।

सुप्सुपेत्यस्य निवृत्येति। न च प्रथमांतसुब् ग्रहण[15] निवृत्तौ पूर्वपदेपदत्व

---

1. व्यथामव अ-4.
2. मात्र नाऽस्ति प-1.
3. 'न' नाऽस्ति 'त' अस्ति प-1.
4. सहच्छब्देन अ-4.
5. तद् गृहम् ज-2, प-2, अ-3.
6. सिध्येति अ-4.
7. तत्तत्सत्वे तु प-1.
8. 'त्' नाऽस्ति प-1; अमहुत्पूर्वेत्यत्रापि अ-3.
9. अभावात्प्रतिषेधः अ-3.
10. अत्रविवक्षाया प-1, प-2.
11. स्वाङ्गाच्चेत्, 6.3.40.
12. पाठोऽयं प-1, प-2, अ-4; ममकत्वोपन्यस्तम् अ-1; गमकत्वोनोपन्यस्तम् ज-2, अ-3.
13. ऽविवक्षांविरांजम् प-1; ऽविवक्षाविरंगगतिग्रहण प-2; पदेर्भवदक्षयां विना ज-2.
14. सार्थक्य यस्यो ज-2.
15. ग्रहणस्य ज-2, अ-3.

प्रयुक्त न लोपादीनां राजयुध्वे[1]त्यादावसिद्धिप्रसंग इति वाच्यम्। उपपद-मित्यन्वर्थसंज्ञयैव तत्कार्यसिद्धरिति विवरणशेखरादा[2]वेवोक्तत्वात्। ननु कुंभकारे[3] उत्तरखंडे कृदुत्पत्यनं[4]तरमेव पूर्वखंडे षष्ठी प्रवर्त्तनीया। अपवाद[5] विषयत्वात् द्वितीयाया:[6] प्राप्तिरेव न[7]। एवं च पूर्वपद[8]स्योपपदत्वाभावाद् प्रसङ्ग:[9] कर्मण्यण: स्यात्। मन्मते तु प्रातिपदिकार्था: पंचेति[10] पक्षे प्रातिपदिक स्यैव कर्मबोधकत्वेनोपपदत्वात्तन्नि[11]बंधन[12] प्रत्यये कर्मषष्टयां कुंभ अस्[13] कार इति प्रक्रिया वाक्ये समास इति चेन्न। षष्टोसमासस्यावकाश: राज्ञ: पुरुष:[14] उपपद समासस्यावकाश:[15] स्तंबेरम:। इहोभयं प्राप्नोति कुम्भकारो नगरकार: उपपद समासो भवति विप्रतिषेधेनेति[16] भाष्यस्थं[17] कुम्भकारेति प्रतीक[18]मुपादाय कैय्यट आह। पंचकप्रातिपदि[19]कार्थे प्राति –

---

1. राजयुधेत्यादौ ज-2, अ-3; राज युद्धेत्यादौ अ-4.
2. शेखारादौ प-1, अ-4; शेखरादिदावेवोक्तस्यात् अ-3.
3. कुंभकारे प-1, अ-4.
4. कृत्यत्यनंतरं अ-3; कृदुत्पत्यन्नतंतरं अ-4.
5. आपवाद प-2.
6. द्वितीयाय: प-1.
7. न: अ-3.
8. पाठोऽयं प-1; पूर्वस्योप पदत्वा अ-1, ज-2, प-2, अ-3.
9. उपपदत्वाभावदप्रसंग अ-3; उपपदत्वादप्रसंग: अ-4.
10. पंचतिपक्षे अ-3.
11. 'तत्' नाऽस्ति प-1.
12. निंबधये प्रत्यये ज-2 निबंधन प्रत्यय प-1.
13. 'स्' नाऽस्ति प-1.
14. पुरुष इति अ-4.
15. उपपदत्यावकाश अ-4; समासस्याववश: स्तेवेरम: अ-3.
16. विप्रतिषेधोनेति ज-2, अ-3.
17. 'स्थ' नाऽस्ति अ-4.
18. 'प्रतीनाऽस्ति' प-1.
19. प्रतिपदिकार्थे प-1; प्रातिपदकार्थे अ-3.

विभक्तावप्रथमायाम् (6.31.32) इत्यादौ विभक्तिग्रहणं

पदिकेनैव कर्मणोक्तत्वात्[1] तत्रैवोपदेऽणाभाव्यं अपवाद विषयत्वाच्च-द्वितीयानुत्पादात् कृतेचाणि[2] कर्तृकर्मणोरिति[3] षष्ठीभवति सत्युभय[4]प्रसङ्ग इति इमं कैयटमनूद्य प्रातिपदिकस्य[5] पदत्वाभावेनोपपदत्वं कथमिति चिंत्यम्। सुवंत[6]मेवोपपदमिति तत्रोपपदमिति सूत्रे भगवान्व[7]क्ष्यति। स्वयं च किं च पंचक[8] पक्षेपि सकलकार[9]कशक्तिमानर्थः संमुग्धाकारेणैव[10] प्रातिपदिकेनोच्यते। न तु विशिष्येति[11] कर्मोपपदत्व[12] प्रयुक्ताणो प्राप्तिः। अन्यथाकरणाद्युपपदेपि कर्मोपपदप्रसंगः स्यात्। तस्माद्वस्तुतः प्रकृत्यर्थ-कर्मत्वसत्वो न कृदनुत्य[13]तावपि भाविततत्त्वं गृहीत्वाषष्टीप्रवृत्तिरित्येव भाष्याशय उचित इति विवरणकारैरेवाभिधानात्। न चानयोर्योगयोर्निवृत्तं सुप् सुपेतीति[14] भाष्यस्य[15] यथाश्रुतार्थकत्वे उत्तरसूत्रे प्रथमांत सुप ग्रहणस्य निवृत्तावन्वर्थ

1. कर्मणोक्तवा तत्रैवोपदेशे भाष्यम् अ-3.
2. कृतेचाणि नाऽस्ति अ-3.
3. कर्तृकर्मणोकृति 2.3.65 अष्टा.
4. पाठोऽयं प-1; षष्टी भवतीत्यस्सुभयप्रसंगः अ-1, ज-2, प-2; षष्टीवतात्यस्सुभटाप्रसंग अ-3; षष्ठीभवतीत्यास्ते उभयप्रसंगेग इति अ-4.
5. प्रातिपदिकात्कभावेनोप प-1.
6. सुबंतमिवोपपदमितत्रोपदमिति अ-4.
7. भवान्वक्ष्यति प-1; सूत्रं भगवान् अ-4.
8. पाठोऽयं प-1, प-2, अ-4; स्वयं चा किं च शुंचकपक्षेपि अ-1; स्वपंचाकिंचर्थकक पक्ष्येपि ज-2, अ-3.
9. 'क' नाऽस्ति अ-4.
10. संमुग्धाकरणैव प-2.
11. विशिष्यति प-1; विशेष्येति अ-4.
12. 'द' नाऽस्ति प-2; 'त्व' नाऽस्ति अ-4.
13. कूदतुत्यंतावपि अ-3; सत्वाकृदनुत्यतावपि भावित्त्वं अ-4.
14. 'ति' नाऽस्ति अ-3, ज-2.
15. 'स्य' नाऽति अ-4.

संज्ञया[1] राजयुध्वादौ न लोप सिद्धावपि पूर्व[2] सूत्रेपि तन्निवृत्तौ निर्गत[3] इत्यादौ नित्योरुत्वं न स्यादिति वाच्यम्। निर्गत इत्यादौ शब्दांतर[4] संबंधात्प्राक् सुबुत्पत्तौ लुकि च पदत्वोत्तरं पदांतर संबंधेन[5] समासे न क्षतिरिति शब्दरत्नेनैव समाधानात्। एतेन यत्तूपपदमिति महासंज्ञाबलात्सुबंतस्यैवोपपद[6] संज्ञा विज्ञाना[7]न्नराजयुध्वेत्यादौ दोष[8] इति नव्यतरास्तन्न। कुंभकार इत्यादौ कृत्प्रत्ययोत्पत्ते:[9] प्राक् कर्मषष्ठ्या: कर्तुमशक्यत्वात्[10]। द्वितीयायाश्च[11] अपवाद[12] विषयत्वादप्रवृत्ते:। कुंभेत्यस्योपपदत्वाभावात्– कर्मण्यणोऽप्रसंगात्[13]। अस्मन्मते तु प्राति[14]पदिकार्थ पक्षे प्रातिपदिकस्यैव कर्मबोधकत्वादुपपदत्वे तन्निवंधने प्रत्यये कर्मषष्ट्यां कुंभ अस् कार इति प्रक्रियावाक्ये[15] समास:[16]। किं चानयोर्योगयो: प्रथमांत सुब्[17] ग्रहणस्यापि निवृत्तौ पूर्वसूत्रविषये तिरोभूयेत्यत्र

---

1. संज्ञाया प–1.
2. पूर्व नाऽस्ति अ–4.
3. निर्गत इत्यादौ शब्दातर संबंधात्प्राक् इति अ–4; निर्गत इत्यादीत्यिोरूत्वं प–1.
4. शब्दंतरं ज–2, अ–3, अ–4.
5. 'न' नाऽस्ति अ–3.
6. उपपदे अ–4.
7. विज्ञानाभराज प–1; विज्ञानात् तु राज ज–2.
8. 'दो' नाऽस्ति अ–3.
9. कृत्प्रत्यये सत्ते: प–1; कुर्तुमशक्यत्वात् प–2.
10. द्वितयायश्च प–2, अ–3.
11. पाठोऽयं प–1, प–2, अ–4, अर्थवाद अ–1, अ–3, अ–2.
12. 'ऽ' नाऽस्ति अ–3.
13. पाठोऽयं अ–4; प्रतिकार्थपक्षे अ–1, ज–2, पंचवप्रतिकार्थ अ–3; प्रऽतिकार्थ प–1; प्रातिकार्थ प–2.
14. 'प्र' नाऽस्ति अ–4.
15. 'स' नाऽस्ति प–2.
16. यागयो: प–1.
17. 'व' नाऽस्ति अ–3.

ह्येतन्न्यायसिद्धार्थानुवाद एव। एतेन विभक्तावित्याद्यस्यानित्यत्वे ज्ञापकमिति वदन्तः परास्ताः, अनित्यत्वे भाष्य सम्मतफलाभावात्।

रूत्वम् न स्यादिति कैय्यटानुयायिनोक्तं विवरणशेखर[1] शब्दरत्नादि[2] भट्टग्रन्थापर्यालोचनमूलकं दत्तजलांजलित्वमापादितमिति दिक्।

तैनाश्वक्रीतीति सिद्धेति[3]। एतत्सिद्धिस्तु पूर्वरीत्यै[4]वेति कारकांशे उदाहरणांतरमूहनीयम्[5]॥75॥

नामीतिसूत्रे इति। तत्रहि नुट्ग्रहणा[6]भावेनामिदीर्घ आमि[7]चैत्स्यादिति प्रकम्य परत्वान्नित्यत्वाच्च दीर्घह्रस्वाश्रयो[8] नुट् न स्यात्। प्रकृत परिभाषया[9] तु नुट् भवति। नृ[10] शब्दे तु न चारितार्थ्य[11] तथा हि सति नृ नद्याप[12] इत्येव ब्रूयात्[13]। नह्येकमिति न्यायात्[14] षट्[15] चतुर्भ्यश्चेत्यत्र त्रेरि[16]त्यनुवृत्या न तत्रापि चरितार्थ्यमित्युक्तम्॥76॥

---

1. विवरणदास्वर प-1; विवरणे अ-3.
2. शब्दरलारलादिभट्टग्रंथां प-2; शब्दरत्नारलादिभट्ट प-1.
3. सं. पाठः.
4. पूर्वरीत्येयेति प-2; पूर्वरीचेतिकारकांशे प-1.
5. उदाहरणांतरमृह्यम् अ-4.
6. ग्रहणाभापनामि अ-3.
7. आभित्वेत् स्यादिति अ-4.
8. ह्रस्वाश्च यो प-1, प-2.
9. परिभाषये तु अ-4.
10. 'वृ' शब्दे प-1, प-2, न शब्दे अ-3.
11. चारितार्थ्ये अ-3.
12. पाठोऽयं प-2, अ-4; सति नृद्याप अ-1, ज-2, अ-3 सति नृ नद्योप इत्येव प-1.
13. द्रूयान्नत्वेकमिति इति पाठः अ-4; ब्रूयात् त नह्येकम् प-2.
14. नह्येकमिति न्यायात् 'नोपलभ्यते प-1; नेत्द्येकमिति अ-3.
15. षट् चतुर्भ्यश्च 7.1.55; षट् चतुभ्यश्चे ज-2, अ-3.
16. भुवृत्या प-2; अनुभवृत्या प-1.

अत एव 'अकर्त्तरि च' (3.3.19) इति सूत्रे कारकग्रहणं भाष्ये

भाष्येप्रत्याख्यातमिति। ननु इको गुण[1] वृद्धीति सूत्रे भाष्ये इक् परिभाषाया: दिव औदित्यादावपि प्रवृत्तौ द्योरित्यादाविको विधेय[2]मौत्वादिकं प्रवर्ततेत्या[3]शंक्य संज्ञया[4] विधाने नियम इति समाधानमुक्तम्। तत्र च गुण वृद्धिग्रहण[5] पूर्वसूत्रादनुवर्तते[6] यदि तदनु[7]वर्तते अदेङ्[8] गुणे वृद्धिश्चेत्य देङा वृद्धिसंज्ञापि प्राप्नोतीति वृद्धिसंज्ञां प्राप्य संबंधमनुवर्तते अथवा[9]मंडूकगति राश्रीयते इत्यादि समाधा[10]नान्युक्तानि तत्र समाधानमध्ये अथवाऽन्य संज्ञा वचनादनुकर्षण फलक चकारा करणान्ना[11]देङा संज्ञेति वदता अनुकर्ष[12]णार्थक चानामावश्यकता[13] सूचितेति तद्विरोध इति चेन्न। लुटि च क्लृप:[14] किमर्थश्चकार: स्यसनोरित्येतदनु[15]कृष्यते। यदि[16] तर्हि नांतरेण चकार

---

1. इको गुणवृद्धी 1.1.3.
2. दिव औत् 7.1.84.
3. विधेययोत्त्वदिभृ ज-2; विधेयमात्वादिकम् प-1; विधेये अ-3.
4. संज्ञाया विधानमुक्तं तत्र इति पाठ: अ-4; विधाने निमिति समाधान प-1.
5. वृद्धियग्रहणम् अ-3.
6. अनुवर्तते अ-4.
7. यदितदनुवर्तते नाऽस्ति प-1; अनुप्रवत्तेते यदि अ-3.
8. 1.1.2 अष्टा. अदेङ् गोवृद्धि: इति पाठ: प-1; अदेगुणो अ-4.
9. अथावा प-1.
10. 'स' नाऽस्ति; 'प्र' अस्ति अ-4.
11. करणान्नदेजा संज्ञेति प-2; करणान्नोदेङा संज्ञेति अ-4; फलवच्छा एकरणान्नदेङा संज्ञेति अ-3; कुरणानादेङां संज्ञेति ज-2.
12. अनुकर्थनार्थक प-1; अनुकर्षाणार्थक प-2.
13. चान्नमावश्याकता अ-3.
14. 1.3.93 अष्टा; पाठोऽयं अ-3, अ-4.
15. अनुवृमेतो यदितर्हि अ-4.
16. यदित्तरेणं चकारम् इति पाठ: प-1.

प्रत्याख्यातमितिबोध्यम्। स्पष्टा चेयं भृशादिभ्यः (3.1.12) इति सूत्रे भाष्ये। अत्र अन्यसदृशेत्युक्त्या सादृश्यं भेदाघटितमिति सूचयति। निरूपितं चैतन्मञ्जूषायाम्॥74॥

ननु व्याघ्री कच्छपीत्यादौ सुबन्तेन समासात्ततोऽप्यन्तरङ्गत्वाट्टाप्यदन्तत्वाभावाज्जातिलक्षणो ङीष् न स्यादत आह-

गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः॥75॥

'उपपदम्' (2.2.19) इति सूत्रेऽतिङ्ग्रहणेन 'कुगति' (2.2.18) इत्यत्र तदपकर्षणेनातिङन्तश्च समास इत्यर्थात्तयोः सूत्रयोः 'सुप् सुपा' इत्यस्य निवृत्त्यैकदेशानुमत्या कारकांशे च सिद्धेयम्। तेनाश्वक्रीतीति सिद्धा। अन्यथा पूर्वं टाप्यदन्तत्वाभावात् 'क्रीतात् करणपूर्वात्' (4.1.50) इति ङीष् न स्यात्। अस्या अनित्यत्वात् क्वचित् सुबुत्पत्त्यनन्तरमपि समासो, यथा सा हि तस्यधन क्रीतेति।

अन्ये तु अनित्यत्वे न मानम्, तत्र अजादित्त्वाट्टाबित्याहः। अत एव कुम्भकार इत्यादौ षष्ठीसमासोऽपि सुबुत्पत्तेः पूर्वमेव। षष्ठीसमासाभावे च उपपद समासकृतैकार्थीभाव इति न तत्र वाक्यमिति 'उपपदम्' (2.2.19) इति सूत्रे भाष्ये स्पष्टम्। तत्र हि- षष्ठीसमासादुपपदसमासो विप्रतिषेधेन इति वार्तिकम्। अथवा विभाषा षष्ठीसमासो यदा न षष्ठीसमासस्तदोपपदसमास इति तत् प्रत्याख्यानं च। यद्यपि उपपदसमासस्यान्तरङ्गत्वाभिप्रायकं न वा षष्ठीसमासाभावादुपपद समास इति वार्त्तिककृतोक्तं तथापि तदुभयप्रत्याख्यानपरमथवेत्यादि भाष्यम्।

परिभाषायां सामान्यतः कारकोपादानेन कारकविभक्त्यन्तेन कृद्भिः समासमात्रस्य सुबुत्पत्तेः पूर्वमेव लाभात्। एतेनैषां कारकतद्विशेषयोरूपादान एवेति परास्तम्। अस्या विध्येकवाक्यत्वाभावेन विप्रतिषेधादिशास्त्रवत्कार्यव्यवस्थापकमात्रत्वेनोपादान एवेत्यर्थालाभाच्च॥75॥

ननु 'उगिदचाम्' (7.1.77) इत्यत्र धातोश्चुदुगित्कार्यं तर्ह्यञ्चतेरेवेति नियमेनाधातोरेव नुमि सिद्धेऽधातुग्रहणं व्यर्थमत आह-

साम्प्रतिकाभावे भूतपूर्वगतिः॥76॥

तत्तद्वचनसामर्थ्यन्यायसिद्धेयम्। तत्सामर्थ्यादधातुभूतपूर्वस्यापीत्यर्थेन गोमत्यतेः क्विपि गोमानित्यादौ नुम्सिद्धिः। 'नामि' (6.4.3) इत्यादिसूत्रेषु भाष्ये षष्टा॥77॥

बहुव्रीहौ तद्गुणसंविज्ञानमपि॥77॥

अपिनाऽतद्गुणसंविज्ञानम्। तेषां गुणानामवयवपदार्थानां सविज्ञानं विशेष्यान्वयित्वमिति तदर्थः। यत्र समवायसम्बन्धेन सन्बन्ध्यन्यपदार्थस्तत्र प्रायस्तद्गुणसंविज्ञानम्। अन्यत्र प्रायोऽन्यत्। लम्बकर्णचित्रगू उदाहरणे। 'सर्वादीनि' (1.1.27) 'जक्षित्यादयः' (6.1.6) इति चोदाहरणे। सर्वनामसंज्ञासूत्रे भाष्ये स्पष्टा॥77॥

ननु 'वदः सुपि क्यप् च' (3.1.106) इति चेनानुकृष्टस्य

मनुवृत्तिर्भवति द्युदभ्या[1] लुङीत्यत्रापि चकारः कर्तव्यः विभाषेत्यनुकर्षणार्थः[2] अथेदानीमंतरेणापि चकारमनुवृत्तिर्भवति। इहापि[3] नार्थश्चकारेण एवं च सर्वे चकाराः प्रत्याख्यायंते[4] इत्यादि प्रत्याख्या[5]पकप्रत्यक्षभाष्यैर्विरोधेनास्यै[6]क-देश्युक्तत्वादिति दिक्[7] ॥78॥

---

1. पाठोऽयं अ-4; द्युद्भयो लुङोत्यत्रापि प-1, प-2, अ-3.
2. द्युद्यालुङोतत्रापि ज-2; विभायित्यनु प-1, प-2; विभातयनु अ-4; विभाष्येत्यनु ज-2.
3. अपि नाऽस्ति प-1.
4. प्रत्याख्यायते अ-4.
5. प्रत्याख्यायम् प-1.
6. विरोधानास्येक अ-4.
7. 'द'

यतो 'भूवो भावे' (3.1.107) इत्यत्राप्यनुवृत्तिः स्यादत आह-

चानुकृष्टं नोत्तरत्र॥78॥

णमुल्यनुवर्त्तमाने 'अव्ययेऽयथाभिप्रेत' (3.4.9) इति सूत्रे पुनर्णमुल् ग्रहणमस्या ज्ञापकम्। अन्यथा क्त्वा चेति वदेत्। तद्धि उत्तरत्रोभयोः सम्बन्धार्थम्। उदाहरणानि स्फुटानि। इदमनित्यम्। अत एव 'तृतीया च होः' (2.3.3) इत्यत्र चानुकृष्टाया अपि द्वितीयाया 'अन्तरान्तरेण' (2.3.4) इत्यत्रसम्बन्धः। 'लुटि च क्लृपः' (1.3. 93) इतिसूत्रस्थेनानुवृत्त्यर्थकसकलचकारप्रत्याख्यायेन विरुद्धेयम्। व्याख्यानादेवानुवृत्तिनिवृत्त्वोर्निर्वाह इति तदाशयः। 'कुलिजाललुकखौ च' (5.1.55) इति सूत्रस्थ भाष्यविरुद्धा च। तत्र हि- 'द्विगोः ष्ठश्च' (5.1.54) इति सूत्रात् ष्ठनस्तत्र चेनाप्यनुकृष्टस्य 'खोऽन्यतर-स्याम्' इत्यस्य चानुवृत्तिं स्वीकृत्य 'लुक्खौ च' इति भाष्ये प्रत्याख्यातम्॥78॥

ननु अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तद्वयञ्जनादेर्व्यञ्ज-नान्ताच्च न प्राप्नोतीत्यत आह-

---

अन्तोऽवत्याः[1] इति स्वरोनेति[2]। अवती[3]शब्दस्यांत उदात्त इति तदंशंऽर्थः[4] वैत्रवतीत्युदाहरणम्[5]॥79॥

---

1. सं. पाठः, अन्तोऽवत्या 6.1.220; अंतोवत्या अ-1, अ-3 अंतोवंत्या ज-2; अतोवत्या प-1, प-2, अ-4.
2. नैति 'नोपलभ्यते' अ-3.
3. अवाती अ-4.
4. तदर्थः ज-2, प-1; उदाततर्थः प-2; उद्दात् इति तदर्शथः अ-3.
5. चेत्रवतीत्युदाहरणम् अ-3; वित्रवतीत्युदाहरणम् अ-4.

स्वरविधौ व्यञ्जनमविद्यमानवत्॥79॥

स्वराद्देश्यके विधावित्यर्थः। 'नोत्तरपदेऽनुदात्तादावपृथिवी-रुद्रपूषमन्थिषु' (6.2.142) इति सूत्रे पृथिव्यादिपर्युदासोऽस्या ज्ञापकः। अन्यथा पृथिव्यादीनामनुदात्तादित्वाभावादप्राप्तौ तद्वैयर्थ्यं स्पष्टमेव। धर्मिग्राहकमानादेव च स्वराद्देश्यकविधिविषयमिदम्। अत एव 'शतुरनमो नद्यजादी' (6.1.173) 'अचः कर्तृयकि' (6.1.195) इत्यादावजादी अच इत्यादेश्चारितार्थ्यम्। अत एव राजवतीत्यादौ नलोप स्यासिद्धत्वादन्वतीशब्दत्वात् अन्तोऽवत्याः (6.1.220) इति स्वरो नोदश्वित्वानित्यत्र 'ह्रस्वनुडभ्याम्' (6.1.176) इति मतुबुदात्त-त्वन्नेत्याकरः। स्पष्टं चेदं 'समासस्य' (6.1.223) इति सूत्रे भाष्ये। 'उच्चैरुदात्तः' (1.2.29) इति सूत्रे कैयटस्तु इयमनावश्यकी, समभि-व्याहृताजुपरागेण हलोऽप्युदात्तादिवदवभासात्तदुपपत्तेरित्याह। तत्र भाष्येऽपि ध्वनितमेतत्॥79॥

नन्वेवमपि राजदृषदित्यादौ समासस्य (6.1.223) इत्यन्तोदात्तत्वं षकाराकारस्य न स्यादत आह-

हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत्॥80॥

अस्याश्च 'यतोऽनावः' (6.1.213) इति सूत्रे नौप्रतिषेधो ज्ञापकः। नाव्यमित्यत्रादिर्नकारो न स्वरयोग्यो यश्चाकारस्तद्योग्यो नासावादिरिति स प्रतिषेधोऽनर्थकः। न चादिरेव नकार उदात्तगुण-विशिष्टान्तरतमात्रूपोऽस्त्विति वाच्यम्। तथा सति निमित्तभूत-द्व्यचकत्वस्य विनाशादुपजीव्यविरोधेनाद्युदात्तत्वाप्राप्तेरित्यत्र विस्तरः। स्पष्टा चेयं 'समासस्य' (6.1.223) इति सूत्रे भाष्ये॥80॥

ननु 'पूरणगुण' (2.2.11) इति निषेधस्तव्यति स्यात्। 'दिव औत्' (7.1.84) इत्त्यौत्त्वं दिवेः क्विप्यति स्यात्। तथा 'यतोऽनावः' (6.1.213) इति स्वरो ण्यत्यपि स्यात्। 'ऋदृशोऽङि गुणः' (7.4.

16) इति चङ्यपि स्यात् अतः आह-

निरनुबन्धकग्रहणे न सानुबन्धकस्य॥81॥

तदनुबन्धकग्रहणे नातदनुबन्धकस्य॥82॥

चङ्यपिस्यादिति। ननु दशे[1]ख्यवहित चङ् परत्वस्यैवासंभवा[2]त्कथं दोषोपन्यासः। न च प्रकृति[3]ग्रहणेण्यधिकस्यापि ग्रहणात्तत्वम्[4]। तस्याः[5] कुत्व[6] मात्रविषयकत्वस्याकरारुढत्वात्[7] इति चेन्न[8]। **ऋदृशोऽङि** गुणः[9] इत्यत्रतोऽङित्यनु[10]वर्तमाने इकारस्याकार विधायकश्चापत्तेरित्यनेनाश्च-दित्यत्राकार प्रवृत्तिवद् विभाषा[11]धेट्श्चोरिति विहित चङ्यपि स्यादित्याशयात्। अङ्[12]तुज्दस्तंभ्वित्यनेन बोध्यः। अयमाश[13]यस्तु ऋदृशोऽङिः[14] इति गुणश्चङ्[15]यपि स्यादित्यनुक्त्वा[16] ऋदृशोऽङिगुणः इति चङ्यपि स्यादिति वदता मूल[17]कृतैवबोधित इति बोध्यम्॥81-82॥

---

1. पाठोऽयं प-2, अ-4; ननुदन्नोख्यवहित अ-1, अ-3, ज-2.
2. असंभावात् अ73.
3. प्रकृतिस्वैग्रहणेण्याध्यि अ-3.
4. ग्रहणत्वम् प-2, अ-4.
5. पाठोऽयं प-1, प-2, अ-3, अ-4;
6. कुत्रमात्र अ-4; कुत्वमात्रा ज-2.
7. करारूठत्वात् प-1, प-2, अ-3.
8. चेन्नः प-2.
9. सं. पाठः 7.4.17 अष्टा.
10. इत्यतोऽङित्यनुवर्त्यमाने प-1; इत्यतोत्रङित्य अ-4.
11. विभाषायेटश्चोरिति ज-2; प-2, अ-4.
12. आङ्तुजदस्तं प-1; अङ् तुन्दस्तं ज-2; अङ्तुज्हस्तं अ-4, प-2.
13. अयमाशयास्तु अ-4.
14. 7.4.16 अष्टा.
16. 'ण' नाऽस्ति अ-4, अनुक्त्या प-1.
17. मूलकृतीवबोधिधित इति प-2.

'वामदेवाड्ड्यड्डयौ' (4.2.9) इति सूत्रे डयडयतोडित्वमनयोर्ज्ञापकम्। तद्धि- ययतोश्चातदर्थे (6.2.156) इत्यत्र तयोरग्रहणार्थम्। न ञः परस्य ययदन्तस्योत्तरपदस्यान्त उदात्त इति तदर्थः। एवं च अवामदेव्येऽव्ययपूर्वपदप्रकृतिस्वर एव भवति। तन्मात्रानुबन्धकग्रहणे स चान्यश्चानुबन्धो यस्य तद्ग्रहणं नेत्यन्त्यार्थः। एते च प्रत्ययाप्रत्ययसाधारणे, 'दिव औत्' (7.1.84) इत्यादौ

अनाश्रयणस्योक्तत्वादिति। अन्यैरिति शेषः। अत एवा[1]रुचेराह। किञ्च **षत्वतुकोरिति। साकल्येन परिगणिता[2] इतीति।** ननु अवङ्स्फोटाय[3]नस्येति सूत्रे गवाग्रमिति प्रतीक[4]मादायसन्निपातपरिभाषाया अनित्यत्वा द्दीर्घेति[5] बोध्यमिति शेखरस्थ[6] समाधिरंज तस्त्रीलिङ्गेमत्यामिति प्रतीकमुपादाय सन्निपातपरिभाषाया अनित्यत्वाद्यणिति[7] तत्रत्य समाधिश्य भाष्यविरुद्ध[8] इति चेन्न। शाच्छोरिति[9] सूत्रस्थ गवाक्षः[10] संशितव्रत[11] इति भाष्यप्रयोगान्नद्-यांमतुविति[12] सूत्रनिर्देशाच्च नित्यत्वेन तदप्रवृत्तिरित्या[13]शयात्॥85॥

---

1. एवारुचोराह अ-4; एवबारुचेकिं च अ-3.
2. परिगाणिता अ-4.
3. सं. पाठः- 3.1.123 अष्टा.
4. प्रतिकम् प-2.
5. दोर्घेति प-1, अ-4.
6. समाधिरंजतस्त्रील्लिंगे अ-3; समाधिरजंते अ-4.
7. अनित्यत्वाद्याणिति तत्र समाधिश्च अ-4.
8. भाष्यवित्ध अ-3.
9. शाच्छोरन्यतरस्याम् 7.4.41; पाठोऽयं अ-4; शाछोरिति अ-1, ज-2, प-1; शोछोरिति प-2; शछो अ-3.
10. गवाक्षाः प-1; गवाक्ष्यः ज-2.
11. वृत प-1.
12. अनुविति प-1.
13. 'प्र' नाऽस्ति प-1.

सञ्चारितत्वात्। वर्णग्रहणे चानयोरप्रवृत्तिरिति स्पष्टम् 'औङ आपः' (7.1.18) इत्यत्र भाष्ये। येनानुबन्धेन सानुबन्धकत्वं द्व्यनुबन्धकत्वादि वा तदनुच्चारण एवैषा धर्मिग्राहकमानात्। तेन 'जश्शसोः' (7.1.20) इत्यत्र नैषेति निरनुबन्धकतवात् तद्धितशंस एवात्र ग्रहणं स्यादिति न शङ्क्यम्। एवमन्त्यान्यतरानुबन्धाच्चारण एव। तेन 'बनोर च' (7.1.7) इत्यादौ ङ्वनिप्क्वनिपोर्ग्रहणसिद्धिः। एकानुबन्धग्रहणे सम्भवतीति त्वर्थो न भाष्यादिसम्मत इत्यन्यत्र विस्तरः॥81-82॥

ननु कुटीर इत्यादौ स्वार्थिकत्वात् स्वार्थिकानां प्रकृतियो लिङ्गवचनानुवृत्तेर्न्यायप्राप्तत्वात् पुंस्वानुपपत्तिरप्कल्पमित्यत्र नपुंसकत्वैकवचनयोरनुपपत्तिश्चेत्यत आह-

क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गिवचनान्यतिवर्त्तन्ते॥83॥

'णचः स्त्रियाम्' (5.4.14) इति सूत्रे स्त्रियामित्युक्तिरस्या ज्ञापिका। अन्यथा कर्मव्यतिहारे णच् स्त्रियाम् (3.3.43) इति स्त्रियामेव विधानात् किं तेन? स्पष्टा चेयं बहुज् विधायके भाष्ये॥83॥

ननु सुपथी नगरीति 'युवोरनाकौ' (7.1.1) इति सूत्रभाष्योदाहृत 'इनः स्त्रियाम्'। (5.4.152) इति कप् स्यादत आह-

समासान्तविधिरनित्यः॥84॥

'प्रतेरंश्वादयस्तत्पुरुषे' (6.2.193) इत्यन्तोदात्तत्वायांश्वादिषु राजन् शब्दपाठोऽस्या ज्ञापकः। अन्यथा टचैवान्तोदात्तत्वे सिद्धे किं तेन? 'द्वित्रिभ्यां पाद्दन्मूर्द्धसु' (6.2.196) इति स्वरविधायके भाष्ये स्पष्टेयम्॥84॥

ननु शतानीत्यादौ नुमि कृते षट्संज्ञा प्राप्नोति, ततश्च लुक् स्यात्तथोपादास्तेत्यत्रात्त्वे कृते 'स्थाध्वोरिच्च' (1.2.17) इतीत्त्वं प्राप्नोत्यत आह-

सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य॥85॥

सन्निपातो द्वयोः सम्बन्धस्तन्निमित्तो विधिस्तं सन्निपातं यो विहन्ति तस्याऽनिमित्तम्। उपजीव्यतिरोधस्यायुक्तत्वमिति न्यायमूलैषा। अत एवात्र सन्निपातशब्देन न पूर्वपरयोः सम्बन्ध एव, किन्तु विशेष्यविशेषण सन्निपातोऽपि गृह्यते। अत एव ग्रामणि कुलमित्यादौ नपुंसकह्रस्वत्वेऽपि 'ह्रस्वस्य पिति कृति' (6.1.71) इति तुग्न। प्रातिपदिकाजन्तत्व-सन्निपातेन जातस्य ह्रस्वस्य तद्विधातकत्वात्। तुक्यजन्तत्वविधातः स्पष्ट एव। न चार्थाश्रयत्वेन ह्रस्वस्य बहिरङ्गतयाऽसिद्धत्वम्। अर्थकृतबहिरङ्गत्वानाश्रयणस्योक्तत्वात्। किञ्च षत्वतुकोरसिद्धः (6. 1.86) इत्वेतद्बलाकृतितुग्ग्रहणाच्च तुग्विधौ बहिरङ्ग परिभाषाया

पञ्चेन्द्राण्य इति। ननु किं नाम सन्नियोगशिष्टत्वम्। न[1] तावदनेक-स्यैकविधिविधेयत्वम्। पुंयोगा[2]दाख्यायामित्यनेन ङीषि[3] सिद्धे आनुक्[4] मात्रस्य इंद्रादिभ्यः[5] षट्भ्यो विधानेनातत्वाभावात् प्रकृतोदाहरणेऽव्याप्तेः। इंद्राणीशब्दघटके कारा[6]दिष्वतिव्याप्तेर्नस्वबाधकवर्णसमुदायघटकत्वं[7] संबंधेन पुंयोगाद्यर्थ बोधकत्वं[8] तत्। न च पुयांगाद्यर्थे शास्त्र[9]तात्पर्य विषयी[10]भूतसाधुत्व-

---

1. नत्त्वाव देनेकस्यैक अ-4.
2. 4.1.48 अष्टा.
3. ङीप सिद्धि अ-4.
4. अनुक् प-2.
5. इद्राभ्यः अ-3.
6. घटकेकारादिष्यते प-1.
7. घटकत्वे संबंधे प्रयोगाद्य प-2; 'न' नाऽस्ति प-1; समवायघटकत्वसंबंधेन 'इति पाठः' अ-4.
8. 'क' नाऽस्ति प-1; बाधकत्वं तत् अ-4.
9. तात्यर्थ प-1.
10. विषयभूतसाधुत्वबोधक अ-4; 'त' नाऽस्ति प-1.

बोधक[1]वाक्यकल्पकत्वं तत्वमिति[2]वाच्यम्। वाक्यं[3] च इंद्राणी शब्दे ङीषानुकौ साधु इत्याकारकम्। विधेययो: पृथक्सूत्राभ्यां विधेय[4]तया तादृश वाक्य[5]स्यैवाभावात्। किंतु सूत्रद्वये पृथग्वाक्य कल्पनैव[6] सा च पुंयोगात्धेतो:[7] प्रवृत्तिनिमित्तारोपेण[8] स्त्रियां वर्तमानात्[9] प्रातिपदिकात्[10] ङीष्[11] साधु: इंद्र शब्दादानुक् च साधुरित्याकारिका। न च केवलमिंद्रीत्यस्य[12] केवल[13] मिंद्रानित्यस्य[14] वा साधुत्वे लोके तावन्मात्रस्य[15] प्रयोग:[16] स्यादिति वाच्यम्। ब्राह्मणीत्यादिवदिं[17]द्राणीत्यादेरपि सिद्धाविंद्री[18]त्यादि प्रयोग[19] व्यावर्त

---

1. पाठोऽयं ज-2, अ-4; बोधाक अ-1, प-1, प-2, अ-3.
2. 'तत्त्वं' नाऽस्ति अ-4.
3. पाठोऽयं प-1, प-2, अ-4; क्यंवोच इंद्राणी अ-1; वाक्यं नाऽस्ति च इंद्राणी ज-2: वयंवाच इंद्राणी अ-3.
4. निधेयतया प-2; विधेविधेयतया अ-4.
5. वाक्यस्यैवाभावाभावात् प-2.
6. कल्पैनेव अ-3.
7. पुंयोगात्धतो: अ-3.
8. आरोपेन प-1.
9. 'मा' नाऽस्ति.
10. प्रतिपदिकात्तु अ-3, ज-2.
11. ङीप् अ-3, ज-2, अ-4; ङीष् साध: प-1, प-2.
12. पाठोऽयं प-1; न च केचलप्रिदीत्यस्य अ-1; ज-2, अ-3; केवलमिदि्दत्यस्य प-2 न च नाऽस्ति केवलमिंदीत्यस्य अ-4.
13. केवलमिद्रा ज-2, अ-3; केवलमिद्रादि अ-4.
14. नेत्यस्य अ-4; नित्यस्य वाधौ साधुत्वे अ-4.
15. मात्रस्य प-2.
16. 'ग' नाऽस्ति अ-4.
17. ब्राह्मणीदिवदिंदा प-2; ब्राह्मणीदिव द्विद्राणीत्यादेरपि प-1.
18. पाठोऽयं ज-2, अ-3; सिद्धिविंद्रीत्यादि अ-1; सित्धात्विद्रात्यादि प-1, प-2; सिद्धविंद्रादिनित्यस्यवाधौत्यादिप्रयोगव्यावर्त्तकेंद्रवासनेति पाठ अ-4.
19. प्रयोग प-2; पयोग अ-4.

केंद्रवरुणेति। सूत्रवैय्यर्थ्यापत्या ता[1]दृशप्रयोगस्य लोके कल्पयितुम-

शक्यत्वात्। ॠन्नेभ्य[2] इति ङीपि इंद्राणीत्यस्यैव प्राप्तेरिंद्रानित्यस्य[3] सिद्धिः सूत्रफलमित्यपि वक्तु[4]मशक्यम्। किं च न साधुत्वमात्रं लौकिक[5] प्रयोगे हेतुःकिंत्वप्रवृत्ति नित्यविध्युद्देश्यतावच्छेदकानाक्रांत[6]त्वरुपं परिनिष्टित्वमपि अत एव शब्द दर्दुरं करोतीत्यादौ[7] कल्प्यसाधुत्वबोधकवाक्ये न शब्द इत्यादिभ्यष्टगादीना[8] साधुत्वबोधनेपि न तावन्मात्रस्य प्रयोगः[9] अपि च पूर्वोक्तलक्षणेऽर्थांतर्भावेन औत्व[10] निषेधः साकच्कस्य[11] वा वक्तव्यः साधुत्वमिति[12] वार्त्तिकबोधितप्रतिषेधोत्वयोः संनियोग शिष्टत्वानापत्याव्याप्तेश्च। उभाभ्यामेककालावच्छेदेन लक्ष्यभेदेगुण[13]वृद्धि प्रवर्तनात्तत्राति व्याप्तेरर्थांतर[14]भाव मनिवेश्यैककालावच्छेदेनतत्कल्पकत्वं[15] तत्त्वमिति तु दत्तजलांजलिः। न च शास्त्रतात्पर्य विषयी[16]भूतसाधुत्वबोधकवाक्यजन्य प्रतीति[17] विषययोरेक-क्रियान्वयित्वं तत्वमितिवाच्यम्। तृतीयलक्षणदूषणग्रहेणैवनिरस्तत्वात्। किं

---

1. वैयर्ध्यतादृश तादृश अ-3; 'ता' नाऽस्ति अ-4.
2. ॠत्तेभ्य इति अ-3.
3. प्राप्तेरिंद्रानित्यस्यैवा प्राप्तेंद्रा नित्यस्य द्विसूत्रम् इति पाठः अ-4.
4. वक्तुमश्यक्याम् प-2; वक्तुमश्यवा किं च अ-3; वक्तुमश्यक्य ज-2.
5. लौकिकमात्रप्रयोगे प-1; लौकिका प्रयोगे अ-3.
6. क्रांततत्त्व प-1; क्रौततत्त्व प-2.
7. करीत्यादौ अ-3.
8. पाठोऽयं प-1, प-2 इत्यादिभ्ययुगादीनां अ-1, ज-2, अ-3.
9. प्रयोगाः अ-3.
10. ओत्वनिषेधः अ-3, ज-2; औत्वप्रतिषेधः अ-4.
11. साककस्य वावक्तव्यः ज-2 प्राकच्कस्य वाचक्तव्यः अ-4.
12. सादुत्वमिति ज-2; साधुत्तमिति अ-3.
13. भेद प-1.
14. अर्थान्तरभविमनिवेश्येक अ-3.
15. तत्वेतत्वमिति प-2; तत्कल्पंकत्त्वं अ-3.
16. विषयाभूत अ-4.
17. प्रतीतिविषन्ययोरेक अ-3.

च तत्रापि[1] एकक्रियान्वयित्वमित्यस्य[2] समाना[3]नुपूर्वोक्ततिङन्तवाच्य क्रियान्वयित्वमित्यर्थः। उत्तैक तिङन्तवाच्यक्रियान्वयित्वं वा नाद्यः।

गुणवृद्धयादा[4]वतिव्याप्तेः। नापि द्वितीयः दोषस्य[5] स्पष्टतया प्रकाश[6]-मानत्वात्। ननु लक्ष्यानुसाराद् विहितस्यापि ङीषः[7] पुनर्विधानं स्वीक्रियत्[8] इति चेन्न। विहितस्य पुनर्विधाने[9] नियमापत्तेः। पुंयोगादित्याति[10]रिक्तयोगविभाग वैय्यर्थ्यापातात्[11]। न च पूर्वोक्तविभक्त[12]सूत्रवैय्यर्थ्यान्न नियम इति वाच्यम्। आनुक्[13] मात्रमिंद्रादिभ्यः षङ्भ्योविधीयत इति स्वपरग्रन्थविरोधात्। ऋन्नेभ्य[14] इत्यनेन ङीपि सिद्धे वनोरचेत्यनेन[15] रादेशमात्रविधानाद[16] व्याप्तेः

1. तमापि प-2; तत्रावि अ-4.
2. पाठोऽयं प-1, प-2, अ-4 इत्यस्या अ-1, ज-2, अ-3.
3. समानरनुपूर्वोक अ-4.
4. वृध्यादावति अ-4; वृत्धादावति अ-3.
5. 'स्य' नाऽस्ति प-2.
6. प्रकाशमात्वात् प-1; प्रकशमनत्वात् अ-4.
7. 'षः' नाऽस्ति प-2.
8. 'स्व' क्रियत अ-4.
9. विधानो अ-3.
10. पुंयोगादियदित्यतियोग प-1 पुंयोगादित्यतिरिक्त प-2, अ-4; पुयोगादितयादिरिक्त अ-3; पुंयोगादित्त्यात्तेरिक्त ज-2.
11. वैयर्थ्यातत् अ-3.
12. पूर्वोक्तसूत्र अ-4; 'वि' नाऽस्ति अ-3.
13. पाठोऽयं प-2, अ-4; अनुक्रमात्र अ-1, ज-2, अ-3, प-1.
14. ऋत्वेभ्य अ-3; सृन्नेभ्य अ-4.
15. वनोरच 4.1.7; वसोरचोत्यनेन अ-4.
16. 'द' नाऽस्ति प-1.

अप्रवृत्तेः।

सर्वविधसन्निपातग्रहणादेव वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यादित्येतत्परिभाषादोषनिरूपणावसरे वार्त्तिककृतोक्तम्। नहि प्रत्ययःपूर्वपरसन्निपातनिमित्तकः स एव च सन्निपातशब्देन गृह्यत इति मत्वा न प्रत्ययः सन्निपातनिमित्तक इति शङ्कायां तदभ्युपेत्यैवाङ्गसंज्ञा तर्ह्यनिमित्तं स्यादित्येकदेशिनोक्त मिति न तद्भाष्यविरोधः।

किञ्चैवं शैवो गार्ग्यो वैनतेय इत्यादावपि अङ्गसंज्ञाया लोपनिमित्तत्वानापत्त्या वर्णाश्रय इत्यस्य वैयर्थ्यम्। ग्रामणिकुलं ग्रामणिपुत्र

पूर्व[1]सूत्रेणेंद्रादिभ्यो ङीषि[2] सिद्धेपि हिमादिभ्यो ङीष्[3] विधानार्थं तदनुवृत्तेरावश्यकतया[4] प्रथमलक्षणमव्याहतमिति शंकापि[5] निरस्ता[6]। तल्लक्ष्यं तु पंचभिर्धीवरीभिः क्रोतेत्यर्थे आर्हीयष्ट[7]कतस्याध्यर्घेति लुकीति पंचधीवेति[8] बोध्यम्। एवं सन्नियोग शिष्टत्व[9] वैय्याकरणानां दुर्वच[10]मेवेति प्राप्ते साधारणानुसरणिमनुसृत्य[11] ब्रूमः। इंद्रादिभ्यो[12] ङीष् सिद्धे र्विना वाक्यार्थबोध मवक्तव्यत्वेना प्रामाण्यज्ञानानास्कंदितशाब्दबोधस्यैव कार्यजनकतया सर्वांशे

---

1. पूर्व अ-3 एव ज-2.
2. ङीपि अ-3, अ-4.
3. ङीप् अ-3, अ-4, ज-2.
4. आवश्यक त्तमाप्रथमलक्षणं अ-3.
5. पाठोऽयं प-2, अ-4; शंकारिपि अ-1, प-1, अ-3; शंकपि ज-2.
6. 'र' नाऽस्ति अ-4.
7. आहोयष्टक् प-2; आर्हीष्टक् प-1; आर्हीयष्टस्याध्यर्धेति अ-3; अहोयष्टक् अ-4.
8. पंचविधीवेति अ-3; पंचधावेति अ-4.
9. शिष्टत्वे प-2; विशिष्टत्वम् प-1.
10. दुर्वचनमेवेति प-1.
11. अनुसरणिमनुसत्य अ-4; अनुसरयणिमनुसृत्य अ-3, ज-2.
12. इंद्रादि ङीप् अ-4.

लक्ष्यासंस्कारकसूत्रो[1]पातेभ्य इंद्रादिभ्यो ङीषानुकौस्त इति महावाक्यार्थबोध स्य[2] प्रत्येको[3]द्देश्यक ङीषानुग्विधेयकाचांतरवाक्यार्थबोधस्य वावश्यं वक्तव्य-तया तद्बोधोत्तरमिंद्रादिभ्यो ङीषः[4] सिद्धत्वज्ञानेन तदंशे तस्य विधेयत्वाभाव निश्चायकावांतरलक्ष्यसंस्कारकेंद्रादिभ्य आनुक्[5] इति वाक्यार्थ बोधे[6] अन्येभ्यस्तूभयमित्यवांतरलक्ष्यसंस्कारकद्वितीयवाक्यार्थबोधे च जायमाने लक्ष्य-संस्कारकानुङ्मात्रविधायके अनेकस्यैक विधिविधेयत्वा[7]भाव निश्चयेपि लक्ष्याऽसंस्कारक[8]पूर्वकालिक[9] वाक्यार्थ बोधीय[10] तत्त्वमादाय परिभाषाप्रवृत्तेर्नि-बोधत्वात्[11]। दृष्टा चेयं रीति[12]र्जमङणनमित्यत्र भाष्ये हलंत्यं सूत्रे शेखरादौ च। तत्राद्ये[13] मकारानुबंधाभावे ङमोह्रस्वादचि[14] ङमुण्नित्यमितिन्यासमभ्युपगम्य झकार[15]भकारयो झुट् भुटौ पदांते तयोरभावेन दूरीकृत्य एवमपि पंच आगमास्त्रय आगमिन[16] इति वैषम्यात्-संख्यात्तानुदेशाभावशंकायां

1. पाठोऽयं प-1, प-2; सूत्रोपातोभ्य अ-3; सूत्रोपातीय ज-2; सूत्रोपतेभ्य अ-4.
2. 'स्य' नाऽस्ति प-1.
3. प्रत्येकोद्देश्यक ङीपः सिद्धत्वज्ञानेन इति पाठोपलभ्यते अ-4 मातृकायाम्.
4. ङीपः अ-3.
5. अनुक् प-1, प-2, अ-4.
6. बोधि अ-3.
7. विधिविधेयेयत्वाभाव अ-3.
8. 'ऽ' नाऽस्ति अ-3, अ-4, प-1.
9. पूर्वेकालिकलिक अ-4.
10. बोधियम् प-1.
11. पाठोऽयं ज-2, प-1, प-2; निर्बाधत्वात् अ-1, अ-3, अ-4.
12. रितिन प-1.
13. तत्रद्ये अ-3.
14. सं. पाठः 8.3.32 अष्टा.; पाठोऽयं प-1.
15. पाठोऽयं प-1; सकारभकायोर्त्सदभुठोपदांते अ-1; सकारमकारयो सर्दभुटौपदांते ज-2, अ-3; सकारयोर्सुद्भुठोपदांते प-2; उपगम्य ककाभाकारया यट् भुटौ पदांतेक्यार्भावेन अ-4.
16. अगमिन प-1.

सर्वा[1]शेलक्ष्याऽसंस्कारक[2] महावाक्यार्थबोधीय[3] संख्यासाम्यमादाय[4] सूत्र प्रवृत्तिरित्यर्थकं संतु तावद्ये[5]षामागमानामागमिनः संतिसकार[6] भकारौ[7] पदांतौ नस्य इति कृत्वा तावपि न भविष्यत इत्युक्तं स्पष्टश्चायं अर्थो लक्ष्यसंस्कार-कालिकं संख्या[8]साम्यं यथासंख्यप्रवृत्तौ निमित्तमितिमन्यते पूर्वपक्षीसिद्धांती तु प्रतिपत्तिकालिकमेव संख्यासाम्यं तत्प्रवृत्तौ निमित्तमित्याह संत्वितीत्यादिना विवरणे। एव[9] तत् सूत्रे शेखरादौ च। द्वितीयेपि उत्सर्गशास्त्रीय[10] लक्ष्य-संस्कारकवाक्यार्थ बोधात्पूर्वमपवादालक्ष्याऽसंस्कारकाः[11] बुध्यारुढाभवंति[12] लक्ष्याऽसंस्कारक वाक्यार्थबोधादनंतर[14] लक्ष्यसंस्कारकोत्सर्गशास्त्रप्रवृत्तिरित्यर्थक पूर्वं हि अपवादा अभीति परिभाषाया विषय प्रदर्शनं कृत[15]मित्यलं पल्लवितेनेति[16] दिक्। एवमन्यत्राप्यूह्यम्।

---

1. सर्वाशे प-2.
2. लक्ष्याः संस्कारक अ-3.
3. बोधोयम् प-1; बोधायं अ-4; बोधीये ज-2.
4. संख्यागम्यमादाय प-1.
5. तावद्येषमागमा नामानामागमिनः अ-3; तावाद्येषा अ-4.
6. संतिक्षकार ज-2; संतित्सकार अ-3.
7. भकारादौ अ-4.
8. संख्यागम्य प-1.
9. एवेतत्सूत्रे प-1.
10. उत्सर्गशास्त्रोपलक्ष्य ज-2; शास्त्रियलक्ष्य प-2; परज्ञत्रोपलक्ष्य प-1; उत्सर्गशास्त्रीय इत्यारभ्य लक्ष्यसंस्कारकोत्सर्ग इत्यन्तं अ-4 मातृकायां नाऽस्ति।
11. असंस्कारकानथ्यारूढा ज-2.
12. भवती प-1.
13. बोधनं परलक्ष्य प-1; बोध्यादनंतरं प-2.
14. 'हि' नाऽस्ति प-1.
15. 'कृतम्' नाऽस्ति अ-4.
16. 'ति' नाऽस्ति अ-4.

इत्यादावुत्तरपदनिमित्तके ह्रस्वत्वे यथाकथञ्चिद्बहिरङ्गपरिभाषयापि वारणं सम्भवतीति 'कृन्मेजन्तः' (1.1.39) इत्यत्र 'ह्रस्वस्य पिति' (6.1.71) इति सूत्रे चैकदेशिना तथा परिभाषया तुग्वारितो भाष्ये। अत एव परिभाषाफलत्वेनेदमुक्तं 'कृन्मेजन्तः' इतिसूत्रे वार्त्तिककृतेति केचित्।

सन्निपातलक्षणविधित्वमस्या लिङ्गम्। स्वप्रवृत्तेः प्राक् स्वनिमित्तभूतो यः सन्निपातस्तद्विधातकस्य स्वातिरिक्तशास्त्रस्य स्वयमनिमित्तमिति फलति।

नन्वेवं रामायेत्यादौ 'सुपि च' (7.3.102) इति दीर्घानापत्तिः।

इडविडेति। इड विडोऽपत्यं जनपदेत्यञि अतश्चेति[1] स्त्रियां लुक्। परिभाषानित्यत्व फलं बिल्वकादि[2] सूत्रोक्तं कैय्यटीयमन्यथा साधयति। **एनेय इत्यादिना[3]। स्थानिवदति।** अच[4] परेत्यस्य तंत्रादिना[5] पूर्वस्य स्थितौ कर्तव्यायां[6] स्थानिवदिति द्वितीयार्थस्यापि न[7] पदांतसूत्रीयलुकालुप्तं न स्थानिवदित्यस्य पंचेंद्र इत्युदाहरणपरभाष्येण बोधनादितिभावः। अन्यथा स्थानिवद्भावाप्राप्तेस्तदुदाहरणासंगतेः। स्पष्टश्चायमर्थः। स्थानिवत्सूत्रशेखर विवरणा[8]दावित्यलम्॥86॥

---

1. अतश्च 4.1.177.
2. बिल्वादिभ्योऽण् 4.3.136.
3. एतेय इत्यादिनम् अ-3; ऐतेनेय अ-4.
4. अचः प-1; अचः पत्येत्यस्य अ-4; अचः परस्मिपूर्वाविधौ 1.1.17.
5. तंत्रादिनाम् अ-3; तंत्रादिनां अ-4.
6. कर्त्तव्याप्य प-1, प-2; कर्त्तव्याम् अ-4.
7. न पदान्त द्विर्वचनवरेयलोपस्वर सवर्णऽनुस्वारदीर्घ जश्चविधिषु 1.1.58 अष्टा.
8. विवरणदावित्फलम् प-1.

अदन्ताङ्गङेसन्निपातेन जातस्य यादेशस्य तदविधातकत्वात्। न च यनादित्वसापेक्षदीर्घस्य बहिरङ्गतयाऽसिद्धत्वान्नात्र सन्निपातविधात इति वाच्यम्। आरोपितासिद्धत्वेऽपि वस्तुतस्तद्विधातस्य जायमानत्वेनै-तत्प्रवृत्तेः।

किञ्चान्तरङ्गे कर्त्तव्ये बहिरङ्गस्यासिद्धत्वेऽपि तत्र कृते तस्यासिद्धत्वे मानाभावः। किञ्च आतिदेशिकसन्निपातविधाताभाव-मादायैतदप्रवृत्तौ गौरीत्यादौ सम्बुद्धिलोपेऽपि स्थानिवत्त्वेन ह्रस्वनिमित्त-सन्निपातविधाताभावात्तत्रैतस्यातिव्याप्तिपर, 'कृन्मेजन्तः' (1.1.39) इति सूत्रस्थभाष्यासङ्गतिः। सन्निपातस्य अशास्त्रीयत्वान्नात्र स्थानिवत्त्व-मिति चेत्? तर्हि अत्रासिद्धत्वमपि कथमिति विभावय।

अशास्त्रोयेऽसिद्धत्वाप्रवृत्तेः 'ईदूदेत्' (1.1.11) इतिसूत्रे कैयटेन स्पष्टमुक्तत्वात्। एवं च पूर्वत्रासिद्धीयेऽपि कार्य एतत्परिभाषा-प्रवृत्तिर्भवत्येवेति चेत्? न। 'कष्टाय' (3.1.14) इति निर्देशेनेतस्य अनित्यत्वात्।

ययोः सन्निपातस्य विधातकं शास्त्रे तयोः सन्निपातनिमित्तक-विधावुपादानमपेक्षितमिति तु नाग्रहः। अत एव दाक्षिरित्यत्रा-कारान्तप्रकृतो= सन्निपातनिमित्ताङ्गसंज्ञानया परिभाषयाल्लोपस्य निमित्तं न स्यादित्याशङ्कयानित्यत्वेन समाहित 'कृन्मेजन्तः' (1.1.39) इति सूत्रे भाष्ये। न हि अङ्गसंज्ञायामदन्तस्याङ्ग संज्ञेत्युक्तमस्ति।

न च कुम्भकारेभ्य आधय इत्यादावव्ययसंज्ञाया अनया परिभाषया वारणपरभाष्यासङ्गतिः। अनया परिभाषया लुङ मा भूत्, अव्यय वं तु स्यादेव, लुकाहि तदीयसन्निपातस्य विधातो नाव्ययसंज्ञायाः, संज्ञाफलं त्वकच् स्यादिति वाच्यम्। एतदुदाहरण-परभाष्यप्रामाण्येन साक्षात् परम्परया वा स्वनिमित्तसन्निपातविधातकस्य स्वयमनिमित्तमित्यर्थेनादोषात्। एतेनात्राकच् स्यादित्य पास्तम्। न च कार्यकालपक्षे लुगेकवाक्यतापन्नसंज्ञाबाधेऽप्यकजेकवाक्य तापन्ना संज्ञा

स्यादिति वाच्यम्, अन्तरङ्गायां तदेकवाक्यतापन्नसंज्ञायां बहिरङ्ग-गुणादेरसिद्धत्वात्। लुगेकवाक्यतापन्ना तु न गुणादितोऽन्तरङ्गा, उभयोरपि शब्दतः सुबाश्रययत्वात्।

'न यासयोः' (7.3.45) इति निर्देशाच्चैधानित्या। तेन नातिप्रसङ्गः। स्पष्टा चेयं 'कृन्मेजन्तः' (1.1.39) इति सूत्रे भाष्ये। अस्या अनित्यत्वे फलानि भाष्ये परिणगितानि। वर्गाश्रयः प्रत्ययो वर्गविचालस्यानिमित्तम्– दाक्षिः। आत्त्वं पुग्विधे- क्रापयति। पुग् ह्रस्वत्वस्यअदीदपत्। त्वदाद्यकारष्टाब्विधेः- या, सेति। इड्विधि राकारलोपस्यपतिवान्। 'ह्रस्वनुद्दभ्यां मतुप्' (6.1.176) 'अन्तोदात्ता-दुत्तरपदात्' (6.1.169) इतिमलुबविभक्त्युदात्तस्वं पूर्वनिघातस्य-अग्निमान्, परमवाचा। नदीह्रस्वत्वं सम्बुद्धिलोपस्य नदि, कुमारीत्यादि। यादेशो दीर्घत्वस्यकष्टाय। इतोऽन्यत्र प्रवृत्तिरेव, दोषाः खल्वपि साकल्येन परिगणिता इति भाष्योक्तोरित्यन्यत्र विस्तरः॥85॥

ननु पञ्चेन्द्राग्यो देवता अस्य पञ्चेन्द्र इत्यादौ 'द्विगोर्लुक्' (4.1.88) इत्यणी लुकि 'लुक्द्धित' (1.1.49) इति स्त्रीप्रत्ययलुक्यानुकः श्रवणापत्तिरत आह–

सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यपायः॥86॥

अत्र च 'बिल्वकादिभ्यश्छस्य लुक्' (6.4.153) इति सूत्रर्स्थ छग्रहणं ज्ञापकम्। तद्धि छमत्रिस्य लुग्बोधनद्वारा कुको निवृत्तिर्यथा स्यादित्येतदर्थम्। कृतकुगागमा नडाद्यन्तर्गतबिल्वादय एव तत्र निर्दिष्टा बिल्वकादिशब्देन। न चैवमपि छग्रहणं व्यर्थम्, कृतकुगागमानुवाद-सामर्थ्यादेव तदनिवृत्तिसिद्धेः। अन्यथा 'बिल्वादिभ्य' इत्येव वदेत्, 'लक्षणप्रतिपदोक्त' परिभाषया विल्वादिपुरस्कारेण विहित प्रत्ययस्येव लुग्विधानान्नातिप्रसङ्ग इति वाच्यम्। लतोऽपि प्रतिपदोक्तत्वेन 'बिल्वादिभ्योऽण्' (4.3.136) इति विकाराद्यर्थस्य लुगापत्तिवारणार्थं कुगनुवादचारितार्थ्यात्। समुच्चयार्थकचशब्दयोगे तु विधेययोरेक-कालिकत्वेकदेशत्वनियमान्न्यायसिद्धापीयम्।

यत्तु 'गाविष्ठवत्' इत्यनेन पंवत्त्वविधानमेतदनित्यत्व ज्ञापनार्थम्, अन्यथेत यतोत्यादौ टिलोपेनैव ङीपि निवृत्ते सन्नियोगशिष्टपरिभाषया नास्यापि निवृत्त्येतयतीत्यादिसिद्धौ पुंवत्त्ववैयर्थ्य स्पष्टमेवेति 'टेः' (4.4.155) इति सूत्रे कैयटस्तत्र। इडबिड माचष्ट ऐडबिडयतीत्यादौ पुंवत्त्वस्य आवश्यकत्वात्। ऐनेयः श्यैनेय इत्यादि तु स्थानिवत्त्वेन सिद्धमित्यन्यत्र विस्तरः॥86॥

ननु चुरा शीलमस्याः सा चौरीत्यादौ 'शीलम्' (4.4.61) 'छत्रादिभ्योऽणः' (4.4.62) इति णे ङीष् न प्राप्नोतीत्यत आह-

ताच्छीलिके णेऽण्कृतानि भवन्ति॥87॥

'अन्' (6.4.167) इत्यणि विहितप्रकृतिभावबाधनार्थं 'कार्मस्ताछील्ये' (6.4.172) इति निपातनमस्या ज्ञापकम्। ताच्छीलिकणान्ताद् 'अणो द्वयचः' (4.1.156) इति फिञ्-सिद्धिरप्यस्याः प्रयोजनमिति नव्याः। ताच्छीलिक इत्युक्तेः 'तदस्यां प्रहरणम्' (4.1.57) इति णे दाण्डेत्येव। 'कार्मः' (6.4.172) इति सूत्रे भाष्ये स्पष्टा॥87॥

ननु कंसपरिमृड्भ्यामित्यादौ 'मृजेर्वृद्धिः' दुर्वारित्यत आह-

धातोः कार्ममुच्यमानं तत्प्रत्यये भवति॥88॥

भ्रौणहत्ये तत्वनिपातनमस्या ज्ञापकम्। 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्य विज्ञानम्' इतिपाठस्तु प्रसृड्भिरित्यादौ 'अनुदात्तस्य चर्दुपधस्य' (6.1.59) इत्यमापादेनन भाष्ये दूषितः। यत्कार्यं प्रत्ययनिमित्तकं तत्रेयं व्यवस्थापिका। तेन पदान्तत्वनिबन्धनं 'नशेर्वा' (8.2.63) इति कुत्वं प्रणग्भ्यामित्यादौ भवत्येव। इयङादिविधौ तु नैषा। 'न भूसुधियोः' (6.4.85) इति निषेधेनानित्वात्। 'मृजेर्वृद्धिः' (7.2.114) इत्यत्र भाष्ये स्पष्टा॥88॥

ननु सर्वकउच्चकैरित्यादौ सर्वनामव्ययसंज्ञे न स्यातामत आह-

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते॥89॥

'नेदमदसोरकोः' (7.1.11) इति सूत्रेऽकोरितिनिषेधोऽस्या ज्ञापकः। 'तदेकदेशभूतं तद्ग्रहणेन गृह्यते' इति 'येन विधिः' (6. 1.72) इति सूत्रे भाष्ये पाठः॥89॥

ननु 'गातिस्थाधुपाभूयः' (2.4.72) इति सिचो लुगपासीदित्यादौ पातेरपि स्यादत आह-

लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य॥90॥

अस्याश्च ज्ञापकः 'स्वरतिसृति' (7.2.44) इति सूत्रे सूङिति वक्तव्ये सूतिसूयत्योः पृथङ्निर्देश इति कैयटः। तन्न। साहचर्या-दलुग्विकरणस्यैव ग्रहणे प्राप्ते पृथङ्निर्देशस्य तज्ज्ञापकत्वासम् भवात्। ध्वनिता चेयं परिभाषा 'यस्य विभाषा' (7.2.15) इत्यत्र भाष्ये। तत्र हि विदित इति प्रयोगे निषेधमाशङ्क्य यदुपाधेर्विभाषा तदुपाधेर्निषेधो 'विभाषा गमहनविदविशाम्' (7.2.68) इति सूत्रे शब्विकरणस्य ग्रहणं लुग्विकरणश्चायमित्युक्तम्। तत्र चो हेतौ। यतोऽयं लुग्वि-करणोऽतो विशिसाहचर्याच्छबूविकरणस्य ग्रहणं न तु हनिसाहचर्या-दस्याप्येतत्परिभाषाविरोधादिति तदाशयः।

अत एव परिभाषायां लुग्विकरणस्यैवेति नोक्तम्। कण्ठतस्तु भाष्य एषा क्वापि न पठिता। 'गातिस्था' (2.4.77) इति सूत्रे पिबतेर्ग्रहणं कर्त्तव्यमिति वार्त्तिककृता सर्वत्रैव पाग्रहणेऽलुविकरणस्य ग्रहणमिति भाष्यकृता चोक्तम्। 'स्वर तिसूति' (7.2.44) इति सूत्रे कैयटेन च स्पष्टमुक्ता॥90॥

ननु प्रजिघाययिषतीत्यादौ 'हेरचङि' (7.3.56) इति विधीयमानं कुत्वं न स्यादत आह-

प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम्॥91॥

अचङीति प्रतिषेध एवास्या ज्ञापकः। इयं च कुत्वविषयैव

'हेरचङि' इति सूत्रे भाष्ये स्पष्टेयम्॥91॥

ननु युष्मभ्यमित्यादौ 'भ्यसः' (7.1.30) इत्यत्र भ्यमिति च्छेदे भ्यसो भ्यमि कृतेऽन्त्यलोप एत्वं स्यादत आह-

अङ्गवृत्ते पुनर्वृत्तावविधिः॥92॥

अङ्गेऽङ्गाधिकारे वृत्तं निष्पन्नं यत्कार्यं तस्मिन् सति पुनरन्यस्याङ्गकार्यस्य वृत्तो प्रवृत्तावविधानं भवतीत्यर्थः। एषा च 'ज्यादादीयसः' (6.4.160) इत्याद्विधानेन ज्ञापिता। अन्यथा इकारलोपेन

नन्वेवमपि[1] **ज्ञाज[2]नोर्जा** इति जादेश[3] विधानेनैकांगसंवंधित्वरुपसमानस्थानिकत्वे एवैतत्प्रवृत्याप्रकृतेभ्यमेत्वयो[4]स्तत्वा[5]भावेनैत्वावारणाद आह। **अत एव भिन्नेति[6]** अस्मात् आद्‌विधानात् ज्ञापकादेवेत्यर्थः। एतेन[7] अंगस्य यत्कार्यं तद्‌विषयिणो[8] वयमिति प्राचीनमतदूषक[9]मनोरमाव्याख्यापक[10]-सामान्यप्रवृत्तिस्वीकारक[11]शब्दरत्नादिविरोध इत्यपास्तम्[12]॥92॥

---

1. न चेवपि प-1, प-2.
2. ज्ञजनोजी अ-3; सं पाठः 7.3.79 अष्टा.
3. जादेशे विधानेकांग अ-4.
4. प्रकृतेभ्यम् रात्वयोस्य अ-4; प्रकृतेभ्यमेत्वेयोः प-2.
5. तुत्वाभावेन ज-2.
6. एवामित्रेति ज-2; एवमिनेति प-1; एवमिति अ-4.
7. एन अंगस्य प-2.
8. तद्‌विधयिग्वेवयमिति प-1; तद्‌विषयिग्येवेयमिति प-2; तद्‌विषयिग्येवयमिति अ-3.
9. हृषक प-2; दूश्क अ-3.
10. मनोरमा व्याख्या व्यक्तसामान्य ज-2, अ-3; मनोरमा न विशेषणेष्विति समुदाय इति पाठः अ-4 मातृकायाम्.
11. 'क' नाऽस्ति अ-3.
12. इत्यापास्तम् प-1.

'अकृत्सार्व' (7.4.25) इति दीर्घेण च सिद्धे तद्वैयर्थ्यं स्पष्टमेव। अत एव भिन्न स्थानिकाङ्गकार्यविषयाप्येषा। इयं चअनित्या, 'द्वयोः' (1.2.59; 5.3.92) इति निर्देशात्। अनित्यत्वबललभ्यार्थमादायैव 'भ्यसोभ्यम्' (7.1.30) इति सूत्रे निष्ठितस्येति पठितम्।

केचित्तु अनया परिभाषया न किञ्चिल्लक्ष्यं साध्यते। अत एव 'ज्ञाजनोर्जा' (7.3.79) 'ज्यादादीयसः' (6.4.160) इति सूत्रयोरेनां ज्ञापयित्वा किं प्रयोजनम् इति प्रश्ने बितैर्गुणप्रतिषेध उक्तः, स न वक्तव्य इत्येव प्रयोजन मुक्तं न तु लक्ष्यसिद्धिरूपम्। तदुक्तम्- 'भ्यसोभ्यम्' इत्यत्राभ्यमितिच्छेदः शेषे लोपश्च अन्त्यलोप एव 'अतो गुणे' (6.1.97) इतिपररूपेण सिद्धे युष्यभ्यमित्यन्यत्र निरूपितम्। एवं च सूत्रद्वयस्थमेतज्ज्ञापनपरं भाष्यं 'भ्यसोऽभ्यम्' इतिसूत्रस्थं च भाष्यमेकदेश्युक्तिरित्याहुः॥92॥

यत्त्वोरोदितिवाच्ये 'ओर्गुणः' (6.4.116) इति गुणग्रहणात्-

संज्ञापूर्वकविधेरनित्यत्वम्॥93॥

इयं च विधेयकोटौ संज्ञापूर्वकत्व एव। तेन स्वायम्भुवमित्यादि सिद्धम्॥92॥

तथानि लोडित्येव सिद्धे आनिग्रहणाद्-

आगमशास्त्रमनित्यम्॥94॥

तेन 'सागरं तर्त्तुकामस्य' इत्यादि सिद्धम्॥94॥

तथा तनादिपाठादेव सिद्धे 'तनादिकृञ्भ्यः' (3.1.79) इतिसूत्रे कृञ्ग्रहणाद्-

तथा चक्षिङो ङित्करणाद्-

अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्।।96।।

तेन 'स्फायन्निर्मोक इत्यादि सिद्धम्' ।।96।।

अनुद्यमानविशेष[1]णोष्विति। समुदाय विशेषणं अचामिति तद्विशेषणमादिरिति[2] ततश्चेक्[3] स्थानिकादिष्टध्यवयकाच्[4] समुदायावयवक-समुदायस्य वृद्ध[5] संज्ञेत्यर्थस्य पर्यवसन्नतया अनूद्यमान विशेषणेत्यस्य यथाश्रुतार्थक[6]त्वे आदेरनूद्यमानविशेषण[7] विशेषणत्वे न तदंशे[8] इक्परिभाषाऽ-प्रवृत्तेरनयावक्तुमशक्यत्वेनानूद्यमानविशेषणे[9]त्यस्यानूद्यमान विशेषण विशेषणेत्यर्थः। **विधेयेनासिद्धतयेति**[10]। विधेयस्या[11] नभिनिर्वृतत्वे न तदंशे परिभाषा सम्बन्धः[12] कर्तुमाशक्य इति भावः[13] **तद्विशेषणे** इति। साक्षाद्विधि विशेषणे इत्यर्थः। यथो श्रुते आदेरपि[14] परम्परयाविधेयविशेषणत्वे नकदंशे परिभाषया अप्रवृत्तिकथनमयुक्तं स्यादिति बोध्यम्। **तद्विशेषणेति।**

---

1. विशेषणन्विति अ-3, ज-2.
2. आदीरिति प-2.
3. ततश्चक अ-3, ज-2.
4. पाठोऽयं प-1, प-2; वृध्यवयवकाच् अ-1, ज-2, अ-3; वृध्यवयव काव्यमुदायवक अ-4.
5. वृत्धेत्यर्थस्य प-1, प-2, वृद्धसंज्ञोत्यत्यर्थवसन्नतया अ-4.
6. श्रुतार्थत्वेजादेरन्द्यमान अ-4; श्रुतार्थकत्वो ज-2, अ-3.
7. 'विशेषण' नाऽस्ति ज-2, अ-3, अ-4.
8. तदंतरो हक प-1; तदर्श प-2; दंशे इक् अ-3.
9. विशेषणेत्त्यस्यात् धमान अ-3.
10. सं. पाइः विधेरसिद्धतयेति अ-1, ज-2, अ-3; असिद्धतर्थेति प-2; असिद्धतथेति प-1.
11. विधेयस्माऽनभिनिवृतित्वेन अ-4.
12. सम् नाऽस्ति प-2.
13. भाषः अ-3.
14. अदेरपि प-1.

तथा विनार्थनञा समासेनानुदात्तं पदमनेकमित्येव सिद्धे

विधेय[1] विशेषणेत्यर्थः। न्यायसिद्धयर्थे ज्ञापकमप्याह[2]। **किन्चेति। भाष्योक्तरीत्येति[3]**। तत्र हि वाराही पुत्रेष्यङ्[4] तस्य सम्प्रसारणं भवति[5]पुत्ररुपे[6] उत्तरपदे इत्यर्थे वकारस्य[7] संप्रसारणं कस्मान्न भवतीत्याशंकायामनंत्य विकार इति परिभाषया निरा[8]कृत्यानंत्येत्यस्याः परिभाषायाः[9] प्रयोजन जिज्ञा[10]सा मल्लोपो न इति सूत्रमुदाहृतम्[11]। अन्यथांगावयवानोऽकारस्य लोप इत्यर्थेऽनस्त[12]क्ष्णेत्या दावाद्याकारस्य लोपः स्यात् ततोऽग्रे भ संज्ञा क्षिप्ता सर्वनामेत्यस्याकारांशे विशेषण[13]तामंगीकृत्य तस्मिन्निति परिभाषया[14]ऽव्य-वहिताकारस्यैव लोपेनाद्याकारे लोपवारणेनैतत् परिभाषायाः प्रयोजनमित्युक्तम्। एवं चानूद्यमानविशेषणविशेषणेपि परिभाषाप्रवृत्तिरुक्तैवेतिभावः। येन नेति[15] न्यायेन नकारव्यवधानं[16] सह्यत इति तत्तात्पर्यम्। स्थाने ग्रहणेन परिभाषायाः

---

1. पाठोऽयं अ-4; विधेयविशेषण विशेषण विशेषणेत्यर्थः अ-1, ज-2, प-1, प-2, अ-3.
2. ज्ञापकमप्यह प-1; ज्ञापकमथाह अ-4.
3. रीत्येति संप्रसारणं कस्मान्न भवति तत्र हि इत्यत्रायं पाठोऽपि प-1 मातृकायां लभ्यते.
4. पुत्रेष्येङ प-2.
5. पाठोऽयं प-1, प-2, अ-4; भविते अ-1; भवित ज-2 अ-3.
6. 'त्र' नाऽस्ति प-1, प-2.
7. पाठोऽयं ज-2, प-1, प-2, अ-3, अ-4; ककार स्य अ-1.
8. निकृत्यानं सेत्यस्याः प-1, प-2, प-2, अ-3, अ-4; ककारस्य अ-1.
9. परिभाषया प-1, अ-4.
10. जिज्ञाषाम् अ-4.
11. सूत्रमुत्यस्ताम् प-1.
12. इत्यैऽनस्तक्ष्णेतया प-2; इत्यर्थेनस्तक्ष्णेत्यादावाद्यकारस्य अ-4.
13. 'विशे' नाऽस्ति अ-3, अ-4.
14. परिभाषाया अ-4.
15. सेल लेति लत्सरसे अ-4.
16. व्यावधानम् प-1.

वर्जग्रहणात्-

नञ्घटितमनित्यम्॥97॥

ज्ञापनेपि नानुवादेत्यस्य यथाश्रुतार्थकत्वेऽत इत्यस्यानुवाद्यत्वेनात इत्यस्य[1] तत्त्वाभावेन तदंशे निषेधाप्रवृत्या षष्ठी स्थान इति परिभाषालभ्य[2] स्थानसंबंध स्य[3] निर्विघ्नत्वेन स्थाने ग्रहणवैयर्थ्यापत्यानानुवादेत्यस्यानूद्य[4]मान विशेषणे तदप्रवृत्ति[5]रित्यर्थस्यावश्यकत्वे वृद्धिर्यस्या[6] चामादिरिति आद्यंशे[7] इकोयण-चीत्यत्राचीत्यंशे इक् परिभाषा तस्मिन्निति परिभाषयोः क्रमेण[8] प्रवृत्य[9]वृत्ति-भ्यामव्याप्त्यति व्याप्तिभियाविशेषणविशेषण विशेषणेऽप्रवृत्तिरित्यर्थ स्वीकारेणोक्ता व्याप्त्यतिव्याप्त्योर्वारणेपि आत[10] इत्यस्य तत्त्वाभावेन निषेधा प्रवृत्या पुनः स्थाने ग्रहणस्य सम्बन्धः षष्टिस्थानेति परिभाषया[11] कर्त्तुमशक्य एवेति[12]-

---

1. इत्यस्येतत्त्वाभावेनातदंशे प-1; इत्यस्य रत्वाभोवन अ-3; इत्यस्यरतत्वाभावेन ज-2; इत्यास्यतत्वाभोवन अ-4.
2. परिभाषालक्ष्यास्थानेग्रहणेवैय्र्थ्यापत्या इति पाठः अ-3; परिभाषालुग्रहहणै वैय्यर्थ्यापत्या अ-4.
3. संघस्य प-1; संवंस्य अ-4.
4. ऽनूद्यामान अ-4.
5. तदप्रवतिरित्यर्थस्या अ-3.
6. वृद्धिर्यस्याचामादिस्तद् वृद्धम् 1.1.73; वृत्धिस्याचामादिरिति प-1.
7. आध्यंशे प-2.
8. पाठोऽयं अ-4 ऋमेण अ-1; प्रमेण ज-2; क्तमेण प-2.
9. प्रवृत्यवृद्धिर्यतिभ्यामव्याप्त्यति अ-4.
10. अत प-1.
11. परिभाषायाः प-1, अ-4.
12. एवेति प-1.

तेन 'नेयङ्वङ्' (1.4.4) इत्यस्यानित्यत्वाद्ध्रे सुभ्रु इति सिद्धमिति तत्र, भाष्येऽदर्शनात्। भाष्यानुक्तज्ञापितार्थस्य साधुताया नियामकत्वेमानाभावात्। भाष्याविचारितप्रयोजनानां सोत्राक्षराणां

विद्यमानस्थान[1]ग्रहणं व्यर्थमेवेति त्वदुक्तज्ञापका[2]संभव, इत्यपि[3] दोषो बोध्यः। इकोयणचीत्यादौ दोष[4] ध्रौव्यादनूद्यमान विशेषणेन इत्ये[5]वार्थो ज्ञाप्यते। विशेषणता च साक्षात् परम्परा[6]साधारणी गृह्यते। एवं च[7] वृद्धिर्यस्येत्यादौ न दोष इति तु न शंकनीयम्। ननु साक्षादनूद्यमान विशेषणेऽनूद्यमान[8] विशेषण[9] विशेषणे इत्युभय विधोप्यर्था[10]गीक्रियते लक्ष्यानुरोधाच्च क्वचित्पूर्वांशस्य क्वचिदुत्तरांशस्य प्रवृत्तिरिति न[11] क्वापि अचोरहाभ्यां[12] द्वे उदात्त यणित्यादौ दोषलेश इति चेन्न[13]। अन्ततोगत्वा लक्ष्यानुरोधस्वीकारस्यावश्यकत्वेंतेरंडाविवाह[14] इति न्यायेन पूर्वमेवलक्ष्यानु[15]-रोधेन वृद्धिर्यस्येत्यादौ इक् परिभाषाऽप्रवृत्ति स्वीकारेणेष्ट सिद्धौ[16] भाष्यविरुद्धानुसरण्यवरोहस्यानुचितत्त्वादिति दिक्।

---

1. स्थाने प-2.
2. ज्ञापके संभव अ-3.
3. 'अपि' नाऽस्ति अ-4.
4. 'दो' नाऽस्ति अ-4; दोषध्रौन्यादनूद्यमान प-1, प-2.
5. इत्येवार्योज्ञप्यते प-1.
6. पाठोऽयं अ-4; साधारणी अ-1, प-1, प-2, अ-3; साधारणो गम्यते ज-2; एव चरवृद्धिः प-1; एवं चरवृद्धिः प-2; एवं च वृद्धिर्यस्यत्यादोष इति तू न अ-4.
8. द्या अ-4; 'विशेषण' नाऽस्ति अ-4.
10. अर्थोमाक्रियते अ-4.
11. 'न' नाऽस्ति अ-3.
12. 8.4.46 अष्टा.
13. चेन्नः प-2.
14. आवश्यकत्वैंतरंडविवाह प-1, प-2.
15. लक्ष्यानिरोधेन प-2.
16. सिद्धो अ-4; सिचौ ज-2.

पारायणादावदुष्ट मात्रार्थकत्वकल्पनाया एवौचित्यात्।

ननु स्थाने ग्रहणेनपरिभाषाणामनित्यत्वज्ञापनेन क्वचित्परिभाषाणामप्रवृत्तिः। एवं च ज्ञापकस्य सजातीयापेक्षयाऽनुवाद एवाप्रवृत्तिः[1]। ततश्च परिभाषाणामनित्यत्वेन क्वचित्सिद्धाया अप्रवृत्तेरनुवादिका परिभाषेयमिति त्वदुक्त प्रथमद्वितीय[2] दूषणयोर्गर्भस्रावेणैवगतत्वात्।

अंगांशे[3] उत्थिताकांक्षत्वेनाक्षिप्त प्रत्ययस्यांगांशे एव विशेषणत्वमित्यादिदूषणैर्विवरणशेखर शब्द[4]रत्नादौ अत्रैव मूलेंनंत्यविकार इति परिभाषाव्याख्याने च ष्यङः[5] संप्रेति सूत्रस्थ भाष्यस्य त्वयैवैकदेश्युक्तिताया[6] उक्तत्वाच्च। षष्ठी स्थाने[7] योगेति परिभाषायाः प्रसिद्धार्थकत्वे फलाभावेन[8] निर्दिश्यमान परिभाषार्थ[9] संग्राहकत्वं भगवतोक्तमदृत्वा[10]वृत्यातदर्थ संग्राहक[11] त्वकथनेन धिन्विकृण्व्योर[12]चेत्यनेन लोपविधाने[13] कर्त्तव्येऽकार[14] विधानेन यथोत्तर[15] मुनीनां प्रामाण्यमित्यर्थो ज्ञाप्यते इति कथनेन च भाष्यानुक्त[16]

---

1. 'एवा' नाऽस्ति अ-4.
2. द्वितीययोर्दूषणयोर्गभ्रस्त्रा अ-4.
3. अंशांशे अ-4.
4. शब्दरसादौ प-2.
5. ष्यङः 6/1/13 अष्टा.
6. देश्युक्तताया अ-4.
7. 1/1/49 अष्टाः स्थाने यो योगेति प-1.
8. फलभावेन अ-3.
9. परिभाषार्थम् अ-4.
10. अनाहृत्यावृत्या प-1; अनादृत्यतदर्थ अ-4.
11. संग्रहकत्व प-1; संग्रहकथनेन अ-4.
12. संपाधिन्विकृष्व्योर च 3/1/80 अष्टा.
13. लोपविधानेन यथ्थोत्तरं मुनीनां इति पाठोपलभ्यते प-1 मातृकायाम्.
14. उकार अ-4.
15. यथात्तरम् अ-4.
16. भाष्यानुकज्ञापकानाम् अ-3.

किञ्च ज्ञापितेऽप्यानीत्यस्य न सार्थक्यमाडागमशून्यप्रयोगस्य अप्रसिद्धेः। आङ्ग्रहणं तु लोडग्रहणवदिति बोध्यम्। अत एव 'धोर्लोपो लेटि वा' '7.3.70' इति सूत्रे वेति प्रत्याख्यातम्। लोपेऽप्याट्पक्ष आटः श्रवणं भविष्यति दधादिति, अटि दधदिति आगमशास्त्रस्यानित्यत्वेत्वाट्यसति दधादित्यसिद्ध्या वाग्रहणस्यावश्यकत्वेन तत्प्रत्याख्यानासङ्गतिः स्पष्टैव।

ज्ञापकानां[1] त्वयापि स्वीकृतत्वान्नापि तृतीयः। भाष्यकृतांतरंगत्वेन स्थान संबंधस्य कथनेपि[2] सूत्रकाररीत्या ज्ञापकत्व स्वीकारे बाधकाभावेन परिभाषाणाम[3]नित्यत्वानुवादक परिभाषास्वीकारे लक्ष्य विसंवादाभावे[4]–नैतादृश्यभाष्यविरोधस्य दोषा[5] संपादकत्वेन च[6] नापि चतुथोऽत आह। किञ्च **विधाविति।**[7] एवं परिभाषा[8] फलस्य विधीयत इति क्रियाध्याहारेणैव लाघवात् सिद्धे तदंशे गुरुतरयत्न[9]स्वीकारस्यानुचित्तवादिति भावः। वृद्धिरादै[10]च् सूत्रे तदे भावितानां संज्ञेति पक्षे[11] शालीयादौ वृत्धलक्षणः छो न स्यादिति[12] दूषणदानेन मालादीनां चेत्यादि ज्ञापकाच्चेक् परिभाषायां विधीयत[13] –

---

1. 'का' नाऽस्ति प-1.
2. कथनोपि अ-3; कथनेमि अ-4.
3. परिभाषणां अ-4.
4. संभावेने प-2.
5. दोष प-1.
6. पाठोऽयं प-1, प-2, अ-4 चानापि अ-1, अ-3 द्यानापि ज-2.
7. पाठोऽयं अ-4; किं च विधाति अ-1, ज-2, अ-3, प-1, प-2.
8. परिषोमोपरस्य विधीयत प-1.
9. गुरुतारपल प-2.
10. 1/1/1 अष्टा.
11. पक्ष अ-4; पदेशालेपादौ ज-2.
